इस सूत्र से सकार को तृतीय अक्षर नहीं हुआ पुनः "रेफसोर्विसर्जनीयः" इस १३०वें सूत्र से सकार को विसर्ग प्राप्त था किन्तु "सकृद् वाधितो विधिर्वाधित एव" जिसकी विधि एक बार बाधित कर दी जाती है वह बाधित ही रहता है पुनः उसमें दूसरी विधि भी बाधित ही रहती है जैसे सत्पुरुष का वचन एक होता है। अतः तेजस्वान् रहा है।

मत्वर्थ शब्द से क्या अर्थ लेना ? अस्ति का अर्थ लेना अर्थात् मत्वर्थ से कहे गये प्रत्यय अस्ति अर्थ के वाचक होते हैं।

माया अस्यास्तीति = मायावी, मायावान्। मेधावी, मेधावान्। स्रक् अस्यास्ति इति = स्रग्वी। स्रग्वान्।

"व्यंजनांतस्य यत्सुभोः" इस ४३०वें सूत्र के न्याय से और "चवर्ग दृगादीनां च" २५४वें सूत्र से स्रज् के ज् को गकार हो गया है।

'बहुलमिन् भवति' इस नियम के अनुसार ज्ञानम् अस्य अस्तीति ज्ञानिन्, लिंग संज्ञा होकर सि विभक्ति के आने से 'ज्ञानी' बना।

दण्डो अस्यास्ति इति = दण्डी, शिखा अस्यास्तीति = शिखी।

देवो अस्यास्तीति, देविन् = देवी। इत्यादि।

'वह इसके हुआ' इस अर्थ में तारकादि शब्दों से 'इतच्' प्रत्यय होता है ॥५०८॥

'तत्' इस प्रथमान्त से 'इसके हुआ' इस अर्थ में तारका आदि आकृति गण से परे 'इतच्' प्रत्यय होता है। तारकाः संजाताः अस्य इति, तारका + जस्, विभक्ति का लोप होकर "इवर्णावर्णयोर्लोपः" इत्यादि सूत्र से आकार का लोप होकर लिंग संज्ञा होकर 'तारकितं' बना, इसका अर्थ है आकाश अर्थात् तारा उदित हो रहें जिसके ऐसा तारकित आकाश। ऐसे ही कण्टकाः संजाता अस्येति 'कण्टकितः' करः।

पल्लवाः संजाता अस्येति = पल्लवितः-वृक्षः।

संख्या के पूरण अर्थ में 'ड' और 'म' प्रत्यय होते हैं ॥५०९॥

एकादश पर्यंत संख्या कहलाती है इसके आगे असंख्या हो जाती है। संख्यादि नकारांत से 'म' प्रत्यय होता है और शेष संख्या से 'ड' प्रत्यय होता है। ऐसा क्यों ? 'वा' शब्द से ऐसा नियम है। 'वा' शब्द कहाँ है ? 'वाणपत्ये' ४७३वें सूत्र में 'वा' शब्द है उससे उपर्युक्त नियम समझ लेना चाहिये।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

डानुबन्धेऽन्त्यस्वरादेर्लोपः ॥५१० ॥

डानुबन्धे प्रत्यये परे अन्त्यस्वरादेर्लोपो भवति। एकादशानां पूरण एकादश एकादशी एकादशं। द्वादशः एवं। अत्र आत्वं निपातः। त्रयोदशः। अत्र त्रयस्तु निपातः। चतुर्दशः। पञ्चदशः। पञ्चमः। पंचमी। पञ्चमं। एवं सप्तमः। अष्टमः। नवमः। दशमः। इत्यादि।

द्वेस्तीयः ॥५११ ॥

द्वेस्तीयो भवति पूरणेऽर्थे। द्वयोः पूरणो द्वितीयः। द्वितीया। द्वितीयं।

त्रेस्तृ च ॥५१२ ॥

त्रेस्तीयो भवति तृआदेशश्च पूरणेऽर्थे। त्रयाणां पूरणस्तृतीयः। तृतीया। तृतीयं।

अन्तस्थो डे र्षोः ॥५१३ ॥

रेफषकारयोरन्तस्थो भवति डे परे। चतुर्णां पूरणश्चतुर्थः। चतुर्थी। चतुर्थं।

तवर्गस्य षटवर्गाट्टवर्गः ॥५१४ ॥

षकारटवर्गान्तात्परस्य तवर्गस्य टवर्गो भवति आन्तरतम्यात्। षण्णां पूरणः षष्ठः षष्ठी षष्ठं।

कतिपयात्कतेश्च ॥५१५ ॥

एकादशानां पूरणः, एकादशन् + आम् ड् अ। विभक्ति का लोप,

अनुबंध प्रत्यय के आने पर अन्त्यस्वरादि अवयव का लोप हो जाता है ॥५१० ॥

अतः अन् का लोप होकर एकादश् + अ = एकादश बना। लिंग संज्ञा होकर तीनों लिंगों की सि विभक्ति में एकादशः, एकादशी, एकादशं बन गया। ऐसे द्वादश शब्द बना है इसमें द्वि को 'आ' निपात से हुआ है अतः द्वादशः, द्वादशी, द्वादशं बना। त्रयोदशः में भी त्रय शब्द का निपात हुआ है। एवं चतुर्दशः, पंचदशः आदि बने हैं इनका अर्थ है ग्यारहवाँ, बारहवाँ आदि। आगे 'म' प्रत्यय से बने हैं। जैसे पंचानां पूरणः पंचन् + आम् म, विभक्ति और णकार का लोप होकर पञ्चम हुआ लिंग संज्ञा होकर सि विभक्ति में 'पञ्चमः' बना, स्त्रीलिंग नपुंसक लिंग में पञ्चमी, पंचमं बना। एवं सप्तमः, अष्टमः, नवमः दशमः। इत्यादि।

पूरण अर्थ में द्वि से 'तीय' प्रत्यय होता है ॥५११ ॥

द्वयोः पूरण, द्वि + ओस् तीय, विभक्ति का लोप, लिंग संज्ञा होकर, विभक्ति आने से "द्वितीयः द्वितीया, द्वितीयं" बना।

त्रि को पूरण अर्थ में तृ आदेश होकर 'तीय' प्रत्यय हो जाता है ॥५१२ ॥

त्रयाणां पूरणः, त्रि + आम् विभक्ति का लोप होकर पूर्वोक्त विधि से 'तृतीयः' तृतीया, तृतीयं बना।

'ड' प्रत्यय के आने पर रकार को षकार के अन्त में 'थ' हो जाता है ॥५१३ ॥

चतुर्णां, पूरणः, चत्वार् + आम् विभक्ति का लोप चत्वार, के वा को उकार होकर चतुर्थ रहा लिंग संज्ञा होकर विभक्तियों के आने से चतुर्थः, चतुर्थी, चतुर्थं बना।

षकार और टवर्ग से परे तवर्ग को टवर्ग हो जाता है ॥५१४ ॥

और वह तवर्ग को टवर्ग क्रम से होता है जैसे यहाँ थ को ठ होगा। षण्णां पूरणः, षष् + आम् विभक्ति का लोप आदि होकर षष्ठः, षष्ठी, षष्ठं बना।

कतिपय और कति शब्द से 'ड' प्रत्यय आने पर पूरण अर्थ में 'थ' प्रत्यय होता है ॥५१५ ॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

कतिपयात्कतेश्च पूरणेऽर्थे थो भवति डे परे। कतिपयानां पूरणः कतिपयथः। कतीनां पूरणः कतिथः। कतिपयथी। कतिथी। कतिपयथं। कतिथं।

विंशत्यादेस्तमट् ॥५१६॥

विंशत्यादेस्तमट् प्रत्ययो भवति पूरणेऽर्थे। विंशतितमः। विंशतेः पूरणी विंशतितमी। विंशतितमं। त्रिंशतः पूरणः त्रिंशत्तमः। त्रिंशत्तमी। त्रिंशत्तमं। चत्वारिंशत्तमः। पंचाशत्तमः। उत्तरत्र नित्यग्रहणादिह विकल्पो लभ्यते। उत्तरत्र नित्यग्रहणं क्वास्ते ? नित्यं शतादेरित्यत्र। यत्र संख्या विद्यते तत्र विकल्पेन तमट् भवति।

तेर्विंशतेरपि ॥५१७॥

विंशतेरपि तेर्लोपो भवति डानुबन्धे प्रत्यये परे। अपिशब्दात् अस्य लोपो भवति। विंशः। त्रिंशः। चत्वारिंशः। पञ्चाशः।

नित्यं शतादेः ॥५१८॥

शतादेर्गणात् पूरणेऽर्थे नित्यं तमट् प्रत्ययो भवति। एकशतस्य पूरण एकशततमः। एकशततमी। एकशततमं। एकसहस्रस्य पूरण एकसहस्रतमः। एकसहस्रतमी। एकसहस्रतमं। एककोटितमः।

षष्ट्याद्यतत्परात् ॥५१९॥

षष्ट्यादेरसंख्यायाः परात् पूरणेऽर्थे नित्यं तमट् भवति। षष्टेः पूरणः षष्टितमः। षष्टेः पूरणी षष्टितमी। षष्टितमं। सप्ततितमः। अशीतितमः। नवतितमः। अतत्परादिति किं ? एकषष्टेः पूरण एकषष्टः। एकषष्टितमः। यत्र संख्या विद्यते तत्र विकल्पेन तमट् प्रत्ययो भवति।

कतिपयानां पूरणः = कतिपयथः, कतीनां पूरणः = कतिथः बना।

विंशति आदि से पूरण अर्थ में 'तमट्' प्रत्यय होता है ॥५१६॥

विंशतेः पूरणः विंशति + डस् = तम, विभक्ति का लोप होकर पूर्वोक्त सारी विधि से विंशतितमः, विंशतितमी, विंशतितमं। ऐसे ही त्रिंशतः पूरणः त्रिंशत् + डस् तम, पूर्वोक्त विधि से त्रिंशत्तमः त्रिंशत्तमी, त्रिंशत्तमं बना। आगे चत्वारिंशत्तमः, पञ्चाशत्तमः इत्यादि। आगे नित्य शब्द ग्रहण किया गया है अतः यहाँ विकल्प समझना। आगे 'नित्य' शब्द किस सूत्र में है "नित्यं शतादेः" इस ५१८वें सूत्र में है। जहाँ संख्या है वहाँ विकल्प से तमट् प्रत्यय होता है।

अनुबंध प्रत्यय के आने पर विंशति के 'ति' का लोप हो जाता है ॥५१७॥

अपि शब्द से शकार के अकार का भी लोप हो जाता है। अतः विंश रहा, लिंग संज्ञा के बाद सि विभक्ति में 'विंशः' बना। ऐसे ही त्रिंशः, चत्वारिंशः, पञ्चाशः इत्यादि।

शतादि गण से पूरण अर्थ में नियम से 'तमट्' प्रत्यय होता है ॥५१८॥

एकशतस्य पूरणः = एकशततमः, एकशततमी, एकशततमं, एकसहस्रस्य पूरणः = एकसहस्रतमः, एककोटितमः इत्यादि।

षष्टि आदि असंख्या से परे पूरण अर्थ में नित्य ही तमट् प्रत्यय होता है ॥५१९॥

षष्टेः पूरणः = षष्टितमः, षष्टितमी, षष्टितमं, सप्ततितमः, अशीतितमः, नवतितमः। सूत्र में अतत्पर-संख्या से परे न हो ऐसा क्यों कहा ? एकषष्टेः पूरणः = एकषष्टितमः और 'ड' प्रत्यय से एकषष्टः भी बन गया। मतलब जहाँ संख्या है वहाँ विकल्प से तमट् प्रत्यय होता है।

विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परन्तु ये।
येव्यादेः सर्वनाम्नस्ते बहोश्चैव पराः स्मृताः ॥३॥

अतः परं द्व्यादिवर्जितात्सर्वनाम्नः परा ये प्रत्यया वक्ष्यन्ते ते विभक्तिसंज्ञा विज्ञेयाः। तु पुनः। बहोश्चैव इति कोऽर्थः ? बहुशब्दात्पराः प्रत्ययाः कथिताः श्रुतत्वात्सर्वनाम्नः कार्यं प्रति विभक्तिसंज्ञा भवन्ति। तेन तदा कदा इति घोषवति न दीर्घः। तस्मिन् काले तदा "दादानीमौ तदः स्मृतौ" इति दा प्रत्ययः। कस्मिन्काले कदा। काले किं ? सर्वयदेकान्येभ्य एव दा इति दाप्रत्ययः। विभक्तिसंज्ञा इति विभक्तिकार्यं किं ? त्यदादित्वं अकारे लोपं। एकत्र। किं क इति कादेशः।

पञ्चम्यास्तस् ॥५२०॥

पञ्चम्यन्तात् द्व्यादिवर्जितात्सर्वनाम्नो बहोश्च परस्तस् भवति। सर्वस्मात् सर्वतः। तस्-प्रत्ययान्ता अव्ययानि भाष्यन्ते। अव्ययाद्विभक्तेर्लोपः। तस्मात् ततः। यस्मात् यतः। बहुभ्यो बहुतः। एवं विश्वतः। उभयतः। अन्यतः। पूर्वतः। परतः। इत्यादि। अद्व्यादेरिति किं ? द्वाभ्यां। उगवादित इत्यत्र कथं, प्रयोगतश्चेति ज्ञापयति। तेन असर्वनाम्नोप्यवधिमात्रात्तस् वक्तव्यः असर्वनाम्नोऽपि परस्तस् प्रत्ययो भवति

श्लोकार्थ—इसके आगे द्वि आदि से वर्जित सर्वनाम से परे जो प्रत्यय कहे जायेंगे उन्हें विभक्ति-संज्ञक समझना चाहिये।

मार्गदर्शक — आचार्य श्री सुविधिसागर जी महाराज

पुनः 'बहोश्चैव' शब्द का क्या अर्थ है ? बहु शब्द से परे जो प्रत्यय कहे गये हैं वे सुने गये होने से सर्वनाम के कार्य के प्रति विभक्ति संज्ञक होते हैं। इससे तदा कदा, इनमें 'घोषवति' इत्यादि १४०वें सूत्र से दीर्घ नहीं हुआ है। तस्मिन् काले तदा, 'दादानीमौ तदः स्मृतौ' इस ५३२वें सूत्र से 'दा' प्रत्यय होता है। कस्मिन् काले कदा। काले ऐसा क्यों कहा ? "काले किं सर्वयदेकान्येभ्य एव दा" इस ५२९वें सूत्र से दा प्रत्यय होता है। विभक्ति संज्ञा इससे विभक्ति कार्य क्या हुआ ? 'त्यदाद्यत्वं' इस १७२वें सूत्र से अकार होकर लोप हुआ। एकत्र,'किं कः' से 'क' आदेश होता है।

द्वि आदि से वर्जित सर्वनाम पञ्चम्यंत और बहु शब्द से परे तस् प्रत्यय होता है ॥५२०॥

'सर्वस्मात्' अर्थ में तस् प्रत्यय होकर सर्व + ङसि, तस् है। विभक्ति का लोप होकर लिंग संज्ञा होकर स् का विसर्ग हुआ पुनः सि विभक्ति आई सर्वतः + सि सूत्र लगा 'अव्ययाच्च' इस ___ सूत्र से विभक्ति का लोप हो गया। तस् प्रत्यय वाले सभी शब्द अव्यय कहे जाते हैं। तस्मात् तद् + ङसि, तस् 'त्यदादीनाम विभक्तौ' सूत्र १७२वें से 'अकारांत होकर 'ततः' बना। ऐसे ही यस्मात् = यतः, बहुभ्यो = बहुतः, विश्वतः, उभयतः अन्यतः पूर्वतः इत्यादि। सूत्र में द्वि आदि को छोड़कर ऐसा क्यों कहा ? द्वाभ्यां में तस् प्रत्यय नहीं होगा। "उगवादितः" इत्यादि सूत्र ___ में गवादि से तस् प्रत्यय कैसे हुआ ? तो आगे उसे बताते हैं।

अवधि मात्र असर्वनाम से भी तस् प्रत्यय होता है।[१]

यहाँ अवधि मात्र का क्या अर्थ है ? प्रयोग मात्र से तस् प्रत्यय होता है ऐसा अर्थ है। अतः इस सूत्र से अन्यत्र भी तस् प्रत्यय हो जाता है। ग्रामात्, ग्राम + ङसि, तस् विभक्ति का लोप होकर ग्रामतः, प्रयोगात् = प्रयोगतः, वृक्षात् = वृक्षतः, पटतः, घटतः इत्यादि। अस्मात् से तस् प्रत्यय हुआ है। अतः

---

१. यह वृत्ति में है।

अवधिमात्रात्। अवधिमात्रादिति कोऽर्थः ? प्रयोगमात्रादित्यर्थः। इत्यनेन सूत्रेण तस्प्रत्ययो भवति। ग्रामात् ग्रामतः। प्रयोगात् प्रयोगतः। एवं वृक्षात् वृक्षतः। पटतः। घटतः।

तत्रेदमिः ॥५२१॥

तेषु विभक्तिसंज्ञकेषु प्रत्ययेषु परत इदम् इकारतां प्राप्नोति। अस्मात् इतः।

तेषु त्वेतदकारताम् ॥५२२॥

तेषु तकारादिषु विभक्तिसंज्ञकेषु परत एतद्शब्द अकारतां प्राप्नोति। एतस्मात् अतः। तकारादिष्विति किं ? एतेन प्रकारेण एतधा।

तहोः कुः ॥५२३॥

तकारहकारयोः परयोः किंशब्दः कुर्भवति। कस्मात् कुतः।

त्रः सप्तम्याः ॥५२४॥

सप्तम्यन्ताद् द्वयादिवर्जितात्सर्वनाम्नो बहोश्च परतः त्रप्रत्ययो भवति। सर्वस्मिन् सर्वत्र। एतस्मिन् अत्र। कस्मिन् कुत्र। अमुष्मिन् अमुत्र। तस्मिन् तत्र। यस्मिन् यत्र। बहुषु बहुत्र। अद्व्यादेरिति किं ? द्वयोः। त्वयि। मयि। इत्यादि।

आद्यादिभ्यः सप्तम्यन्तेभ्यश्च ॥५२५॥

सप्तम्यन्तेभ्य आद्यादिभ्यश्च परस्तस् प्रत्ययो भवति। आदौ आदितः। एवं मध्ये मध्यतः। अन्ते अन्ततः। अग्रे अग्रतः। मुखे मुखतः। पृष्ठे पृष्ठतः। पार्श्वे पार्श्वतः। पूर्वे पूर्वतः। परे परत इत्यादि।

विभक्ति का लोप होने से विभक्ति के आश्रित जो इदम् को 'अ' हुआ था वह भी 'निमित्त के अभाव में नैमित्तिक का अभाव हो जाता है' इस नियम से इदम् रह गया है इदम् = तस् है।

इन विभक्ति संज्ञक प्रत्ययों के आने पर इदं को 'इ' हो जाता है ॥५२१॥

तब 'इतः' बना। एतस्मात् से तस् प्रत्यय हुआ है।

उन तकारादि विभक्ति संज्ञकों के आने पर एतद् शब्द को अकार हो जाता है ॥५२२॥

एतस्मात् = अतः बन गया। तकार आदि वाली विभक्तियों के आने पर ऐसा क्यों कहा ? तो एतेन प्रकारेण से प्रकार अर्थ में धा प्रत्यय होने से 'एतधा' बना यहाँ धकार आदि विभक्ति होने से एतद् को 'अ' नहीं हुआ है।

तकार, हकार से परे किं शब्द को 'कु' आदेश हो जाता है ॥५२३॥

कस्मात् = कुतः,

सप्तम्यंत से परे 'त्र' प्रत्यय होता है ॥५२४॥

द्वि आदि वर्जित सप्तम्यंत सर्वनाम और बहु शब्द से परे 'त्र' प्रत्यय होता है। सर्वस्मिन् त्र, सर्व + ङि, त्र विभक्ति का लोप होकर सर्वत्र हुआ। इसमें भी लिंग संज्ञा होकर सि आदि विभक्तियाँ आयेंगी पुनः 'अव्ययाच्च' सूत्र से विभक्ति का लोप हो जावेगा क्योंकि ये सभी प्रत्यय अव्ययसूचक हैं।

एतस्मिन् = अत्र, कस्मिन् = कुत्र, अमुस्मिन् = अमुत्र, तस्मिन् = तत्र, यस्मिन् = यत्र, बहुषु = बहुत्र। द्वि आदि को छोड़कर ऐसा क्यों कहा ? द्वयोः, त्वयि, मयि, इनमें त्र प्रत्यय नहीं होता है।

सप्तम्यंत आदि प्रभृति शब्दों से परे तस् प्रत्यय होता है ॥५२५॥

आदौ = आदितः, मध्ये = मध्यतः, अंते = अंततः, अग्रे = अग्रतः, मुखे = मुखतः, पृष्ठे = पृष्ठतः, पार्श्वे = पार्श्वतः, पूर्वे-पूर्वस्मिन् वा पूर्णतः परे परस्मिन् वा = परतः इत्यादि।

इदमो हः ॥५२६ ॥

इदमः सप्तम्यन्तात् हो भवति। त्रापवादः। अस्मिन् इह।

किमः ॥५२७ ॥

किमः सप्तम्यन्तात् हो भवति। कस्मिन् कुह।

अत् क्व च ॥५२८ ॥

किमः सप्तम्यन्तात् अद् भवति क्वादेशश्च। कस्मिन् क्व।

काले किंसर्वयदेकान्येभ्य एव दा ॥५२९ ॥

काले वर्तमानेभ्यः सप्तम्यन्तेभ्य एभ्यो दा भवति। कस्मिन् काले कदा। एवं सर्वदा। यदा। एकदा। अन्यदा। काल इति किं ? सर्वत्र देशे। सदा इति निपातः। सर्वशब्दात्परो दाप्रत्ययो भवति। सर्वस्य सभावश्च। सर्वस्मिन्काले सदा।

इदमोर्हर्यधुनादानीम् ॥५३० ॥

काले वर्तमानात्सप्तम्यन्तादिदमः परा र्हि अधुना दानीम् एते प्रत्यया भवन्ति।

रथोरेतेत् ॥५३१ ॥

रथोः परत इदम् शब्द एत इत् इत्येतौ प्राप्नोति। अस्मिन् काले एतर्हि। इवर्णावर्णयोर्लोपः। अधुना। इदानीम्। इत्थम्।

सप्तम्यंत इदं से 'ह' प्रत्यय होता है ॥५२६ ॥

यहाँ त्र प्रत्यय का अपवाद हो गया है। अस्मिन् = इह

सप्तम्यंत किम् से 'ह' प्रत्यय होता है ॥५२७ ॥

कस्मिन् 'कुह' बन गया।

सप्तम्यंत किं से परे 'अत्' प्रत्यय हो जाता है और किम् को 'क्व' आदेश हो जाता है ॥५२८ ॥

कस्मिन्, क्व + अ है ४७९वें सूत्र से क्व के 'अ' का लोप होकर प्रत्यय मिलकर 'क्व' बन गया।

काल अर्थ में वर्तमान किं आदि सप्तम्यंत शब्दों से 'दा' प्रत्यय होता है ॥ ५२९ ॥

कस्मिन् काले किं को क आदेश होकर 'कदा' सर्वस्मिन् काले सर्वदा, यस्मिन् काले यदा, एकस्मिन् काले एकदा, अन्यस्मिन् काले अन्यदा। काल अर्थ में ऐसा क्यों कहा ? तो सर्वस्मिन् देशे इस अर्थ में दा प्रत्यय नहीं हुआ।

सर्व शब्द से परे दा प्रत्यय होता है और सर्व को 'स' निपात हो जाता है।[1]

सर्वस्मिन् काले 'सदा' बन गया।

सप्तम्यंत इदं शब्द से काल अर्थ में र्हि अधुना और दानीम् प्रत्यय होता है ॥ ५३० ॥

र और थ से परे इदम् को एत, इत् आदेश हो जाता है ॥ ५३१ ॥

अस्मिन् काले एतर्हि, इत् + अधुना "इवर्णावर्णः" ४७९ वें सूत्र से इकार का लोप होकर 'अधुना' बना।

---

१. यह वृत्ति में है।

दादानीमौ तदः स्मृतौ ॥५३२॥

काले वर्त्तमानात्सप्तम्यन्तात्तदः परौ दादानीमौ स्मृतौ। तस्मिन् काले तदा। तदानीं।

सद्यआद्या निपात्यन्ते ॥५३३॥

सद्यआद्याः शब्दाः कालेऽभिधेये निपात्यन्ते। लक्षणसूत्रमन्तरेण लोकप्रसिद्धशब्दरूपोच्चारणं निपातनं। समाने अहनि सद्यः। समानस्य सभावो द्यश्च परविधिः। अस्मिन्नहनि अद्य। इदमो अद्भावोद्य च परविधिः। पूर्वस्मिन् संवत्सरे परुत्। पूर्वतरस्मिन् संवत्सरे परारि।

पूर्वपूर्वतरयोः पर उदारी च संवत्सरे॥ ५३४॥

पूर्वपूर्वतरयोः उत्आरी च भवतः। चशब्दात्पर आदेशश्च संवत्सरेऽर्थे।

इदमः समसण् ॥ ५३५॥

सप्तम्यन्तादिदमः समसण् प्रत्ययो भवति संवत्सरेऽर्थे। अस्मिन्संवत्सरे ऐषमः।

पूर्वादेरेद्युस् ॥ ५३६॥

सप्तम्यन्तात्पूर्वादिर्गणात् पर एद्युस् प्रत्ययो भवति। पूर्वस्मिन्नहनि पूर्वेद्युः। एवं परेद्युः। अन्येद्युः। अन्यतरेद्युः। इतरेद्युः। कतरेद्युः। अपरेद्युः।

उभयाद् द्युश्च ॥ ५३७॥

काल अर्थ में सप्तम्यंत तद् से परे 'दा' दानीम् प्रत्यय होते हैं॥ ५३२॥

तस्मिन् काले तद् को 'त्यदादीनामविभक्तौ' से त होकर 'तदा, तदानीम्' बना।

सद्य, अद्य शब्द निपात से सिद्ध होते हैं॥५३३॥

सद्य अद्य शब्द काल अर्थ में निपात से सिद्ध हो जाते हैं व्याकरण सूत्र के बिना लोक प्रसिद्ध शब्द रूप का उच्चारण निपात कहलाता है। जैसे समाने अहनि सद्यः यहाँ समान को 'स' आदेश एवं आगे द्यः आदेश होकर 'सद्यः' बना है। अस्मिन् अहनि अद्य इदम् को 'अ' आदेश और 'द्य' विधि होकर 'अद्य' बना है।

संवत्सर अर्थ में पूर्व और पूर्वतर को पर आदेश होकर क्रम से आगे उत् और आरि हो जाता है॥ ५३४॥

पर + उत्, पर + आरि "इवर्णावर्णयोर्लोपः' इत्यादि से अकार का लोप होकर परुत् परारि बना।

सप्तम्यंत इदं शब्द से समसण् प्रत्यय होता है॥ ५३५॥

अस्मिन् संवत्सरे अर्थ में इदम् + ङि समसण् के अण् का अनुबंध लोप होकर इदम् को 'इ' आदेश होकर णानुबंध से वृद्धि होकर ऐसमस् बना सकार को षकार एवं स को विसर्ग होकर 'ऐषमः' बना।

सप्तम्यंत पूर्वादि गण से परे 'एद्युस्' प्रत्यय होता है॥ ५३६॥

पूर्वस्मिन् अहनि पूर्व + ङि विभक्ति का लोप एवं अकार का लोप होकर पूर्वेद्युः बना। ऐसे ही परस्मिन् अहनि परेद्युः, अन्यस्मिन् अहनि अन्येद्युः अन्यतरस्मिन् अहनि-अन्यतरेद्युः इतरस्मिन् अहनि, इतरेद्युः, कतरेद्युः, अपरेद्युः बना।

सप्तम्यंत उभय शब्द से परे द्युस् प्रत्यय होता है॥ ५३७॥

सप्तम्यन्तादुभयशब्दात्परो द्युस् भवति। चकारात् एद्युस् भवति। उभयस्मिन्नहनि उभयेद्युः। उभयद्युः।

परादेरेद्यविस् ॥५३८॥

परादेर्गणात्पर एद्यविस् प्रत्ययो भवति। परस्मिन्नहनि परेद्यविः। एवमन्येद्यविः। अन्यतमेद्यविः। इत्यादि।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

प्रकारवचने तु था ॥ ५३९॥

अद्व्यादेः सर्वनाम्नः प्रकारवचने तु था भवति। प्रकारशब्दः सदृशार्थो विशेषार्थश्च। सामान्यभेदकः प्रकारः। सर्वेण प्रकारेण सर्वथा। एवमन्यथा। यथा। तथा। उभयथा। पूर्वथा। अपरथा। वाक्यार्थविशेषण सर्वविभक्तिभ्यो ज्ञेयः थाप्रत्ययः। सर्वस्मिन् प्रकाराय यदि वा सर्वस्मिन् प्रकारे सर्वथा इत्यादि।

संख्यायाः प्रकारे धा ॥ ५४०॥

संख्यायाः परः प्रकारवचने धा भवति। चतुर्भिः प्रकारैः चतुर्धा। एवं द्विधा। एकधा। बहुभिः प्रकारैर्बहुधा। पञ्चधा। षोढा। षट्प्रकारा अस्य इति विग्रहः।

षष् उत्वम् ॥५४१॥

षष्शब्दस्यान्त उत्वं भवति। सप्तधा। अष्टधा। नवधा। दशधा। सहस्रधा। लक्षधा। कोटिधा।

द्वित्रिभ्यां धमणेधा च ॥५४२॥

द्वित्रिभ्यां परो धमण् एधा च प्रत्ययौ भवतः प्रकारवचने। द्वैधं। त्रैधं। द्वेधा। त्रेधा।

चकार से एद्युस् प्रत्यय होता है। उभयस्मिन् अहनि उभयेद्युः, उभयद्युः।

परादि गण से परे एद्यविस् प्रत्यय होता है ॥ ५३८ ॥

परस्मिन् अहनि परेद्यविः। ऐसे ही अन्येद्यविः अन्यतमेद्यविः इत्यादि।

द्वि आदि से रहित सर्वनाम से प्रकार अर्थ में 'था' प्रत्यय होता है ॥ ५३९ ॥

प्रकार शब्द सदृश अर्थवाची और विशेष अर्थवाची है। सामान्य में भेद करने वाले को प्रकार कहते हैं। सर्वेण प्रकारेण, सर्व + टा, था विभक्ति का लोप होकर 'सर्वथा' बना। इसी प्रकार से अन्यथा, येन प्रकारेण, यथा, तथा, उभयथा, पूर्वथा, अपरथा आदि बन गये। वाक्य अर्थ की विशेषता से सभी विभक्तियों से 'था' प्रत्यय हो जाता है। जैसे सर्वस्मै प्रकाराय अथवा सर्वस्मिन् प्रकारे सर्वथा बन गया इत्यादि।

संख्या से परे प्रकार अर्थ में 'धा' प्रत्यय होता है ॥ ५४० ॥

चतुर्भिः प्रकारैः चतुर्धा, द्वाभ्यां प्रकाराभ्यां = द्विधा, एकेन प्रकारेण = एकधा, बहुभिः प्रकारैः बहुधा, पञ्चधा। इत्यादि। षट् प्रकारा ऐसा विग्रह है षष् + जस् विभक्ति का लोप हुआ।

षष् शब्द के अंत को उकार हो जाता है ॥ ५४१ ॥

ष उ धा संधि होकर एवं तवर्ग को ५२२वें सूत्र में ट वर्ग होकर धा को ढा हुआ अतः 'षोढा' बना। ऐसे ही सप्तधा, अष्टधा, नवधा, दशधा, शतधा, सहस्रधा, लक्षधा, कोटिधा।

द्वि, त्रि से परे प्रकार अर्थ में धमण् और एधा प्रत्यय होता है ॥ ५४२ ॥

धमण् के अण् का अनुबंध होकर णानुबंध के निमित्त से वृद्धि होकर द्वैधं, त्रैधं बना। एधा प्रत्यय से 'इवर्णावर्णयोर्लोपः' इत्यादि से इवर्ण का लोप होकर द्वेधा, त्रेधा बना।

इदंकिंभ्यां थमुः कार्यः ॥ ५४३ ॥

इदंकिंभ्यां परः थमुः कार्यः प्रकारवचने । अनेन प्रकारेण इत्थं । केन प्रकारेण कथम् ।

मार्गदर्शक :- आचार्य श्री सुविधि

आख्याताच्च परास्तमादयः ॥ ५४४ ॥

नाम्न आख्याताच्च परास्तमादयः प्रत्यया भवन्ति ।

प्रकृष्टे तमतररूपाः ॥५४५ ॥

प्रकृष्टार्थे एते प्रत्यया भवन्ति । प्रकृष्ट आढ्यः आढ्यतरः आढ्यतमः आढ्यरूपः । एवं वैयाकरणतमः वैयाकरणतरः वैयाकरणरूपः । पचतितमः पचतितरः पचतिरूपः ।

ईषदसमाप्तौ कल्पदेश्यदेशीयाः ॥ ५४६ ॥

ईषदपरिसमाप्तौ अर्थे कल्पदेश्यदेशीया एते प्रत्यया भवन्ति । ईषदपरिसमाप्तः पटुः पटुकल्पः । पटुदेश्यः । पटुदेशीयः । पचतिकल्पः । पचतिदेश्यं । पचतिदेशीयं । पचतिकल्पं । [एतौ अव्ययौ पुल्लिगौ । अयं नपुंसकलिंगः पचतिरूपं] ।

कुत्सितवृत्तेर्नाम्नः पाशः ॥५४७ ॥

कुत्सितवृत्तेर्नाम्नः परः पाशः प्रत्ययो भवति । कुत्सितो वैयाकरणो वैयाकरणपाशः ।

भूतपूर्ववृत्तेर्नाम्नश्चरट् ॥ ५४८ ॥

भूतपूर्ववृत्तेर्नाम्नः परश्चरट् प्रत्ययो भवति । टकारः षणटकारानुबन्धादिति विशेषणाऽर्थः । भूतपूर्व आढ्यः आढ्यचरः । आढ्यचरी । आढ्यचरं । भूतपूर्वो राजा राजचरः । भूतपूर्वा राज्ञी राजचरी । एवं देवचरः । देवचरी ।

इदं किं से प्रकार अर्थ में थमु प्रत्यय होता है ॥ ५४३ ॥

अनेन प्रकारेण इदम् को ५४१ सूत्र से इत् होकर इत्थं बना, किं को 'क' होकर कथं बना ।

आख्यात नाम से परे तम आदि प्रत्यय होते हैं ॥ ५४४ ॥

प्रकृष्ट अर्थ में तम, तर और रूप ये प्रत्यय होते हैं ॥ ५४५ ॥

प्रकृष्टः आढ्यः, आढ्यतरः, आढ्यतमः, आढ्यरूपः । ऐसे ही वैयाकरणतमः, वैयाकरणतरः, वैयाकरणरूपः बना । सभी जगह प्रकृष्ट अर्थ में ये प्रत्यय हो जाते हैं । पचतितमः, पचतितरः । पचति के पहले के दो अव्यय पुल्लिग हैं । और पचतिरूपं, यह नपुंसकलिंग है ।

पूर्णता में किंचित् कमी न रहने से कल्प, देश्य और देशीय प्रत्यय होते हैं ॥५४६ ॥

ईषत् अपरिसमाप्तः—किंचित् कम पटु है । ईषत् अपरिसमाप्तः पटुः = पटुकल्पः, पटुदेश्यः, पटुदेशीयः । ऐसे ही पचतिकल्पः, पचतिदेश्यः, पचतिदेशीयः बना । (आचार्य से किंचित् कम = आचार्यकल्पः चन्द्रसागरः इत्यादि) ।

कुत्सित शब्द से परे पाश प्रत्यय होता है ॥ ५४७ ॥

कुत्सितः वैयाकरणः = वैयाकरणपाशः बना ।

भूतपूर्व वृत्ति वाले नाम से परे 'चरट्' प्रत्यय होता है ॥ ५४८ ॥

यहाँ प्रत्यय में टकार शब्द "षणटकारानुबंधात्" इसमें विशेषण के लिये है मतलब टकारानुबंध से जो कार्य होता है । सो यहाँ हो जायेगा । भूतपूर्वः आढ्यः—जो पहले धनी था अब नहीं है इस अर्थ में आढ्यचरः, स्त्रीलिंग में—आढ्यचरी, नपुंसक में आढ्यचरं । ऐसे ही भूतपूर्वो राजा = राजचरः राजचरी, देवचरः देवचरी इत्यादि ।

बह्वल्पार्थात्कारकाच्छस्वा मङ्गले गम्यमाने ॥ ५४९ ॥

बह्वर्थात् अल्पार्थाच्च परः शस्प्रत्ययो वा भवति मङ्गले गम्यमाने। बहून् देहि। बहुशो देहि। एवं अल्पशो, देहि अल्पं देहि। स्तोकशो देहि, स्तोकं देहि। शतशो देहि, शतं देहि। सहस्रशो देहि, सहस्रं देहि। लक्षशो याचते, लक्षं याचते।

वारस्य संख्यायाः कृत्वसुच् ॥ ५५० ॥

वारस्य संबन्धिन्याः संख्यायाः परः कृत्वसुच् प्रत्ययो भवति। उकार उच्चारणार्थः। कृत्वसुच्प्रत्ययान्ता अव्ययानि स्युः। पञ्च वारान् भुङ्क्ते पञ्चकृत्वः। एवं गणकृत्वः। कतिकृत्वः। बहुकृत्वः। एवं सप्तकृत्वो गच्छति। दशकृत्वो ददाति। शतकृत्वो याचते। सहस्रकृत्वो मन्यते इति।

द्वित्रिचतुर्भ्यः सुच् ॥ ५५१ ॥

वारस्य संबन्धिभ्यो द्वित्रिचतुर्भ्यः परः सुच् प्रत्ययो भवति। द्वौ वारौ भुङ्क्ते द्विर्भुङ्क्ते। त्रिर्भुङ्क्ते। चतुर्भङ्क्ते।

संख्याया अवयवान्ते तयट् ॥ ५५२ ॥

संख्याया अवयवान्तार्थे तयट् प्रत्ययो भवति। द्वौ अवयवौ यस्य असौ द्वितयः। त्रितयः। चतुष्टयः। पञ्चतयः। सप्ततयः।

परिमाणे तयट् ॥ ५५३ ॥

परिमाणेऽर्थे तयट् प्रत्ययो भवति। चत्वारि परिमाणानि यस्य चतुष्टयं। एवं द्वितयं त्रितयं।

द्वित्रिभ्यामयट् ॥ ५५४ ॥

बहु अर्थ से और अल्प अर्थ से परे मंगल अर्थ गम्यमान होने पर शस् प्रत्यय विकल्प से हो जाता है ॥ ५४९ ॥

बहून् देहि—बहुत देवो, उसमें बहुशः, अल्पशः। स्तोकं देहि, स्तोकशः शतशः, सहस्रशः, लक्षशः इत्यादि।

वार अर्थ में संख्या से परे 'कृत्वसुच्' प्रत्यय होता है ॥ ५५० ॥

यहाँ प्रत्यय में उकार उच्चारण के लिये है। कृत्वसुच् प्रत्यय वाले शब्द अव्यय हो जाते हैं। पञ्चवारान् भुङ्क्ते = पञ्चकृत्वः एवं गणकृत्वः, कतिकृत्वः, बहुकृत्वः, सप्तकृत्वः, दशकृत्वो ददाति दस बार देता है। शतकृत्वो याचते सौ बार माँगता है। सहस्रकृत्वो मन्यते हजार बार मानता है।

वार अर्थ में द्वि, त्रि, चतुर् से परे सुच् प्रत्यय होता है ॥ ५५१ ॥

द्वौ वारौ भुंक्ते = द्विः भुंक्ते, त्रि, चतुः बन गया।

संख्या के अवयव अर्थ के अन्त में 'तयट्' प्रत्यय होता है ॥ ५५२ ॥

द्वौ अवयवौ यस्य असौ द्वि + ओ तय, द्वितयः, त्रितयः, चतुष्टयः, पञ्चतयः, सप्ततयः इत्यादि।

परिमाण अर्थ में तयट् प्रत्यय होता है ॥ ५५३ ॥

चत्वारि परिमाणानि यस्य चतुष्टयं, द्वितयं, त्रितयं।

द्वि त्रि से परे समूह अर्थ में 'अयट्' प्रत्यय होता है ॥ ५५४ ॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

द्वित्रिशब्दाभ्यां परोऽयट् प्रत्ययो भवति समूहेऽर्थे। द्वयोः समूहः द्वयं। त्रयाणां समूहः त्रयं। उत्सेधमानं तिर्यग्मानमिति द्विविधं मानं।

मात्रट् ॥ ५५५ ॥

परिमाणे मात्रट् प्रत्ययो भवति। ऊरुःप्रमाणमस्य ऊरुमात्रमुदकं। ऊरुमात्री परिखा।

यत्तदेतद्भ्यो डावन्तु ॥ ५५६ ॥

यद् तद् एतद् इत्येतेभ्यः परो डावन्तु प्रत्ययोः भवति परिमाणेऽर्थे। उकार उच्चारणार्थः। यत्परिमाणमस्य यावान्। एवं तावान्। एतावान्।

किमो डियन्तुः ॥ ५५७ ॥

किमः शब्दात्परो डियन्तु प्रत्ययो भवति परिमाणेऽर्थे। किं परिमाणमस्य कियान्।

इदमः ॥ ५५८ ॥

इदमः परो डियन्तु प्रत्ययो भवति परिमाणेऽर्थे। इदं परिमाणमस्य इयान्।

अभूततद्भावे कृभ्वस्तिषु विकारात् च्विः ॥ ५५९ ॥

अभूततद्भावे विकारात् च्विप्रत्ययो भवति कृभ्वस्तिषु परतः।

द्वयोः समूहः द्वि + अयट् 'इवर्णावर्णयोर्लोपः' इत्यादि इवर्ण का लोप करके द्वयं, त्रयाणां समूहः त्रयं बना।

मान के दो भेद हैं। उत्सेधमान और तिर्यग्मान-अर्थात् ऊँचाई का प्रमाण और चौड़ाई का प्रमाण। मान को परिमाण भी कहते हैं।

परिमाण अर्थ में मात्रट् प्रत्यय होता है ॥ ५५५ ॥

उरू प्रमाणं अस्य उरुमात्रं—जलं, उरुमात्री—परिखा।

यत् तत् एतद् शब्द से परिमाण अर्थ में 'डावन्तु' प्रत्यय होता है ॥ ५५६ ॥

यहाँ उकार उच्चारण है। यद् डावन्तु "डानुबंधेऽन्त्यस्वरादेर्लोपः' ५१०वें सूत्र से यद् के अद् का लोप होकर यावन्त बना। ऐसे ही तावन्त् एतावन्त् हैं लिंग संज्ञा होकर सि विभक्ति आने से 'यावान् तावान् एतावान्' बन गया।

किम् शब्द से मान अर्थ में 'डियन्तु' प्रत्यय होता है ॥ ५५७ ॥

किं परिमाणं अस्य डानुबंध से इम् का लोप होकर कियान् बना।

इदं शब्द से मान अर्थ में डियन्तु प्रत्यय होता है ॥ ५५८ ॥

इदं परिमाणं अस्य यहाँ इदं को इन् होकर 'इवर्णावर्णः' इत्यादि से इकार का लोप होकर इयन्त् + सि = इयान् बना।

अभूत के तद्भाव अर्थ में कृ, भू, अस् धातु आने पर विकार अर्थ में 'च्वि' प्रत्यय होता है ॥ ५५९ ॥

जो जिस रूप नहीं है पुनः उस रूप होता है उसे अभूत तद्भाव कहते हैं और इसे ही विकार कहते हैं जैसे अशुक्लं शुक्लं करोति—जो श्वेत नहीं है उसे श्वेत करता है। यहाँ शुक्ल + अम् है विभक्ति का लोप होकर

च्वौ चावर्णस्य ईत्वम् ॥ ५६० ॥

अवर्णस्य ईत्वं भवति च्वौ परे। सर्वापहारी प्रत्ययस्य लोपः। च्विप्रत्यये परे पूर्वस्वरस्य दीर्घः शुक्लीकरोति। दीर्घीभवति। पुत्रीस्यात्। पटुस्यात्। कवीकरोति। कवीभवति। कवीस्यात्। मात्रीकरोति। मात्रीभवति। मात्रीस्यात्।

ऊर्ध्वे दघ्नट्द्वयसटौ च ॥ ५६१ ॥

ऊर्ध्ववाचिनि प्रमाणेऽर्थे दघ्नट्द्वयसटौ प्रत्ययौ भवतः। चशब्दान्मात्रट् भवति। ऊरुः प्रमाणमस्य ऊरुदघ्नं। ऊरुद्वयसं। ऊरुमात्रमुदकं।

हस्तिपुरुषादण् च ॥ ५६२ ॥

हस्तिन् पुरुष इत्येताभ्यां मानेऽर्थेऽण् भवति। चशब्दान्मात्रट् दघ्नट् द्वयसट् च भवंति। हस्ती प्रमाणमस्य हास्तिनं। हस्तिमात्रं। हस्तिदघ्नं। हस्तिद्वयसं। पुरुषः प्रमाणमस्य पौरुषं। पुरुषमात्रं। पुरुषदघ्नं। पुरुषद्वयसं। उदकविशेषार्थः।

प्रस्तुतवृत्तेर्मयट् ॥ ५६३ ॥

प्रस्तुतवृत्तेर्नाम्नः परो मयट् प्रत्ययो भवति। सुवर्णं प्रस्तुतं सुवर्णमयं। एवमन्नं प्रस्तुतमन्नमयं। भस्ममयं। यदि वा अन्नं प्रस्तुतमत्र अन्नमयः कायः। अन्नं प्रस्तुतमत्र अन्नमयं जीवनं। भस्म प्रस्तुतमत्र भस्ममयं पाकस्थानं। भस्ममयो मठः। भस्ममयी तपस्विनी। भस्ममयी तनुः।

च्वि प्रत्यय के आने पर अवर्ण को 'ई' हो जाता है ॥ ५६० ॥

एवं 'च्वि' प्रत्यय का सर्वापहारी लोप हो जाता है। च्वि प्रत्यय से परे पूर्व के अवर्ण को तो 'ई' होता है तथा पूर्व के अन्य स्वरों को दीर्घ हो जाता है। अतः शुक्लीभवति अदीर्घोदीर्घो भवति इति दीर्घी भवति, अपुत्रः पुत्रः स्यात् इति पुत्रीस्यात् इनमें अवर्ण को 'ई' हुआ है। अपटुः पटुः स्यात् इति पटूस्यात यहाँ पूर्वस्वर को दीर्घ हुआ है। ऐसे ही अकविः कविः स्यात् = कवीस्यात्, अकविं कविं करोति इति कवीकरोति। मात्रीकरोति, मात्रीभवति, मात्रीस्यात् इत्यादि रूप बन गये।

ऊर्ध्ववाची मान अर्थ में 'दघ्नट्' और 'द्वयसट्' प्रत्यय होते हैं ॥ ५६१ ॥

चकार से मात्रट् प्रत्यय भी होता है। उरु प्रमाणं अस्य उरुदघ्नं, उरुद्वयसं, उरुमात्रं बन गये। नदी, तालाब आदि के जल के मापने अर्थ में ये प्रत्यय होते हैं।

हस्तिन् और पुरुष शब्द से मान अर्थ में 'अण्' होता है ॥ ५६२ ॥

च शब्द से मात्रट् दघ्नट् द्वयसट् प्रत्यय भी होते हैं। हस्ती प्रमाणं अस्य हस्तिन् + सि विभक्ति का लोप होकर णानुबन्ध से पूर्व स्वर को वृद्धि होकर हास्तिनं, हस्तिदघ्नं, हस्तिद्वयसं, हस्तिमात्रं बन गये। ऐसे ही पुरुषः प्रमाणं अस्य है—पुरुष + सि विभक्ति का लोप होकर णानुबंध से वृद्धि होकर पौरुषं, पुरुषमात्रं, पुरुषदघ्नं, पुरुषद्वयसं बन गये। प्रमाणसूचक शब्द जल आदि के लिये हैं।

प्रस्तुतवृत्ति वाले शब्द से परे 'मयट्' प्रत्यय होता है ॥ ५६३ ॥

सुवर्णं प्रस्तुतं सुवर्ण + सि विभक्ति का लोप होकर सुवर्णमयं बना। ऐसे ही अन्नं प्रस्तुतं = अन्नमयं, भस्ममयं अथवा अन्नं प्रस्तुतं अत्र अन्नमयः कायः, अन्नं प्रस्तुतं अत्र अन्नमयं जीवनं, भस्मप्रस्तुतं अत्र भस्ममयं पाकस्थानं भस्ममयो मठः, भस्ममयी तपस्विनी, भस्ममयी तनुः। तीनों लिंगों में बन जाते हैं।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

न य्वोः पदाद्योर्वृद्धिरागमः ॥ ५६४ ॥

इह प्रतिषेधो विधिश्च गम्यते। आदिशब्दः समीपवचनः। इश्च उश्च यू तयोर्य्वोः स्वराणामाद्योः स्वरात्पूर्वयोरिकारोकारयोर्वृद्धिर्न भवति तयोरादौ वृद्धिरागमो भवति णकारानुबन्धे तद्धिते प्रत्यये परे। स्थानेन्तरतंम इति न्यायाद् यकारस्य ऐकारः वकारस्य औकारः। व्याकरणं वेत्ति अधीते वा वैयाकरणः। द्वारे नियोगो यस्येति दौवारिकः। य्वोरिति किं ? महानसे नियोगोऽस्येति माहानसिकः। इत्यादि।

सन्धिर्नाम समासश्च तद्धितश्चेति नामतः।
चतुष्कमिति तत्रोक्तमित्येतच्छर्ववर्मणा ॥ १ ॥
भावसेनत्रिविद्येन वादिपर्वतवज्रिणा।
कृतायां रूपमालायां चतुष्कं पर्यपूर्यत ॥ २ ॥

स्वर से पूर्व इकार उकार की वृद्धि नहीं होती है किंतु इन दोनों की आदि में वृद्धि का आगम होता है ॥ ५६४ ॥

यहाँ प्रतिषेध और विधि दोनों जानी जाती हैं। सूत्र में आदि शब्द समीपवाची हैं। 'य्वोः' की व्युत्पत्ति दिखाते हैं।

इश्च उश्च—इ और उ की संधि करने में "इवर्णो यमसवर्णे इत्यादि" सूत्र से इ को य् होकर उ मिलकर 'यु' बना उसका रूप चलाने से भानु शब्दवत् द्विवचन में 'यू' बना है इसी को षष्ठी का द्विवचन 'य्वोः' बन गया है। यदि 'ई' और 'उ' स्वरों की आदि में हैं ऐसे स्वर से पूर्व वाले इकार और उकार को वृद्धि नहीं होती है प्रत्युत णकारानुबंध तद्धित प्रत्यय के आने पर वृद्धि इन दोनों की आदि में वृद्धि का आगम हो जाता है। 'स्थानेऽन्तरतमः' इस न्याय से यकार को 'ऐकार' एवं वकार को 'औकार' हो जाता है। जैसे—व्याकरणं वेत्ति अधीते वा—व्याकरण को जानता है अथवा पढ़ता है। इसमें अण् प्रत्यय होकर व्याकरण के यकार के पूर्व 'ऐकार' का आगम होकर हलंत व् में मिलने से 'वैयाकरणः' बना। द्वारे नियोगो अस्य-द्वार पर रहने का है नियोग जिसका इस अर्थ में इकण् प्रत्यय होकर द्वार में वकार के पूर्व 'औ' का आगम होकर दकार में मिलने से दौवार + इकण् रहा 'इवर्णावर्णयोर्लोपः' इत्यादि से रकार के अकार का लोप लोकर लिंग संज्ञा होकर सि विभक्ति 'दौवारिकः' बन गया।

सूत्र में 'य्वोः' शब्द क्यों दिया ? महान से नियोगो अस्य रसोईघर में नियोग है इसका इस अर्थ में इकण् प्रत्यय से वृद्धि होकर 'माहानसिकः' बना है। किंतु पूर्व में इकार उकार न होने से वृद्धि का आगम नहीं हुआ है। यहाँ यह बात ध्यान में रखना चाहिये कि आगम शत्रु के समान किसी के स्थान में न होकर मित्रवत् पृथक् ही होता है। इत्यादि।

श्लोकार्थ—संधि, नाम, समास और तद्धित इस प्रकार से इन चार नामों को 'चतुष्क' कहते हैं। ऐसे इस चतुष्क को श्री शर्ववर्म आचार्य ने कहा है। अर्थात् इसमें संधि प्रकरण, लिंग प्रकरण, समास प्रकरण और तद्धित प्रकरण है अतः इस पूर्वार्ध को 'चतुष्क' कहते हैं इसमें इन चार प्रकरणों को श्री शर्ववर्म आचार्य ने पूर्ण किया है ॥ १ ॥

वादी रूपी पर्वत को चूर्ण करने में वज्र के सदृश श्री भावसेन त्रिविद्य मुनिराज ने 'रूपमाला' नाम की प्रक्रिया में इस चतुष्क प्रकरण को पूर्ण किया है ॥ २ ॥

चतुःषष्टिः कलाः स्त्रीणां ताश्चतुःसप्ततिर्नृणाम्।
आपकः प्रापकस्तासां श्रीमानृषभतीर्थकृत्॥ ३॥
तेन ब्राह्म्यै कुमार्यै च कथितं पाठहेतवे।
कालापकं तत्कौमारं नाम्ना शब्दानुशासनम्॥ ४॥
यद्वदन्त्यधियः केचित् शिखिनः स्कन्दवाहिनः।
पुच्छान्निर्गतसूत्रं स्यात्कालापकमतः परम्॥ ५॥
तन्न युक्तं यतः केकी वक्ति प्लुतस्वरानुगम्।
त्रिमात्रं च शिखी ब्रूयादिति प्रामाणिकोक्तितः॥ ६॥
न चात्र मातृकाम्नाये स्वरेषु प्लुतसंग्रहः।
तस्मात् श्रीऋषभादिष्टमित्येव प्रतिपद्यताम्॥ ७॥

इति श्रीभावसेनरचितायां कातंत्ररूपमालायां स्यादिनिरूपणं प्रथमः संदर्भः। ❑

स्त्रियों की चौंसठ कलायें होती हैं और पुरुषों की बहत्तर कलायें हैं इन सभी कलाओं को बतलाने वाले प्राप्त कराने वाले श्रीमान् तीर्थंकर ऋषभदेव भगवान् हैं॥ ३॥

उन ऋषभदेव भगवान् ने ही ब्राह्मी और कुमारी को पढ़ाने के लिए इस व्याकरण को कहा है अतएव यह शब्दानुशासन कालापक और कौमार नाम से भी प्रसिद्ध है॥ ४॥

जो कोई अज्ञानी लोग ऐसा कहते हैं कि स्कंदवाही शिखी के पुच्छ से ये सूत्र निकले हुए हैं अतः इसे 'कालापक' कहते हैं॥ ५॥

आचार्य कहते हैं कि यह बात नहीं है क्योंकि केकी—मयूर प्लुत स्वर का अनुसरण करते हुए बोलता है। वह प्लुत त्रिमात्रिक है और वह मयूर त्रिमात्रिक बोलता है यह बात प्रामाणिक है॥ ६॥

किंतु इस व्याकरण में वर्णसमुदाय में स्वरों में प्लुत का संग्रह नहीं किया है इसलिये यह व्याकरण श्रीऋषभदेव से ही उत्पन्न हुआ है यह बात इष्ट है इस प्रकार से ही स्वीकार करना चाहिये॥ ७॥

भावार्थ—तीसरे श्लोक में कहा है कि स्त्रियों की चौंसठ कलायें और पुरुषों की चौहत्तर कलायें हैं इनको आपक-प्राप्त कराने वाले भगवान् ऋषभदेव हैं। उन्हीं भगवान् ने अपनी पुत्री ब्राह्मी और सुंदरी इन दोनों को पढ़ाने के लिये यह 'शब्दानुशासन'—व्याकरण कहा है। इसीलिये इसे कला को प्राप्त कराने वाली होने से 'कालापक' और कुमारी—पुत्रियों को पढ़ाने के लिये होने से 'कौमार' ये दो नाम हैं। यहाँ पर यह कलाप व्याकरण या कालापक व्याकरण के नाम की सार्थकता दिखलाई है।

इस प्रकार श्री भावसेन विरचित कातंत्ररूपमाला में 'स्यादि' को निरूपित करने वाला प्रथम संदर्भ पूर्ण हुआ।

❑

अथ द्वितीयः संदर्भः

तिङन्तप्रकरणम्

सर्वकर्मविनिर्मुक्तं मुक्तिलक्ष्यश्च वल्लभम्।
चन्द्रप्रभजिनं नत्वा तिङन्तः कथ्यते मया॥ १॥

आचार्य श्री सुविधिसागर जी महाराज

अथ त्यादयो विभक्तयः प्रदर्श्यन्ते॥ १॥

ताश्च दशविधा भवन्ति। कास्ताः ? वर्तमाना। सप्तमी। पञ्चमी। ह्यस्तनी। अद्यतनी। परोक्षा। श्वस्तनी। आशीः। भविष्यन्ती। क्रियातिपत्तिरिति।

वर्त्तमाना॥ २॥

ति तस् अन्ति। सि थस् थ। मि वस् मस्। ते आते अन्ते। से आथे ध्वे। ए वहे महे—इमानि अष्टादश वचनानि वर्तमानसंज्ञानि भवन्ति।

सप्तमी॥ ३॥

यात् यातां युस्, यास् यातं यात, यां याव याम। ईत ईयातां ईरन्। ईथास् ईयाथां ईध्वं, ईय ईवहि ईमहि—इमानि अष्टादश वचनानि सप्तमीसंज्ञानि भवन्ति॥

पञ्चमी॥ ४॥

तु तां अन्तु, हि तं त, आनि आव आम, तां आतां अन्तां, स्व आथां ध्वं; ऐ आवहै, आमहै—इमानि वचनानि पञ्चमीसंज्ञानि भवन्ति॥

अथ द्वितीय-सन्दर्भ

तिङन्त प्रकरण

संपूर्ण कर्मों से रहित और मुक्ति लक्ष्मी के वल्लभ श्री चन्द्रप्रभ भगवान् को नमस्कार करके मैं तिङन्त प्रकरण कहता हूँ॥ १॥

अथ ति, तस् आदि विभक्तियाँ दिखलाते हैं॥ १॥

विभक्ति के दस भेद हैं वे कौन कौन हैं ? वर्तमाना, सप्तमी, पञ्चमी, ह्यस्तनी, अद्यतनी, परोक्षा, श्वस्तनी, आशीः, भविष्यंती एवं क्रियातिपत्ति ये दस भेद हैं।

वर्तमान काल में 'वर्तमाना' विभक्ति होती है॥ २॥

वर्तमाना के अठारह भेद हैं ति तस् अन्ति, सि थस् थ, मि, वस् मस्। ये नव विभक्तियाँ परस्मैपद संज्ञक हैं। ते आते अन्ते, से आथे ध्वे। ए वहे महे। ये नव विभक्तियाँ आत्मनेपद संज्ञक हैं। ये अठारह वचन 'वर्तमाना' संज्ञक हैं। इसे अन्य व्याकरणों में 'लट्' संज्ञा है।

सप्तमी विभक्ति होती है॥ ३॥

यात् यातां युस्, यास् यातं यात, यां याव याम। ईत ईयातां ईरन्, ईथस् ईयाथां ईध्वम्, ईय ईवहि ईमहि। ये अठारह वचन 'सप्तमी' संज्ञक हैं। प्रारंभ के नववचन परस्मैपदसंज्ञक एवं अंत में नव वचन आत्मनेपद संज्ञक हैं। (इसको विधिलिङ् कहते हैं।)

पञ्चमी विभक्ति होती है॥ ४॥

तु तां अन्तु, हि तं त, तानि आव आम। तां आतां अन्तां, स्व आथां ध्वं, ऐ आवहै आमहै। ये अठारह वचन पञ्चमी संज्ञक होते हैं॥ (इसे लोट् कहते हैं।)

ह्यस्तनी ॥ ५ ॥

दि तां अन्, सि तं त, अम् व म, त आतां अन्त, थास् आथां ध्वं, इट वहि महि—इमानि वचनानि ह्यस्तनीसंज्ञानि भवन्ति ॥

एवमेवाद्यतनी ॥ ६ ॥

एतान्येवाद्यतनेऽर्थेऽभिधेयेऽद्यतनीसंज्ञानि भवन्ति ॥

परोक्षा ॥ ७ ॥

अट् अतुस् उस्, थल् अथुस् अ अट् व म, ए आते इरे, से आथे ध्वे, ए वहे महे—इमानि वचनानि परोक्षसंज्ञानि भवन्ति ॥

श्वस्तनी ॥ ८ ॥

ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस्, ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे—इमानि वचनानि श्वस्तनीसंज्ञानि भवन्ति ॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

आशी: ॥ ९ ॥

यात् यास्तां यासुस्, यास् यास्तं यास्त, यासं यास्व यास्म, सीष्ट सीयास्तां सीरन्, सीष्ठास् सीयास्थां सीध्वं, सीय सीवहि सीमहि—इमानि वचनानि आशी:संज्ञानि भवन्ति ॥

स्यसहितानि त्यादीनि भविष्यन्ती ॥ १० ॥

स्यति स्यतस् स्यन्ति, स्यसि स्यथस् स्यथ, स्यामि स्यावस् स्यामस्, स्यते स्येते स्यन्ते, स्यसे स्येथे स्यध्वे, स्ये स्यावहे स्यामहे—स्येन सहितानि त्यादीनि वचनानि भविष्यन्तीसंज्ञानि भवन्ति ॥

बीते हुए कल दिन के लिये 'ह्यस्तनी' विभक्ति होती है ॥ ५ ॥

दि तां अन्, सि तं त, अम् व म। त आतां अन्त, थास् आथां ध्वं, इट् वहि महि। ये अठारह वचन ह्यस्तनी संज्ञक हैं। (इसे लङ् भी कहते हैं।)

आज के बीते हुये काल को 'अद्यतनी' कहते हैं ॥ ६ ॥

ये ही उपर्युक्त अठारह विभक्तियाँ अद्यतन के अर्थ में आकर अद्यतनी संज्ञक कहलाती हैं। (इसे 'लुङ्' कहते हैं)

अत्यर्थ[1] भूतकाल में 'परोक्षा' विभक्ति होती है ॥ ७ ॥

अट् अतुस् उस्, थल् अथुस् अ, अट् व म। ए आते इरे, से आथे ध्वे, ए वहे महे। ये अठारह वचन परोक्षा संज्ञक होते हैं। (इसे 'लिट्' कहते हैं।)

आने वाले कल के लिये 'श्वस्तनी' विभक्ति होती है ॥ ८ ॥

ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस्। ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे। ये अठारह वचन श्वस्तनी संज्ञक होते हैं। (यह 'लुट्' है)

आशीर्वचन में 'आशी:' विभक्ति होती है ॥ ९ ॥

यात् यास्तां, यासुस्, यास् यास्तं, यास्त, यासम् यास्व यास्म। सीष्ट सीयास्तां सीरन्, सीष्ठास् सीयास्थां, सीध्वं, सीय सीवहि सीमहि। ये अठारह वचन आशी: संज्ञक हैं। (यह आशी: 'लिङ्' है)

भविष्यत् अर्थ में 'स्य' सहित ति आदि विभक्तियाँ भविष्यन्ती कहलाती हैं ॥ १० ॥

---

१. अत्यर्थभूत काल उसे कहते हैं जो क्रिया अपने जीवन में न बीती हो केवल सुनी जाती हो जैसे भ० शान्तिनाथ हुए थे।

द्यादीनि क्रियातिपत्तिः ॥ ११ ॥

स्यत् स्यतां स्यन्, स्यस् स्यतं स्यत, स्यं स्याव स्याम, स्यत स्येतां स्यन्त, स्यथास् स्येथां स्यध्वं, स्ये स्यावहि स्यामहि-स्येन सहितानि द्यादीनि क्रियातिपत्तिसंज्ञानि भवन्ति ॥

षडाद्याः सार्वधातुकम् ॥ १२ ॥

षण्णां विभक्तीनां आद्याश्चतस्रो विभक्तयः सार्वधातुकसंज्ञा भवन्ति ॥

अथ परस्मैपदानि ॥ १३ ॥

सर्वविभक्तीनां आदौ नववचनानि परस्मैपदसंज्ञानि भवन्ति । उत्तरत्र नवग्रहणात्परग्रहणाच्चेह पूर्वा नवेति अवगन्तव्यं । ति तस् अन्ति । सि थस् थ । मि वस् मस् । एवं सर्वविभक्तिषु ।

नव पराण्यात्मने ॥ १४ ॥

सर्वविभक्तीनां पराणि नववचनानि आत्मनेपदसंज्ञानि भवन्ति । ते आते अन्ते । से आथे ध्वे । ए वहे महे । एवं सर्वविभक्तिषु ।

त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १५ ॥

परस्मैपदानामात्मनेपदानां च त्रीणि त्रीणि वचनानि प्रथममध्यमोत्तमपुरुषसंज्ञानि भवन्ति । ति तस्

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

स्यति स्यतस् स्यन्ति, स्यसि स्यथस् स्यथ, स्यामि स्यावस् स्यामस् । स्यते स्येते स्यन्ते, स्यसे स्येथे स्यध्वे, स्ये स्यावहे स्यामहे ।

स्य सहित ति आदि अठारह विभक्तियाँ भविष्यत् संज्ञक होती हैं (यह 'लृट्' है)

'स्य' सहित 'दि' आदि विभक्तियाँ 'क्रियातिपत्ति' होती हैं ॥ ११ ॥

दि आदि विभक्तियाँ ह्यस्तनी में हैं उन्हीं में पूर्व में 'ष्य' जोड़ देने से क्रियातिपत्ति में बन जाती हैं । स्यत् स्यतां स्यन्, स्यस् स्यतं स्यत, स्यं स्याव स्याम । स्यत स्येतां स्यन्त, स्यथास् स्येथां स्यध्वं, स्ये स्यावहि स्यामहि । ये अठारह विभक्तियाँ क्रियातिपत्ति संज्ञक हैं (इसे 'लृङ्' कहते हैं)

पूर्व की चार विभक्तियाँ 'सार्वधातुक' हैं ॥ १२ ॥

छह विभक्तियों के आदि की चार विभक्तियाँ सार्वधातुक संज्ञक हैं । उनके नाम—वर्तमाना, सप्तमी, पञ्चमी ह्यस्तनी ये चार हैं ।

आदि के नव नव वचन परस्मैपद संज्ञक होते हैं ॥ १३ ॥

सभी विभक्तियों में आदि के नव-नव वचन परस्मैपद संज्ञक होते हैं ।

अगले सूत्र में 'नव' शब्द और 'पर' शब्द का ग्रहण है अतः यहाँ 'पूर्व की नव' ऐसा समझ लेना चाहिये । जैसे—ति तस् अंति, सि, थस् थ, मि वस् मस् । ऐसे ही सभी विभक्तियों में समझ लेना ।

आगे की नव 'आत्मनेपद' संज्ञक हैं ॥ १४ ॥

सभी विभक्तियों में अगली-अगली नव विभक्तियाँ 'आत्मनेपद' संज्ञक हैं । जैसे—ते आते अन्ते, से आथे ध्वे, ए वहे महे । ऐसे ही सभी विभक्तियों में समझना चाहिये ।

तीन-तीन वचन प्रथम, मध्यम, उत्तम होते हैं ॥ १५ ॥

परस्मैपद और आत्मनेपद की विभक्तियों में तीन-तीन वचन प्रथम पुरुष, मध्यम पुरुष, उत्तम पुरुष संज्ञक होते हैं । जैसे—ति तस् अन्ति ये प्रथम पुरुष हैं । सि थस् थ ये मध्यम पुरुष हैं । मि वस् मस् ये उत्तम पुरुष संज्ञक हैं । ते आते अन्ते ये प्रथम पुरुष हैं । ये आथे ध्वे ये मध्यम हैं । ऐ वहे महे ये उत्तम पुरुष हैं ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

अन्ति इति प्रथमपुरुषः। सि थस् थ इति मध्यमपुरुषः। मि वस् मस् इत्युत्तमपुरुषः। ते आते अन्ते इति प्रथमपुरुषः। से आथे ध्वे इति मध्यमपुरुषः। ए वहे महे इत्युत्तमपुरुषः। एवं सर्वविभक्तिषु। एता विभक्तयो धातोर्योज्यन्ते। को धातुः ?

क्रियाभावो धातुः॥ १६॥

यः शब्दः क्रियां भावयति संपादयति स धातुसंज्ञो भवति। इति भ्वादीनां धातुसंज्ञायां। भू सत्तायां। भू इति स्थिते।

प्रत्ययः परः॥ १७॥

प्रतीयते अनेनार्थः स प्रत्ययः। विकसितार्थः इत्यर्थः। प्रकृतेः परः प्रत्ययो भवति। इति सर्वत्यादिप्रसङ्गः।

काले॥ १८॥

वर्त्तमानातीतभविष्यल्लक्षणः कालः। काल इत्यधिकृतं भवति।

सम्प्रति वर्तमाना॥ १९॥

प्रारब्धापरिसमाप्तक्रियालक्षणः सम्प्रतीत्युच्यते। सम्प्रतिकाले वर्तमाना विभक्तिर्भवति। तत्रापि युगपदष्टादशवचनप्राप्तौ—

शेषात्कर्त्तरि परस्मैपदम्॥ २०॥

इसी प्रकार से सभी विभक्तियों में समझ लेना चाहिये।

ये सभी विभक्तियां धातु में लगाई जाती हैं। धातु किसे कहते हैं ?

क्रिया भाव को धातु कहते हैं॥ १६॥

जो शब्द क्रिया को भावित (क्रिया का वाचक या बोध कराने वाला) करता है संपादित करता है वह धातुसंज्ञक है। इस प्रकार से भू आदि शब्दों की धातु संज्ञा हो गई। भू सत्ता अर्थ में है—सत्ता का अर्थ है व्यवहार द्वारा भवन क्रिया—'भू' धातु स्थित है।

धातु से परे प्रत्यय होते हैं॥ १७॥

जिससे अर्थ प्रतीति में आता है उसे प्रत्यय कहते हैं। अर्थात् जो अर्थ को विकसित करे वह प्रत्यय है। प्रकृति से परे प्रत्यय होता है। इस नियम से सभी ति, तस् आदि विभक्तियाँ एक साथ आ गईं।

काल अर्थ में विभक्तियाँ होती हैं॥१८॥

काल के तीन भेद हैं—वर्तमान, भूत और भविष्यत्। 'काले' इस सूत्र में यहाँ काल का प्रकरण अधिकार में है।

संप्रति अर्थ में 'वर्तमाना' विभक्ति होती है॥ १९॥

जिसका प्रारंभ हो गया है और समाप्ति नहीं हुई है उस क्रिया का जो लक्षण है उस काल को 'संप्रति' कहते हैं। यही वर्तमान काल है। संप्रतिकाल के अर्थ में 'वर्तमाना' विभक्ति होती है। इस वर्तमाना में भी एक साथ अठारह विभक्तियाँ आ गईं। तब—

शेष से कर्ता में परस्मैपद होता है॥ २०॥

शेषाद्वक्ष्यमाणकारणरहिताद्धातोः कर्त्तरि परस्मैपदं भवति। तत्रापि—

नाम्नि प्रयुज्यमानेऽपि प्रथमः ॥ २१ ॥

नाम्नि प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि प्रथमपुरुषो भवति। तत्राप्येकत्वविवक्षायां प्रथमैकवचनं ति।

अन् विकरणः कर्त्तरि ॥ २२ ॥

धातोर्विकरणसंज्ञकोऽन् भवति कर्त्तरि विहिते सार्वधातुके परे।

अनि च विकरणे ॥ २३ ॥

नाम्यन्तस्य लघुनाम्युपधायाश्च गुणो भवत्यन्विकरणे परे। को गुणः ?

अर् पूर्वे द्वे च सन्ध्यक्षरे गुणः ॥ २४ ॥

र्यूणां (ऋवर्णइवर्णउवर्णानां) अर् पूर्वे द्वे च सन्ध्यक्षरे गुणो भवति। इत्युवर्णस्य ओकारो गुणः। सन्धिः। स भवति। तथैव द्वित्वविवक्षायां प्रथमपुरुषद्विवचनं तस्। भू तस् इति स्थिते—

रसकारयोर्विसृष्टः ॥ २५ ॥

शेष—वक्ष्यमाण कारणों से रहित धातु से कर्ता अर्थ में परस्मैपद होता है। उसमें भी एक साथ नव वचनों के आने पर—

नाम के प्रयोग करने पर भी प्रथम पुरुष होता है ॥ २१ ॥

नाम के प्रयोग करने और नहीं करने पर भी प्रथम पुरुष होता है। उसमें एकवचन की विवक्षा होने पर प्रथम पुरुष का एकवचन 'ति' है। अतः भू + ति है।

कर्ता में 'अन्' विकरण होता है ॥ २२ ॥

कर्ता में कहे गये सार्वधातुक विभक्ति के आने पर धातु से विकरण संज्ञक 'अन्' होता है।

अन् विकरण के आने पर गुण होता है ॥ २३ ॥

जिसके अन्त में नामि (इ उ ऋ) हो तथा उपधा में नामि (इ उ ऋ) हो ऐसी धातु को अन् विकरण के आने पर गुण हो जाता है।

गुण किसे कहते हैं ?

अर् और पूर्व के दो संध्यक्षर गुणसंज्ञक हैं ॥ २४ ॥

ऋवर्ण को 'अर्' इवर्ण को 'ए' उवर्ण को 'ओ' होना गुण कहलाता है। ऋवर्ण, इवर्ण, उवर्ण इनकी संधि करने पर ऋ + इ 'रमृवर्णः" सूत्र ऋ को र् होकर रि बना। पुनः रि + उ है, 'इवर्णो यमसवर्णे न च परो लोप्यः' सूत्र से र् म् उ बना 'व्यंजनमस्वरं परवर्णं नयेत' सूत्र से 'र्यु' बन गया इसका रूप भानु के समान चलाने से 'र्यूणां' पद वृत्ति में है जिसका अर्थ है, ऋवर्ण, इवर्ण और उवर्ण को क्रम से अर् और पूर्व के दो संध्यक्षर—ए, ओ, गुण होता है। इस नियम से यहाँ भू को ओ गुण होकर 'ओ अ ति है' ओ अव् सूत्र से संधि होकर 'भवति' बन गया। इसके साथ प्रथम पुरुष के 'सः' शब्द का प्रयोग करने से वाक्य स्पष्ट हो जाता है। स भवति—वह होता है। उसी प्रकार से द्विवचन की विवक्षा में प्रथम पुरुष का द्विवचन 'तस्' विभक्ति है भू तस् इति स्थित है।

'अन् विकरणः कर्तरि' से अन् विकरण करके 'अनिच विकरणे' सूत्र से गुण होकर 'भवतस्' बना।

रकार सकार को विसृष्ट (विसर्ग) हो जाता है ॥ २५ ॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

पदान्ते रेफसकारयोर्विसृष्टो भवति। तौ भवतः। तथैव बहुत्व विवक्षायां प्रथमपुरुषबहुवचनं अन्ति। भू अन्ति इति स्थिते—

असन्ध्यक्षरयोरस्य तौ तल्लोपश्च ॥ २६ ॥

इह धातुप्रस्तावे अकारसन्ध्यक्षरयोः परतोऽकारस्य अकारसन्ध्यक्षरौ भवतस्तत्परयोर्लोपो भवति। ते भवन्ति।

युष्मदि मध्यमः ॥ २७ ॥

युष्मदि प्रयुज्यमानेऽप्रयुज्यमानेऽपि मध्यमः पुरुषो भवति। त्वं भवसि। युवां भवथः यूयं भवथ।

अस्मद्युत्तमः ॥ २८ ॥

अस्मदि प्रयुज्यमानेऽप्रयुज्यमानेऽपि उत्तमः पुरुषो भवति।

अस्य वमोर्दीर्घः ॥ २९ ॥

अस्य दीर्घो भवति वमोः परतः। अहं भवामि। आवां भवावः। वयं भवामः। अप्रयुज्यमानेऽपि। भवति, भवतः, भवन्ति। भवसि, भवथः, भवथ। भवामि, भवावः, भवामः। भावकर्मविवक्षायां—

आत्मनेपदानि भावकर्मणोः ॥ ३० ॥

पद के अंत में रकार और सकार का विसर्ग हो जाता है अतः 'भवतः' बना। तौ भवतः—वे दोनों होते हैं। उसी प्रकार से बहुवचन की विवक्षा में प्रथमपुरुष को बहुवचन 'अन्ति' है। भू अन्ति यह स्थित है।

पूर्वोक्त अन् विकरण और गुण करके 'भव् अ अन्ति' है।

अकार और संध्यक्षर के परे अकार है उसका लोप हो जाता है ॥ २६ ॥

यहाँ धातु के प्रस्ताव में अकार और संध्यक्षर के परे रहने पर अकार को अकार और संध्यक्षर हो जाते हैं और इनके परे अकार का लोप हो जाता है। अतः 'भवन्ति' बना। ते भवन्ति—वे होते हैं।

युष्मद् में मध्यम पुरुष होता है ॥ २७ ॥

युष्मद् का प्रयोग करने पर अथवा नहीं प्रयोग करने पर भी मध्यम पुरुष होता है। उपर्युक्त विधि के अनुसार सि थस् थ विभक्ति में—त्वं भवसि—तू होता है। युवां भवथः—तुम दोनों होते हो। यूयं भवथ—तुम सब होते हो।

अस्मद् में उत्तम पुरुष होता है ॥ २८ ॥

अस्मद् का प्रयोग करने पर या नहीं प्रयोग करने पर भी उत्तम पुरुष होता है। भू मि है अन् विकरण् गुण करके 'भव् अ मि' रहा।

व, म के आने पर अकार को दीर्घ हो जाता है ॥ २९ ॥

अतः 'भवामि' बना। अहं भवामि—मैं होता हूँ। आवां भवावः—हम दोनों होते हैं। वयं भवामः—हम सब होते हैं। प्रथम, मध्यम, उत्तम पुरुष के प्रयोग नहीं करने पर भी अर्थ स्पष्ट रहता है। यथा—भवति भवतः भवन्ति, भवसि भवथः भवथ, भवामि भवावः भवामः।

क्रिया में भाव और कर्म की विवक्षा के होने पर भाव, कर्म में 'आत्मनेपद' होता है ॥ ३० ॥

धातोरात्मनेपदानि भवन्ति भावकर्मणोरर्थयोः। अकर्मकाद्धातोर्भवि, सकर्मकात्कर्मणि च।

लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम्।
[1]स्वप्नक्रीडारुचिदीप्त्यर्था धातव एते कर्मविमुक्ताः॥ १॥
क्रियापदं कर्तृपदेन युक्तं व्यपेक्षते यत्र किमित्यपेक्षां।
सकर्मकं तं सुधियो वदन्ति शेषस्ततो धातुरकर्मकः स्यात्॥ २॥

को भावः ?

सन्मात्रं भावलिङ्गं स्यादसंपृक्तं तु कारकैः।
धात्वर्थः केवलः शुद्धोः भाव इत्यभिधीयते॥ १॥

तत्र प्रथमैकवचनमेव। किं कर्म ? क्रियाविषयं कर्म। तत्र द्विवचनबहुवचनमपि। मध्यमोत्तमपुरुषावपि।

सार्वधातुके यण्॥ ३१॥

धातोर्यण् भवति भावकर्मणोर्विहिते सार्वधातुके परे।

नाम्यन्तयोर्धातुविकरणयोर्गुणः॥ ३२॥

मार्गदर्शक — आचार्य श्री सुविधिसागर जी महाराज

भाव और कर्म के अर्थ में धातु से आत्मनेपद हो जाता है। अकर्मक धातु से भाव में एवं सकर्मक धातु से कर्म में प्रयोग होता है।

अकर्मक धातु कौन हैं ?

श्लोकार्थ—लज्जा, सत्ता, स्थिति, जागरण, वृद्धि, नाश, भय, जीवन, मरण, शयन, क्रीड़ा, रुचि, क्रांति इन अर्थ वाले धातु अकर्मक होते हैं। अर्थात् इनके प्रयोग में कर्म कारक नहीं रहता है॥ १॥

सकर्मक धातु कौन हैं ?

जहाँ कर्त्ता पद से युक्त क्रिया पद, "क्या" इसकी अपेक्षा रखता है, विद्वान् जन उस धातु को सकर्मक कहते हैं। बाकी शेष धातुएँ अकर्मक हैं॥ २॥

भाव किसे कहते हैं ?

श्लोकार्थ—जो सन्मात्र है स्वरूपतः है भाव लिंग है कारकों के सम्पर्क से रहित है ऐसा केवल, शुद्ध धातु का अर्थ 'भाव' कहलाता है॥ १॥

इस भाव में प्रथम पुरुष का एकवचन ही होता है।

कर्म किसे कहते हैं ?

क्रिया के विषय को कर्म कहते हैं। कर्म में द्विवचन बहुवचन भी होते हैं। एवं मध्यम, उत्तम पुरुष भी होते हैं। यहाँ भाव अर्थ में विवक्षित भू धातु से आत्मनेपद के प्रथम पुरुष का एकवचन 'ते' विभक्ति है। 'भू ते' है।

सार्वधातुक में 'यण्' होता है॥ ३१॥

भाव, कर्म में कहे गये सार्वधातुक के आने पर धातु से 'यण्' विकरण होता है। णकार का अनुबंध हो जाता है।

नाम्यंत, धातु और विकरण को गुण हो जाता है॥ ३२॥

---

१. शयन इति पाठांतरं।

नाम्यन्तयोर्धातुविकरणयोर्गुणो भवति। इति गुणे प्राप्ते—

न णकारानुबन्धचेक्रीयतयोः ॥ ३३ ॥

नाम्यन्तानां नाम्युपधानां च गुणो न भवति णकारानुबन्धचेक्रीयतयोः परतः। भावे—भूयते। कर्मणि—

प्रादय उपसर्गाः क्रियायोगे ॥ ३४ ॥

प्रादयः क्रियायोगे उपसर्गा भवन्ति। के ते प्रादयः ?

प्रपराऽपसमन्ववनिर्दुरभिव्यधिसूदतिनिप्रतिपर्यपयः।
उपआङितिविंशतिरेष सखे उपसर्गगणः कथितः कविभिः ॥ १ ॥

अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति। अनुभूयते।

आते आथे इति च ॥ ३५ ॥

अकारात्परयोराते आथे इत्येतयोरादिरिर्भवति। अनुभूयेते। अनुभूयन्ते। अनुभूयसे अनुभूयेथे अनुभूयध्वे। अनुभूये अनुभूयावहे अनुभूयामहे। एतं एर्धातूनां। एधङ्वृद्धौ।

कर्त्तरि रुचादिङनुबन्धेभ्यः ॥ ३६ ॥

इस सूत्र में 'भू' को गुण प्राप्त था किन्तु—

णकारानुबंध और चेक्रीयत (यङन्त) प्रकरण के आने पर गुण नहीं होता है ॥ ३३ ॥

णानुबंध और चेक्रीय के आने पर नाम्यंत और नामि उपधा वाले धातु को गुण नहीं होता है। अतः भाव में—'भूयते' बन गया।

कर्म की विवक्षा में—

क्रिया के योग में 'प्र' आदि उपसर्ग होते हैं ॥ ३४ ॥

वे प्रादि उपसर्ग कौन हैं ?

श्लोकार्थ—प्र, पर, अप, सं, अनु, अव, निर्, दुर्, अभि, वि, अधि, सु, उत्, अति, नि, प्रति, परि, अपि, उप, आङ्, हे सखे ! इस प्रकार से कवियों ने ये उपसर्गगण बीस बतलाये हैं ॥ १ ॥

अकर्मक भी धातु उपसर्ग सहित होकर सकर्मक बन जाते हैं। अकर्मक भू धातु में 'अनु' उपसर्ग लगाने से उसका अर्थ अनुभव करना हो गया है अतः 'अनुभूयते' बन गया। कर्म में सभी वचन और प्रथम, मध्यम, उत्तम पुरुष होने से आत्मने पद की सभी विभक्तियाँ आयेंगी। अतः—'अनुभूय आते' हैं।

अकार से परे आते, आथे की आदि को 'इ' हो जाता है ॥ ३५ ॥

अनुभूय + इते = अनुभूयेते, अनुभूय + अन्ते सूत्र २६ से अकार का लोप होकर 'अनुभूयन्ते' बना। अनुभूय + ए है। सूत्र २६ से एक अकार का लोप होकर 'अनुभूये' बना। अनुभूय + वहे, हे, सूत्र २९ से व, म के आने पर अकार को दीर्घ हो जाता है अतः 'अनुभूयावहे' 'अनुभूयामहे'। बना।

अनुभूयते	अनुभूयेते	अनुभूयन्ते
अनुभूयसे	अनुभूयेथे	अनुभूयध्वे
अनुभूये	अनुभूयावहे	अनुभूयामहे

ऐसे ही सभी धातुओं के रूप चलेंगे।

एधङ् धातु वृद्धि अर्थ में है।

रुचादिभ्यो ञानुबन्धेभ्यश्च कर्त्तर्यात्मनेपदानि भवन्ति। एधते एधेते एधन्ते। एधसे एधेथे एधध्वे। एधे एधावहे एधामहे। भावे—एध्यते। डुपचषुञ् पाके। अकारः समाहारानुबन्धे।

इन्व्यजादेरुभयम् ॥ ३७ ॥

इन्नन्तात् ञानुबन्धाद्यजादेश्च कर्त्तर्युभयपदानि भवन्ति। पचति पचतः पचन्ति। पचसि पचथः पचथ। पचामि पचावः पचामः। पचते पचेते पचन्ते। पचसे पचेथे पचध्वे। पचे पचावहे पचामहे। भावे—पच्यते। अविवक्षितकर्मकोऽकर्मको भवति। कर्मणि—पच्यते पच्येते पच्यन्ते। पच्यसे। पच्येथे पच्यध्वे। पच्ये पच्यावहे पच्यामहे।

स्मेनातीते ॥ ३८ ॥

स्मेन संयोगेऽतीते काले वर्त्तमाना विभक्तिर्भवति। भवति स्म। एधते स्म। पचति स्म। पचते स्म इत्यादि।

रुचादि और ञानुबंध वाली धातुएँ कर्त्ता में आत्मने पद होती हैं ॥ ३६ ॥

एध् ते है 'अन् विकरणः कर्तरि' २२वें सूत्र से अन् विकरण होकर 'एधते' बना। ऐसे ही 'एध् अ आते' हैं 'आते आथे इति च' सूत्र से आ को 'इ' होकर संधि होकर 'एधेते' 'एध् अ अन्ते' है सूत्र २६ से एक अकार का लोप होकर 'एधन्ते' बना।

एध् अ ए २६ सूत्र से अकार का लोप होकर 'एधे' बना।

एध् अ वहे और महे है। सूत्र २९ वें से अकार को दीर्घ होकर 'एधावहे' 'एधामहे' बना।

प्रयोग—

एधते	एधेते	एधन्ते
एधसे	एधेथे	एधध्वे
एधे	एधावहे	एधामहे

भाव में—यण विकरण से 'एध्यते' बना है। यह धातु अकर्मक है अतः कर्म में रूप नहीं बने हैं।

डुपचषुञ् धातु पकाने अर्थ में है। डुषुञ् अनुबंध है, अकार समाहार अनुबंध में है।

इन्नंत, आनुबंध, यजादि धातु कर्ता में उभयपदी होते हैं ॥ ३७ ॥

पच् धातु में ञ् का अनुबंध होता है अतः इसके रूप परस्मैपद और आत्मनेपद दोनों में चलेंगे। पूर्वोक्त अन् विकरण और अन्ति और ए आने पर अकार का लोप और व, म के आने पर अकार को *दीर्घ करके उभयपद में रूप बना लीजिये। यथा—*

पचति	पचतः	पचन्ति	पचते	पचेते	पचन्ते
पचसि	पचथः	पचथ	पचसे	पचेथे	पचध्वे
पचामि	पचावः	पचामः	पचे	पचावहे	पचामहे

भाव में—पच्यते। यद्यपि पच् धातु सकर्मक है तो भी कर्म की विवक्षा न हो तो अकर्मक होकर भाव में प्रत्यय होता है।

कर्मणिप्रयोग में—

पच्यते, पच्येते पच्यन्ते। पच्यसे पच्येथे, पच्यध्वे। पच्ये, पच्यावहे, पच्यामहे।

स्म के साथ अतीत काल हो जाता है ॥३८ ॥

'स्म' शब्द के प्रयोग के साथ 'वर्तमाना' विभक्ति अतीत काल के अर्थ में हो जाती है।

विध्यादिषु सप्तमी च ॥ ३९ ॥

विध्यादिषु वर्त्तमानाद्धातोः सप्तमी पञ्चमी च भवति। के विध्यादयः ? विधिनिमन्त्रणामन्त्रणाध्येषणसम्प्रश्नको विधिः। विधिः कर्त्तव्योपदेशः। अथवा अज्ञातज्ञापको विधिः। देवान् यजेत। यजतु। यजतां। होमं जुहुयात्। जुहोतु। यत्र क्रियमाणे प्रत्यवायोऽस्ति तन्निमन्त्रणं। इह श्राद्धे न भुञ्जीत। न भुङ्क्तां भवान्। यत्र क्रियमाणे प्रत्यवायो नास्ति तदामन्त्रणं। इहासीत। आस्तां भवान्। सत्कारपूर्वको व्यापारोऽध्येषणं। यूयं माणवकमध्यापयेध्वम्। कर्त्तव्यालोचना सम्प्रश्नः। अहो किं व्याकरणमधियीय उत वेदमधियीय। अहो किं नाटकमध्ययै आहोस्विदलङ्कारमध्ययै। याच्ञा प्रार्थना। भिक्षां मे दद्याः। क्षेत्रं मे दधीथाः। कन्यां मे देहि। मम सुवर्णं दत्स्व। आदिशब्दात्प्रेषणविज्ञापनाज्ञापनादयः। क्षीणं प्रति कर्मप्रतिपादनं प्रेषणं। गृहीतवेतनस्त्वं। कर्माणि कुर्याः। कुर्वीथाः। कुरु। कुरुष्व। अधिकं प्रति स्वकार्यसूचनं विज्ञापनं। अहो देव इदं कार्यमवधारयेः। अवधारय। सर्वेषां स्वस्वकार्यनियमप्रतिपादनमाज्ञापनं। विप्रा एवं प्रवर्तेरन् प्रवर्तन्ताम्। यतय एवं चरेयुः।

याशब्दस्य च सप्तम्याः ॥ ४० ॥

विधि आदि में सप्तमी और पञ्चमी होती है ॥३९ ॥

मार्गदर्शक – आचार्य सुदर्शन शास्त्री

विधि आदि अर्थों में वर्तमान धातु से 'सप्तमी' और 'पञ्चमी' विभक्तियाँ होती हैं। विधि आदि कौन-कौन हैं ? विधि, निमन्त्रण, आमन्त्रण, अध्येषण और संप्रश्नक ये विधि शब्द से कहे जाते हैं। विधि—कर्तव्य का उपदेश देना अथवा अज्ञात को बतलाना। जैसे—देवान् यजेत, यजतु, यजतां—देवों की पूजा करना चाहिये। होमं जुहुयात्, जुहोतु—होम करना चाहिये।

जिसके करने में प्रत्यवाय (बाधा) है वह निमन्त्रण है।

जैसे—इह श्राद्धे न भुंजीत, न भुङ्क्तां भवान्—इस श्राद्ध में आपको भोजन नहीं करना चाहिए। भोजन नहीं करिये। जिसके करने में प्रत्यवाय नहीं है वह आमन्त्रण है।

जैसे—इह आसीत्, आस्तां भवान्—यहाँ आप बैठिये, ठहरिये। सत्कार पूर्वक व्यापार 'अध्येषण' कहलाता है।

व्यंजनादि अगुण सार्वधातुक के आने पर दोनों ही अभ्यस्त बने हुए हैं जहाँ पर ऐसे दा वर्जित आकार को 'ईकार' हो जाता है ॥१५७॥

भृञ्हाङ्माङमित् १५६ सूत्र से अभ्यास को इकार होकर 'हो जः' सूत्र से जकार होकर जिहीते।

अभ्यस्तानामाकारस्य ॥१५८ ॥

अभ्यस्तानामाकारस्य लोपो भवत्यगुणे सार्वधातुके परे। जिहाते जिहते। जिहीषे जिहाथे जिहीध्वे। जिहे जिहीवहे जिहीमहे॥ जिहीत जिहीयातां जिहीरन्। जिहीतां जिहातां जिहतां। जिहीष्व जिहाथां जिहीध्वं। जिहै जिहावहै जिहामहै। अजिहीत अजिहातां अजिहत॥ एवं माङ् माने शब्दे च। मिमीते मिमाते मिमते। मिमीषे मिमाथे मिमीध्वे। मिमे मिमीवहे मिमीमहे। डुधाञ् डुभृञ् धारणपोषणयोः।

द्वितीयचतुर्थयोः प्रथमतृतीयौ ॥१५९ ॥

अभ्यासस्य द्वितीयचतुर्थयोः प्रथमतृतीयौ भवतः। बिभर्त्ति बिभृतः बिभ्रति। बिभर्षि बिभृथः बिभृथ। बिभर्मि बिभृवः बिभृमः। बिभृते बिभ्राते बिभ्रते। बिभृषे बिभ्राथे बिभृध्वे। बिभ्रे बिभृवहे बिभृमहे।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

डुधाञ्ह्रस्वः ॥१६० ॥

अभ्यासस्य ह्रस्वो भवति। दधाति।

तथोश्च दधातेः ॥१६१ ॥

दधातेर्धातोः आदेस्तृतीयचतुर्थत्वं भवति तथोः सेध्वोश्चागुणे परतः। धत्तः दधति। दधासि धत्थः धत्थ। दधामि दध्वः दध्मः। धत्ते दधाते दधते। धत्से दधाथे धद्ध्वे। दधे दध्वहे दध्महे। भावकर्मणोश्च।

अगुण सार्वधातुक आने पर अभ्यस्त के आकार का लोप हो जाता है ॥१५८ ॥

जिहाते। जिहते। 'आत्मने चानकारात्' सूत्र ७९ से नकार का लोप हो गया है। जिहीत। जिहीतां। अजिहीत।

माङ् धातु माप करने और शब्द करने अर्थ में है। मा मा ते १५६ से अभ्यास को 'इ' १५७ से अभ्यस्त को 'ई' होकर मिमीते बना। डुधाञ् और डुभृञ् धातु धारण पोषण अर्थ में हैं।

भृ भृ ति १५६ से अभ्यास को इकार होकर भि अगले को गुण होकर भिभर ति है।

अभ्यास के द्वितीय को प्रथम एवं चतुर्थ को तृतीय अक्षर हो जाता है ॥१५९ ॥

बिभर्त्ति। बिभृतः। बिभ्रति 'द्वयमभ्यस्तं' से अभ्यस्त संज्ञा करके 'लोपोऽभ्यस्तादन्तिनः' १५४ से नकार का लोप गया अतः 'रमृवर्णः' से संधि हो गई है। आत्मने पद में बिभृते।

धा धा ति 'द्वितीय चतुर्थयोः प्रथमतृतीयौ' १५९ सूत्र से पूर्व को तृतीय अक्षर होकर—दाधा ति रहा।

धाञ् धातु में अभ्यास को ह्रस्व हो जाता है ॥१६० ॥

'दधाति' बना। दा धा तस् है।

त, थ, से, ध्वे अगुणी विभक्तियों के आने पर धा धातु के आदि के तृतीय को चतुर्थ हो जाता है ॥१६१ ॥

धा धा तस् 'अभ्यस्तानामाकारस्य' १५८ सूत्र से अभ्यस्त के आकार का लोप होकर 'अघोषे प्रथमः' से प्रथम अक्षर होकर 'डुधाञ् ह्रस्वः' से अभ्यास को ह्रस्व होकर धत्तः बना। दधासि धत्थः धत्थ। दधामि दध्वः दध्मः।

धा धा ते अभ्यास के चतुर्थ को तृतीय होकर ह्रस्व होकर पुनः १६१ सूत्र से चतुर्थ हो गया और अभ्यस्त के 'आकार' का लोप होकर 'धत्ते' बना। ऐसे ही से ध्वे, विभक्ति में धत्से 'धद्ध्वे' बना। भावकर्म में—

नाम्यन्तानां यणायियन्नाशीश्च्वचेक्रीयितेषु दीर्घः ॥१६२ ॥

नाम्यन्तानां धातूनां दीर्घो भवति यणादीनां ये च्वौ च परे । हूयते ।

अदाब् दाधौ दा ॥१६३ ॥

डुदाञ् दाने । दाण् दाने । दो अवखण्डने । देङ् रक्षणे । एते चत्वारो दारूपाः । डुधाञ् धारणपोषणयोः । धेट् पा पाने इत्येतौ धारूपौ । दाप् लवने, दैप् शोधने इत्येतौ वर्जयित्वा दाधा इत्येतौ दासंज्ञौ भवतः ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

दामागायति पिबति स्थास्यति जहातीनामीकारो व्यञ्जनादौ ॥१६४ ॥

दासंज्ञकमारूपकगायतिपिबतिस्थास्यतिजहातीनामन्तस्य ईकारो भवति व्यंजनादावगुणे सार्वधातुके परे । दीयते । धीयते । माङ् माने शब्दे च । मीयते मीयेते मीयन्ते । कै गै रै शब्दे । गीयते । पीयते । ष्ठा गतिनिवृत्तौ । निमित्ताभावे नैमित्तिकस्याप्यभावः । स्थीयते । षो अन्तकर्मणि । अवसीयते । ओहाक् त्यागे । हीयते । जुहुयात् जुहुयातां जुहुयुः । धेट् पा पाने । दध्यात् दध्यातां दध्युः । दधीत दधीयातां दधीरन् । जुहोतु जुहुतात् जुहुतां जुह्वतु । जुहुधि जुहुतात् जुहुतं जुहुत । जुहवानि जुहवाव जुहवाम । मिमीत मिमीयाताम् मिमीरन् । मिमीतां मिमातां मिमतां । मिमीष्व मिमाथां मिमीध्वं । मिमै मिमावहै मिमामहै । बिभर्तु बिभृतां बिभ्रतु । बिभृतां बिभ्रातां बिभ्रतां । दधातु धत्तात् धत्तां दधतु । अभ्यस्तानामकारस्य इति लोपे प्राप्ते । "लोपस्वरादेशयोः स्वरादेशो विधिर्बलवान्" इति स्वरादेशो भवति ।

दास्त्योरभ्यासलोपश्च ॥१६५ ॥

नाम्यन्त धातु को यण् आदि प्रत्यय, च्वि प्रत्यय के आने पर दीर्घ हो जाता है ॥१६२ ॥

हु य ते = हूयते ।

दाप् देप् को छोड़कर दा धा, धातु 'दा' संज्ञक होते हैं ॥१६३ ॥

डुदाञ्—दान देना, दाण्—दान देना, दो—खंड करना, देङ्—रक्षा करना, ये चार धातु दा रूप हैं । डुधाञ्—धारण पोषण करना, धेट् पा—पीना ये दो धातु धारूप हैं ।

दाप्—काटना, दैप् शोधन करना । इन दो धातुओं को छोड़कर उपर्युक्त दा, धा रूप धातु 'दा' संज्ञक होते हैं ।

व्यंजनादि अगुण सार्वधातुक विभक्ति के आने पर दा, मा, गा, पा, स्था, हा धातु के अन्त को ईकार हो जाता है ॥१६४ ॥

अतः दीयते, धीयते, मीयते बन गये । कै गै रै, धातु शब्द करने अर्थ में हैं । गीयते, पा—पीयते । ष्ठा—ठहरना । 'धात्वादेः षः सः' सूत्र से सकार होने से निमित्त के अभाव में नैमित्तिक का भी अभाव हो गया अतः ठकार को थकार होकर स्था रहा स्थीयते । षो अंत करना—अवसीयते । ओहाक् त्याग करना, हीयते । इत्यादि ।

सप्तमी में—जुहुयात् । दध्यात् । दधीत १५८ से आकार का लोप हुआ है । जुहोतु । जुहुधि । उत्तम पुरुष में गुण होकर जुहवानि जुहवाव जुहवाम । मितीत, मिमीयातां मिमीरन् । मिमीतां । बिभर्तु । बिभृतां । दधातु । 'धा धा हि' 'अभ्यस्तानामाकारस्य' सूत्र से अभ्यस्त के आकार का लोप प्राप्त था किंतु लोप और स्वर के आदेश में स्वर के आदेश की विधि बलवान् होती है इस न्याय के अनुसार—

'हि' विभक्ति के आने पर दा संज्ञक और अस् धातु के अन्त को 'ए' होकर अभ्यास का लोप हो जाता है ॥१६५ ॥

दासंज्ञकस्यास्तेश्च हौ परेन्तस्य एत्वं भवति अभ्यासलोपश्च । यथासंख्यं । धेहि धत्तात् धत्तं धत्त । दधानि दधाव दधाम । धत्तां दधातां दधतां । अजुहोत् अजुहुतां ।

आचार्य श्री सुविधिसागर जी महाराज

अन उस्सिजभ्यस्तविदादिभ्योऽभुवः ॥१६६ ॥

सिजभ्यस्तविदादिभ्यः परस्य अन उस् भवति । अभुवः ।

अभ्यस्तानामुसि ॥१६७ ॥

अभ्यस्तानां गुणो भवति उसि परे । अजुहवुः । अजुहोः अजुहुतं अजुहुत । अजुहवं अजुहुव अजुहुम । अजिहीत अजिहातां अजिहत । अबिभः अबिभृतां अबिभरुः । अबिभः अबिभृतं अबिभृत । अबिभरं अबिभृव अबिभृम । अबिभृत अबिभ्रातां अबिभ्रत । अमिमीत अमिमातां अमिमत । अमिमीथाः अमिमाथां अमिमीध्वं । अमिमि अमिमीवहि अमिमीमहि । अदधात् अधत्तां ।

आकारस्योसि ॥१६८ ॥

आकारस्य लोपो भवति उसि परे । अदधुः । अधत्त अदधातां अदधत । ञिभी भये । बिभेति बिभितः बिभीतः ।

भियो वा ॥१६९ ॥

भियो वा इकारो भवति व्यञ्जनादावगुणे सार्वधातुके परे ।

य इवर्णस्यासंयोगपूर्वस्यानेकाक्षरस्य ॥१७० ॥

असंयोगपूर्वस्यानेकाक्षरस्य इवर्णस्य यो भवति स्वरादावगुणे परे । बिभ्यति इत्यादि । ह्री लज्जायां ।

क्रम से—धेहि तातण् में—धत्तात् । धत्तां । अजुहोत् । अजुहु अन् है ।

भू को छोड़कर सिच् अभ्यस्त और विवादि से परे अन् को 'उस्' हो जाता है ॥१६६ ॥

उस् के आने पर अभ्यस्त को गुण हो जाता है ॥१६७ ॥

अजुहवुः बना अजुहोः अजुहु + अम्—अजुहवम् । अजिहीत ।

अबि भृ दि । 'व्यंजनादिस्योः' से सि दि का लोप होकर गुण होकर र् का विसर्ग हुआ अबिभः । अन् में—अबिभरुः । अबिभ्रत । अमिमीत । अदधात् । अधत्तां । 'अ द धा उस्' ।

उस् के आने पर आकार का लोप हो जाता है ॥१६८ ॥

अदधुः । अधत्त ; ञिभी धातु भय अर्थ में है

भी भी ति चतुर्थ को तृतीय अक्षर एवं डुधाञ् ह्रस्वः १६० सूत्र से अभ्यास को ह्रस्व होकर एवं धातु को गुण होकर 'बिभेति' बना ।

'बिभी तस्' है ।

व्यंजनादि अगुण सार्वधातुक के आने पर 'भी' को विकल्प से इकार हो जाता है ॥१६९ ॥

अतः बिभितः, बिभीतः । बिभी अन्ति १५४वें सूत्र से नकार को लोप होकर—

स्वरादि अगुणी विभक्ति के आने पर असंयोग पूर्व अनेकाक्षर वाले इवर्ण को यकार हो जाता है ॥१७० ॥

बिभ्यति बना । ह्री धातु—लज्जित होना । ह्री ह्री ति 'हो जः' से 'ज्री' १६० सूत्र से ह्रस्व होकर ञ्रि

अभ्यासस्यादिव्यञ्जनमवशेष्यम् ॥१७१ ॥

अभ्यासस्यादिव्यञ्जनमवशेष्यं भवति। अनादेर्लोप इत्यर्थः। जिहेति जिहीतः। स्वरादाविवर्णोवर्णान्तस्य धातोरियुवाविति इयादेशः। जिह्वियति। ओहाक् त्यागे। जहाति जहीतः।

जहातेर्वा ॥१७२ ॥

जहातेः सार्वधातुके व्यञ्जनादावगुणे परे आकार इकारादेशो भवति वा। जहितः जहीतः जहति। जहासि। उभयेषामीकारो व्यञ्जनादावदः। जहीथः जहिथः जहीथ जहिथ। जहामि जहीवः जहिवः जहीमः जहिमः।

लोपः सप्तम्यां जहातेः ॥१७३ ॥

जहातेरन्तस्य लोपो भवति सप्तम्यां व्यञ्जनादावगुणे सार्वधातुके परे। जह्यात् जह्यातां जह्युः। जहातु जहीतात् जहितात् जहीतां जहितां जहतु।

आत्वं वा हौ ॥१७४ ॥

जहातेरन्तस्य आत्वं ईत्वमित्वं च भवति वा हौ परे। जहाहि जहिहि जहीहि जहीतात् जहितात् जहीतं जहितं जहीत जहित। जहानि जहाव जहाम। अजहात् अजहीतां अजहितां अजहुः। अजहाः अजहीतं अजहितं अजहीत अजहित। अजहां अजहिव अजहीव अजहिम अजहीम। इत्यादि। ऋ सृ गतौ। पॄ पालनपूरणयोः।

मार्गदर्शक - आचार्य श्री विद्यासागर जी महाराज

आर्तीपपर्त्योश्च ॥१७५ ॥

अनयोरभ्यासस्य इद्भवति सार्वधातुके परे।

अभ्यास का आदि व्यंजन अवशेष रहता है ॥१७१ ॥

अर्थात् आदि से बाद के रकार का लोप हो जाता है तब गुण होकर 'जिहेति' जिहीतः बना। जिह्वी अति 'स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ' ८३ सूत्र से इय् आदेश होकर 'जिह्वियति' बना। औहाक्—त्याग करना।

'हा हा ति' 'हो जः' सूत्र से अभ्यास को 'ज' होकर सूत्र १६० से ह्रस्व होकर 'जहाति' जहा तस्।

सार्वधातुक व्यंजनादि अगुण विभक्ति के आने पर जहाति धातु के आकार को विकल्प से इकार हो जाता है ॥१७२ ॥

जहितः, १५७वें सूत्र से ईकार होकर 'जहीतः' बना जहा। अन्ति १५८ से आकार को लोप होकर नकार का लोप होकर 'जहति' बना। 'ज हा यात्'

सप्तमी में जहाति के अन्त का लोप हो जाता है ॥१७३ ॥

जह्यात्। जहातु जहितात्, जहीतात्। ज हा हि।

हि के आने पर जहाति के अन्त को 'आ' ई और 'इ' हो जाता है ॥१७४ ॥

जहाहि, जहीहि, जहिहि। अजहात्। इत्यादि। ऋ सृ गति अर्थ में है। पॄ धातु पालन और पूरण अर्थ में है।

ऋ ऋ ति। पॄ पॄ ति।

सार्वधातुक में ऋ के अभ्यास को इकार हो जाता है ॥१७५ ॥

इ ऋ ति।

अभ्यासस्यासवर्णे ॥१७६ ॥

अभ्यासस्य इवर्णोवर्णयोरियुवौ भवतोऽसवर्णे परे। इयर्ति इयृतः इय्रति। इयर्षि इयृथः इयृथ। इयर्मि इयृवः इयृमः। इयृयात् इयृयातां इयृयुः। इयर्तु इयृतात् इयृतां इय्रतु। इयृहि इयृतात् इयृतं इयृत। इयराणि इयराव इयराम। ऐयः ऐयृतां ऐयरुः। ऐयः ऐयृतं ऐयृत। ऐयरं ऐयृव ऐयृम। गुणोर्तिसंयोगाद्योरिति गुण। भावे-अर्यते।

ऋवर्णस्याकारः ॥१७७ ॥

अभ्यासस्य ऋवर्णस्याकारो भवति। ससर्ति ससृतः सस्रति। ससृयात् ससृयातां ससृयुः। ससर्तु ससृतात् ससृतां सस्रतु। अससः अससृतां अससरुः।

यणाशिषोर्ये ॥१७८ ॥

ऋदन्तादिकारागमो भवति यणाशिषोर्ये परे। स्रियते। पिपर्ति पिपृतः। पिप्रति। पिपृयात् पिपृयातां पिपृयुः। पिपर्तु पिपृतात् पिपृतां पिप्रतु। अपिपः अपिपृतां अपिपरुः। णिजिर् शौचपोषणयोः। विजिर् पृथग्भावे। विष्लृ व्याप्तौ। विष् शब्दे।

निजिविजिविषां गुणः सार्वधातुके ॥१७९ ॥

निजादीनामभ्यासस्य गुणो भवति सार्वधातुके परे।

चवर्गस्य किरसवर्णे ॥१८० ॥

चवर्गस्य किर्भवति असवर्णे धुटि परे अन्ते च। नेनेक्ति नेनिक्तः नेनिजति। नेनेक्षि नेनिक्थः नेनिक्थ। नेनेज्मि नेनिज्वः नेनिज्मः। नेनिज्यात् नेनिज्यातां नेनिज्युः। नेनेक्तु नेनिक्तात् नेनिक्तां नेनिजतु। नेनेग्धि नेनिक्तात् नेनिक्तं नेनिक्त।

असवर्ण के आने पर अभ्यास के इवर्ण उवर्ण को इय् उव् होता है ॥१७६ ॥

आगे गुण होकर इयर्ति, इयृतः 'रमृवर्णः' से संधि होकर इय् ऋ अति = इयर्ति। इयृयात्। इयर्तु। इय् ऋ आनि गुण होकर इयराणि बना।

भावकर्म में—ऋ य ते 'गुणोर्तिसंयोगाद्योः' ७१ सूत्र से गुण होकर 'अर्यते' बना। सृ सृ ति

अभ्यास के ऋवर्ण को अकार हो जाता है ॥१७७ ॥

गुण होकर 'ससर्ति' बना। ससृतः सस्रति। ससृयात्। ससर्तु। अससः अससृतां अससरुः। भावकर्म में—

यण् आशिष् और य् प्रत्यय के आने पर ऋकार से इकार का आगम होता है ॥१७८ ॥

सृ इ 'रमृवर्णः' से स्रियते बना। पृ पृ ति 'अर्तिपिपर्त्योश्च' १७५ सूत्र से अभ्यास को 'इ' होकर गुण होकर पिपर्ति बना। पिपृयात्। पिपर्तु। अपिपः अपिपृतां अपिपरुः। णिजिर्—शुद्धि करना, पोषण करना। विजिर्—पृथक् होना, विष्लृ—व्याप्त होना, विष्—शब्द करना।

'णो नः' सूत्र से ण् को न् करके निज् धातु है। निज् निज् ति १७१ से अभ्यास के आदि को शेष रखने से ज् का लोप हुआ।

सार्वधातुक में निज् विज् और विष् के अभ्यास को गुण हो जाता है ॥१७९ ।।

एवं गुणी विभक्ति को गुण होकर ने ने ज् ति रहा।

असवर्ण, धुट् के परे और अन्त में चवर्ग को कवर्ग हो जाता है ॥१८० ॥

नेनेक्ति नेनिक्तः नेनिजति, नेनेक्षि नेनिक्थः।

नेनिज्यात्। नेनेक्तु। नेनेग्धि। नेनिज् आनि।

अभ्यस्तस्य चोपधाया नामिनः स्वरे गुणिनि सार्वधातुके ॥१८१ ॥

अभ्यस्तस्य चोपधाया नामिनो गुणो न भवति स्वरादौ गुणिनि सार्वधातुके परे। नेनिजानि नेनिजाव नेनिजाम। अनेनेक् अनेनिक्तां अनेनिजुः। अनेनेक् अनेनिक्तं अनेनिक्त। अनेनिजं अनेनिज्व अनेनिज्म। वेवेक्ति वेविक्तः वेविजति। वेविज्यात् वेविज्यातां वेविज्युः। वेवेक्तु वेविक्तात् वेविक्तां वेविजतु। वेविग्धि। अवेवेक् अवेविक्तां अवेविजुः। वेवेष्टि वेविष्टः वेविषति। वेवेक्षि वेवेष्ठिः वेविष्ठ। वेवेष्मि वेविष्वः वेवेष्मिः। वेविष्यात् वेविष्यातां वेविष्युः। वेवेष्टु वेविष्टात् वेविष्टां वेविषतु। धुटां तृतीयश्चतुर्थेषु इति तृतीयः। ऋवर्णटवर्गरषा मूर्धन्या इति न्यायात् षकारस्य डकारः। वेविड्ढि वेविष्टात् वेविष्टं वेविष्ट। वेविषाणि वेविषाव वेविषाम। अवेवेट् अवेविष्टां अवेविषुः। अवेवेः अवेविष्टं अवेविष्ट। अवेविषं अवेविष्व अवेविष्म। भावकर्मणोः-निज्यते। विज्यते। विष्यते। इति जुहोत्यादिः। ❑

अथ दिवादिगणः

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु।

दिवादेर्यन् ॥१८२ ॥

दिवादेर्गणाद्विकरणसंज्ञको यन् भवति कर्तरि विहिते सार्वधातुके परे।

नामिनोर्वोरकुर्छुरोर्व्यञ्जने ॥१८३ ॥

अकुर्छुरोर्वोरुपधाभूतस्य नामिनो दीर्घो भवति व्यञ्जने परे। दीव्यति दीव्यतः दीव्यन्ति। दीव्येत् दीव्येतां दीव्येयुः। दीव्यतु दीव्यतात् दीव्यतां दीव्यन्तु। अदीव्यत् अदीव्यतां अदीव्यन्। षूङ् प्राणिप्रसवे।

स्वरादि गुणी सार्वधातुक के आने पर अभ्यस्त और उपधा के नामि को गुण नहीं होता है ॥१८१ ॥

नेनिजानि। अनेनेक्। "व्यंजनादिस्योः" से दि सि का लोप हो गया है। विज् धातु से—वेवेक्ति वेविक्तः। वेविज्यात्। वेवेक्तु। वेविग्धि। विष्—वेवेष्टि। वेविष् से 'षढोकः सूत्र से' ष को क् होकर आगे सकार को षकार होकर वेवेक्षि।

वेविष्+हि 'धुटां तृतीयश्चतुर्थेषु' सूत्र १२० से तृतीय अक्षर होता था तब "ऋवर्ण टवर्ग रषा मूर्धन्याः" इस न्याय से षकार को 'ड' पुनः 'तवर्गस्य षट्वर्गाट्टवर्गः' से धि को ढि होकर 'वेविड्ढि' अवेवेट्। भावकर्म में—निज्यते। विज्यते। विष्यते।

इस प्रकार से जुहोत्यादि गण समाप्त हो गया। ❑

अथ दिवादिगण

दिवु धातु क्रीड़ा, जीतने की इच्छा, व्यवहार, कांति इच्छा, स्तुति, मोद, मद, स्वप्न, कांति और गति अर्थ में है।

दिव् ति है।

दिवादि से 'यन्' विकरण होता है ॥१८२ ॥

कर्त्ता में सार्वधातुक से परे दिवादिगण से विकरण संज्ञक 'यन्' होता है।

व्यंजन वाली विभक्ति के आने पर कुर् छुर् को छोड़कर व की उपधाभूत नामिको दीर्घ हो जाता है ॥१८३ ॥

दीव्यति दीव्यतः दीव्यंति। दीव्येत्। दीव्यतु। अदीव्यत्। षूङ् धातु प्राणी को जन्म देने अर्थ में

सूयते सूयेते सूयन्ते। सूयेत सूयेयातां सूयेरन्। सूयतां सूयेतां सूयन्तां। असूयत असूयेतां असूयन्त। असूयथाः असूयेथां असूयध्वं। असूये असूयावहि असूयामहि। णहञ् बन्धने। संनह्यति संनह्यतः संनह्यन्ति। संनह्यते संनह्येते संनह्यन्ते। संनह्येत् संनह्येतां संनह्येयुः। संनह्योः संनह्येतं संनह्येत। संनह्येयं संनह्येव संनह्येम। संनह्येत संनह्येयातां संनह्येरन्। संनह्यतु संनह्यतात् संनह्यतां संनह्यन्तु। संनह्य संनह्यतात् संनह्यतं संनह्यत। संनह्यानि संनह्याव संनह्याम। संनह्यतां संनह्येतां संनह्यन्तां। संनह्यस्व संनह्येथां संनह्यध्वं। संनह्यै संनह्यावहै संनह्यामहै। समनह्यत् समनह्यतां समनह्यन्। समनह्यत समनह्येतां समनह्यन्त। इत्यादि। भावकर्मणोश्च। दीव्यते। सूयते। संनह्यते। ञिमिदा स्नेहने।

मिदेः ॥१८४॥

मिदेरित्येतस्य नाम्युपधस्य धातोर्यन्स्वविकरणे परे गुणो भवति। प्रमेद्यति प्रमेद्यतः प्रमेद्यन्ति। प्रमेद्येत्। प्रमेद्यतु। प्रामेद्यत्। शो तनूकरणे। छो छेदने। षो अन्तकर्मणि। दो अवखण्डने।

यन्योकारस्य ॥१८५॥

धातोरोकारस्य लोपो भवति यनि परे। श्यति श्यतः श्यन्ति। श्यसि श्यथः श्यथ। श्यामि श्यावः श्यामः। छ्यति छ्यतः छ्यन्ति। स्यति स्यतः स्यन्ति। द्यति द्यतः द्यन्ति। शम् दम् उपशमे। तमु काक्षांयां। श्रम् तपसि खेदे च। भ्रमु अनवस्थाने। क्षमूष् सहने। क्लमु ग्लानौ। मदी हर्षे।

शमादीनां दीर्घो यनि ॥१८६॥

शमादीनां दीर्घो भवति यनि परे। शाम्यति। दाम्यति। ताम्यति। श्राम्यति। भ्राम्यति क्षाम्यति। क्लाम्यति। माद्यति। जनी प्रादुर्भावे।

जा जनेर्विकरणे ॥१८७॥

जनेः स्वविकरणे परे जा भवति। जायते। जायेत। जायतां। अजायत।

है। ङ् की इत्संज्ञा होने से आत्मनेपद हुआ। 'धात्वादेः षः सः' सूत्र से 'सू' रहा। सूयते। सूयेते। सूयेत। सूयतां। असूयत। णहञ् धातु-बंधन अर्थ में है।

'णो नः' से न होकर नह्यति संनह्यति बना। संनह्यते। संनह्येत्। संनह्यो। संनह्यतु। संनह्यतां। समनह्यत्। समनह्यत। इत्यादि। भावकर्म में—दीव्यते, सूयते। संनह्यते। ञिमिदा धातु स्नेह अर्थ में है।

'मिद्' इस नामि उपधा वाली धातु को 'यन्' विकरण के आने पर गुण हो जाता है ॥१८४॥

मेद्यति, प्रमेद्यति। प्रमेद्येत्। प्रमेद्यतु। प्रामेद्यत्। शो-कृश करना। छो-छेदन करना। षो-समाप्त होना। दो-टुकड़े करना। शो यन् ति है।

'यन्' के आने पर धातु के ओकार का लोप हो जाता है ॥१८५॥

श्यति, श्यतः श्यन्ति। छ्यति। स्यति। द्यति। शम् दम् धातु उपशम अर्थ में हैं। तमु कांक्षा अर्थ में, श्रम, धातु तपश्चर्या और खेद अर्थ में हैं। भ्रमु-भ्रमण करने। क्षमूष्-सहन करने। क्लमु-ग्लानि अर्थ में, मदी धातु-हर्ष अर्थ में है।

यन् के आने पर शम् आदि को दीर्घ हो जाता है ॥१८६॥

शाम्यति, दाम्यति, ताम्यति, भ्राम्यति, क्षाम्यति, क्लाम्यति, माद्यति। जनी उत्पन्न होना।

जन् धातु को अपने विकरण के आने पर 'जा' हो जाता है ॥१८७॥

जायते। जायेत। जायतां। अजायत।

यणि वा ॥१८८॥

यणि परे जनेर्जादेशो वा भवति। जायते जन्यते। इति दिवादिः। ❑

अथ स्वादिगणः

षुञ् अभिषवे।

नुः स्वादेः ॥१८९॥

स्वादेर्गणाद्विकरणसंज्ञको नुर्भवति कर्तरि विहिते सार्वधातुके परे। सुनोति सुनुतः।

नोर्वकारो विकरणस्य ॥१९०॥

नोर्विकरणस्यासंयोगपूर्वस्योकारस्य वकारो भवति स्वरादावगुणे सार्वधातुके परे। सुन्वन्ति। सुनोषि सुनुथः सुनुथ। सुनोमि।

उकारलोपो वमोर्वा ॥१९१॥

असंयोगपूर्वस्य विकरणस्योकारस्य लोपो वा भवति वमोः परतः। सुन्वः सुनुवः सुन्मः सुनुमः। सुनुते सुन्वाते सुन्वते। सुनुषे सुन्वाथे सुनुध्वे। सुन्वे सुन्वहे सुनुवहे सुन्महे सुनुमहे।

नाम्यन्तानां यणायिन्नाशीश्च्विचेक्रीयितेषु दीर्घः ॥१९२॥*

नाम्यन्तानां धातूनां दीर्घो भवति यण् आय् इन् आशीः चेक्रीयितेषु ये च्वौ च परे। सूयते सूयेते। अशूङ् व्याप्तौ। अश्नुते।

यण् के आने पर जन् को 'जा' विकल्प से होता है ॥१८८॥

भाव में—यण् के आने पर जायते। जन्यते दोनों रूप बन गये।

इस प्रकार से दिवादि गण समाप्त हुआ। ❑

अथ स्वरादिगण प्रारंभ होता है।

षुञ् धातु का अर्थ—स्नपन, पीडन, स्नान और सुरा बनाने अर्थ में है।

कर्ता में सार्वधातुक के आने पर 'सु आदि' गण से 'नु' विकरण होता है ॥१८९॥

धात्वादेः षः सः सूत्र ५४ से स होता है पुनः 'नाम्यंतयोर्धातुविकरणयोर्गुणः' ३२वें सूत्र से गुण होकर 'सुनोति, सुनुतः' बना। 'धात्वादेः षः सः' सूत्र ५४ से 'सुनु अन्ति' है।

नु विकरण के उकार को 'वकार' होता है ॥१९०॥

पूर्व में संयोग अक्षर के न होने से स्वरादि अगुणी सार्वधातुक के आने पर 'नु' के 'उ' को 'व' हो जाता है। सुन्वन्ति।

व, म, विभक्ति के आने पर असंयोग पूर्व के विकरण के उकार का लोप विकल्प से होता है ॥१९१॥

सुन्वः, सुनुवः। सुन्मः सुनुमः बना। आत्मनेपद में—सुनुते सुन्वाते सुन्वते 'आत्मने चानकारात्' सूत्र से अन्ते के नकार का लोप हो गया। सुनुषे। सुन्वे, सुन्वहे, सुनुवहे। सुन्महे, सुनुमहे। भावकर्म में—सु य ते है—

यण् आय् इन्, आशी, चेक्रीयित, य और च्वि प्रत्यय के आने पर नाम्यंत धातु को दीर्घ हो जाता है ॥१९२॥

नोर्विकरणस्य ॥१९३ ॥

नुविकरणस्योकारस्य संयोगपूर्वस्य उवादेशो भवति स्वरादावगुणे सार्वधातुके परे। अश्नुवाते अश्नुवते। चिञ् चयने। चिनोति चिनुतः चिन्वन्ति। चिनुते चिन्वाते चिन्वते। सुनुयात् सुनुयातां सुनुयः। अश्नुवीत अश्नुवीयातां अश्नुवीरन्। अश्नुवीथाः अश्नुवीयाथां अश्नुवीध्वं। अश्नुवीय अश्नुवीवहि अश्नुवीमहि। चिनुयात्। चिन्वीत। सुनोतु सुनुतात् सुनुतां सुन्वन्तु।

नोश्च विकरणादसंयोगात् ॥१९४ ॥

असंयोगपूर्वान्नुविकरणाच्च परस्य हेर्लोपो भवति। सुनु सुनुतात् सुनुतं सुनुत। सुनवानि सुनुवाव सुनुवाम। अश्नुतां अश्नुवातां अश्नुवतां। अश्नुष्व अश्नुवाथां अश्नुध्वं। अश्नवै अश्नवावहै अश्नवामहै। चिनोतु चिनुतात् चिनुतां चिन्वन्तु। चिनुतां चिन्वातां। चिनुष्व चिन्वाथां चिनुध्वं। चिनवै चिनवावहै चिनवामहै। असुनोत् असुनुतां असुन्वन्। आश्नुत आश्नुवातां आश्नुवत। अचिनोत्। अचिनुत। इत्यादि। इति स्वादिः।

❑

अथ तुदादिगणः

तुद् व्यथने ॥

तुदादेरनि ॥१९५ ॥

तुदादेर्गुणो न भवति अनि परे। तुदति तुदतः तुदन्ति। मृङ् प्राणत्यागे।

यहाँ यण् प्रत्यय के आने पर दीर्घ होने से 'सूयते, सूयेते' आदि बनेगा। अशूङ् धातु व्याप्ति अर्थ में है। अश्नुते बना।

नु विकरण के उकार को 'उव्' आदेश हो जाता है ॥१९३ ॥

संयोग पूर्व वाली धातु से नु विकरण के उकार को स्वरादि अगुण सार्वधातुक के आने पर 'उव्' आदेश होता है। अश्नुवाते अश्नुवते बना। चिञ् धातु-चयन अर्थ में है—फूल चुनना। आदि। चिनोति चिनुतः चिन्वन्ति। चिनुते चिन्वाते चिन्वते।

सप्तमी में—सुनुयात्। अश्नुवीत। चिनुयात्। चिन्वीत। इसमें १९० सूत्र से 'उ' को 'व' हुआ है। पंचमी में—सुनोतु। सुनु हि है।

असंयोग पूर्व से परे नु विकरण होने से 'हि' का लोप हो जाता है ॥१९४ ॥

सुनु। पंचमी के उत्तमपुरुष में गुण होने से सुनवानि सुनवाव सुनवाम। अश्नुतां अश्नुवातां अश्नुवतां।

उत्तमपुरुष में—अश्नवै, अश्नवावहै, अश्नवामहै। चिनोतु। चिनुतां। उत्तमपुरुष में—चिनवै, चिनवावहै चिनवामहै।

ह्यस्तनी में—असुनोत्। आश्नुत। अचिनोत्। अचिनुत।

इस प्रकार से स्वादि गण समाप्त हुआ।

❑

अथ तुदादि गण प्रारंभ होता है।

तुद् धातु पीड़ा अर्थ में है। 'तुद् ति' है 'अन् विकरणः कर्तरि' से अन् विकरण होता है। पुनः।

अन् विकरण के आने पर तुदादि को गुण नहीं होता है ॥१९५ ॥

तुदति तुदतः तुदन्ति। मृङ् धातु प्राण त्याग—मरने अर्थ में है।

इरन्यगुणे ॥१९६ ॥

ऋदन्तादिकारागमो भवति अगुणे अन्विकरणे परे । स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ । म्रियते म्रियेते म्रियन्ते । मुच्ल् मोक्षणे ।

मुचादेरागमो नकारः स्वरादनि विकरणे ॥१९७ ॥

मुचादेः स्वरान्नकारागमो भवत्यनि विकरणे परे । मुञ्चति मुञ्चतः मुञ्चन्ति । लुप्लृञ् छेदने । विद्लृञ् लाभे । लिप् उपदेहे । षिचिर् क्षरणे । लुम्पति लुम्पते । विन्दति विन्दते । लिम्पति लिम्पते । सिञ्चति । सिञ्चते । इति मुचादिः । तुदेत् । म्रियेत । मुञ्चेत् । मुञ्चेत । तुदेत् । म्रियतां । मुञ्चन्तु । मुञ्चतां । अतुदत् । अम्रियत । अमुञ्चत् । अमुञ्चत अमुञ्चेतां अमुञ्चन्त । अमुञ्चथाः अमुञ्चेथां अमुञ्चध्वं । अमुञ्चे अमुञ्चावहि अमुञ्चामहि । भावकर्मणोः—तुद्यते ।

यणाशिषोर्ये ॥१९८ ॥

ऋदन्तादिकारागमो भवति यणाशिषोर्ये परे । म्रियते । मुच्यते । लुप्यते । विद्यते । लिप्यते । सिच्यते इत्यादि । कृ विक्षेपे । गृ निगरणे ।

ऋदन्तस्येरगुणे ॥१९९ ॥

ऋदन्तस्य इर् भवत्यगुणे परे । किरति । गिरति ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

अगुण विभक्ति में अन् विकरण के आने पर ऋकारांत धातु से 'इकार्' का आगम हो जाता है ॥१९६ ॥

'रमृवर्णः' सूत्र से ऋ को र् होकर 'म्रि ते' रहा 'स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ' ८३ सूत्र से इकार को 'इय्' होकर म्रियते बना, म्रियेते म्रियंते । इस गण में 'आत्मने चानकारात्' सूत्र से अन्ते के नकार का लोप नहीं होता है । मुच्ल् धातु मुक्त—छूटने अर्थ में है । मुच् अ ति है ।

अन् विकरण के आने पर मुचादि में स्वर से परे 'नकार' का आगम हो जाता है ॥१९७ ॥

'मु न् च् अ ति' है 'वर्गे तद्वर्गपञ्चमं वा' ९३ सूत्र से चवर्ग का अंतिम अक्षर होकर 'मुञ्चति' बना । 'मुञ्च् अ अन्ति में 'असंध्यक्षरयोरस्य तौ तल्लोपश्च' २६वें सूत्र से अकार का लोप हो गया है । 'मुञ्चन्ति' बना ।

लुप्लृञ् धातु छेदन अर्थ में है । लृञ् का अनुबंध होकर लुप् रहा । विद्लृञ्—लाभ अर्थ में है 'विद्' रहता है । लिप् वृद्धि अर्थ में है । षिचिर्—क्षरण अर्थ में है 'षिच्' रहता है ।

इन सबमें नकार का आगम होकर—लुम्पति । लुम्पते । विन्दति, विन्दते । लिम्पति, लिम्पते । सिञ्चति, सिञ्चते । ये 'मुचादि' धातु कहलाती हैं ।

तुदेत् । म्रियेत । मुञ्चेत्, मुञ्चेत । तुदतु । म्रियतां । मुञ्चतु मुञ्चतां । अतुदत् । अम्रियत । अमुञ्चत् । अमुञ्चत । भावकर्म में तुयते । मृ य ते है ।

यण् आशी और 'य' प्रत्यय के आने पर ऋकारांत से इकार का आगम हो जाता है ॥१९८ ॥

म्रियते । मुच्यते । लुप्यते । विद्यते । लिप्यते । सिच्यते । कृ—धातु विक्षेपण करने अर्थ में है । गृ निगलने अर्थ में है ।

अगुण विभक्ति के आने पर ऋकारांत को 'इर्' हो जाता है ॥१९९ ॥

किरति । गिरति ।

वा स्वरे ॥२००॥

गिरतेरश्रुतेर्लश्रुतिर्भवति वा स्वरे परे। गिलति गिलतः गिलन्ति। इरुरोरीरूरौ। कीर्यते गीर्यते इत्यादि।

तुदादिः समाप्तः। ❑

अथ रुधादिगणः

रुधिर् आवरणे।

मार्गदर्शक :- आचार्य श्री सुविधिसागर

स्वरादुश्नादेः परो नशब्दः ॥२०१॥

रुधादेर्गणस्य स्वरात्परो विकरणसंज्ञको नकारागमी भवति कर्तरि विहिते सार्वधातुके परे। णत्वं घढधभेभ्यस्तथोर्धोधः। धुटां तृतीयश्चतुर्थेषु। रुणद्धि।

रुधादेर्विकरणान्तस्य लोपः ॥२०२॥

रुधादेर्विकरणान्तस्य लोपो भवति अगुणे सार्वधातुके परे। रुन्द्धः रुन्धन्ति। रुन्द्धे, रुन्द्धाते, रुन्द्धते। रुन्त्से। रुन्धाथे रुन्ध्वे। रुन्धे रुन्ध्वहे रुन्ध्महे। भुज पालनाभ्यवहारयोः।

अशनार्थे भुजा ॥२०३॥

स्वर के आने पर गिर् को विकल्प से गिल् हो जाता है ॥२००॥

गिलति गिलतः गिलन्ति। भावकर्म में—किर् य ते गिर् य ते है 'इरुरोरीरूरौ' ११२वें सूत्र से इर् को ईर् होकर कीर्यते गीर्यते बना इत्यादि।

इस प्रकार से तुदादि गण समाप्त हुआ। ❑

अथ रुधादि गण प्रारंभ होता है।

रुधिर् धातु आवरण—रोकने अर्थ में है। रुध् शेष रहता है।

कर्ता में कहे गये सार्वधातुक के आने पर रुधादि गण में स्वर से परे विकरण संज्ञक 'नकार' का आगम होता है ॥२०१॥

रु न ध् ति 'नो णमनन्त्यः' इत्यादि सूत्र से 'न' को 'ण' हो गया।

'घढधभेभ्यस्तथोर्धोधः' सूत्र १४३ से 'ति' को 'धि' हो गया 'रुण ध् धि' रहा 'धुटां तृतीयश्चतुर्थेषु' सूत्र १२० से प्रथम ध् को द् होकर 'रुणद्धि' बन गया।

अगुण सार्वधातुक के आने पर रुधादि गण में विकरण के अन्त न के अकार का लोप हो जाता है ॥२०२॥

अतः 'रुन्द्धः' बना रुन्ध् अन्ति = रुन्धन्ति बना।

रुणत्सि रुन्द्धः रुन्द्ध, रुणद्धि रुन्ध्वः रुन्ध्मः।

रुन्द्धे रुन्धाते रुन्धते, रुन्त्से रुन्धाथे रुन्ध्वे।

भुज् धातु पालन और भोजन अर्थ मे है। अशन अर्थ में भुज् धातु आत्मने पद ही होती है और पालन अर्थ में परस्मैपदी होती है।

अशन अर्थ में भुज् धातु रुधादि हो जाती है ॥२०३॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

अशनार्थे भुज रुचादिर्भवति। इति रुचादिः। भुङ्क्ते भुञ्जाते भुञ्जते। भुङ्क्षे भुञ्जाथे। भुङ्ग्ध्वे। भुञ्जे भुञ्ज्वहे भुञ्ज्महे। युजिर् योगे। युनक्ति युङ्क्तः युञ्जन्ति॥ युञ्जते। युङ्क्षे। युञ्जाथे युङ्ध्वे। युञ्जे युञ्ज्वहे युञ्ज्महे। रुन्ध्यात्। रुन्धीत। भुञ्जीत। युञ्ज्यात् युञ्जीत। रुणद्धु रुन्द्धात् रुन्द्धां रुन्धन्तु। रुन्द्धि। रुन्द्धात् रुन्द्धं रुन्द्ध। रुणधानि रुणधाव रुणधाम। भुङ्क्तां भुञ्जातां भुञ्जतां। भुङ्क्ष्व भुञ्जाथां भुङ्ग्ध्वं। भुनजै भुनजावहै भुनजामहै। युनक्तु युङ्क्तात् युङ्क्तां युञ्जन्तु। युङ्ग्धि युङ्क्तात् युङ्क्तं युङ्क्त। युनजानि युनजाव युनजाम। युङ्क्तां। अरुणत् अरुणद् अरुन्द्धां अरुन्धन्।

सोऽपदान्ते वा॥२०४॥

दधोरत्वं वा स्यात् तत्रापि शब्दबहुलभावात्।

सोऽपदान्तेऽरेफप्रकृत्योरपि॥२०५॥

पदान्ते वर्तमानयोर्दधोरत्वं वा स्यात् ह्यस्तन्यां मध्यमपुरुषैकवचने। अरुणत्त्वं अरुणस्त्वं। अरुन्द्धं। अरुन्द्ध। अरुणधं अरुन्ध्व अरुन्ध्म। अभुङ्क्त अभुञ्जातां अभुञ्जत। अभुङ्क्थाः अभुञ्जाथां अभुङ्ग्ध्वं। अभुञ्जि। अभुञ्ज्वहि अभुञ्ज्महि। अयुनक् अयुनग् अयुङ्क्तां अयुञ्जन्। अयुनक् अयुनग् अयुङ्क्तं अयुङ्क्त। अयुनजं अयुञ्ज्व अयुञ्ज्म। अयुङ्क्त अयुञ्जातां अयुञ्जत। अयुङ्क्थाः अयुञ्जाथां अयुङ्ग्ध्वं। अयुञ्जि अयुञ्ज्वहि अयुञ्ज्महि। भावकर्मणोः। रुध्यते रुध्येते रुध्यन्ते। भुज्यते भुज्येते भुज्यन्ते। भिदिर् विदारणे। छिदिर् द्विधाकरणे। भिनत्ति। छिनत्ति। भिन्द्यात्। छिन्द्यात्। भिनत्तु। छिनत्तु। अभिनत् अभित्तां अभिन्दन्। अभिनत्त्वं अभिनस्त्वं अभिन्तं अभिन्त। अभिनदं अभिन्द्व अभिन्द्म। अच्छिनत् अच्छिन्ताम् अच्छिन्दन्। अच्छिनत्त्वं अच्छिनस्त्वं अच्छिन्तं अच्छिन्त। अच्छिन्त। अच्छिन्दम् अच्छिन्द्व अच्छिन्द्म। इति रुधादिः। ❑

भुज् ते 'स्वराद्नुधादेः परो नशब्दः' सूत्र में 'न' विकरण होकर 'रुधादेर्विकरणान्तस्य लोपः' सूत्र से नकार के अकार का लोप होकर 'चवर्गस्यकिरसवर्णे' सूत्र १८० से चवर्ग को कवर्ग होकर 'वर्ग तद्वर्गपञ्चमं वा' सूत्र से वर्ग का अंतिम अक्षर होकर भुङ्क्ते भुञ्जाते भुञ्जते। 'भुङ् क्षे' स् को ष होकर क्ष हो गया। युजिर् धातु योग अर्थ में है। युनक्ति युङ्क्तः युञ्जन्ति। रुन्ध्यात्। रुन्धीत। भुञ्जीत। युञ्ज्यात्। युञ्जीत। रुणद्धु। 'रुन्द्धि' हुधुड्भ्यां हेर्धिः' सूत्र से हिको धि होकर बना है। पंचमी के उत्तम पुरुष में रुणधानि रुणधाव रुणधाम। भुनजै भुनजावहे भुनजामहे। युनक्तु। अरुणत्।

द और ध से अकार विकल्प से होता है। वहाँ भी शब्द बहुलता होती है॥२०४॥

ह्यस्तनी के प्रथम पुरुष के एकवचन में पदान्त में वर्तमान द और ध को अकार विकल्प से होता है॥२०५॥

अरुणत् त्वं। जब अकार हुआ तब—अरुणः त्वं। अरुणधम् अरुन्ध्व अरुन्ध्म। अभुङ्क्त अभुञ्जातां अभुञ्जत। अयुनक् अयुनग्। अयुङ्क्त। भावकर्म में—रुध्यते। भुज्यते। भिदिर् विदारण अर्थ में है एवं छिदिर् द्विधा करने के अर्थ में है। भिनत्ति। छिनत्ति। भिन्द्यात् छिन्द्यात्। भिनत्तु। छिनत्तु अभिनत् अभिन्तां अभिन्दन्। अभिनत् अभिनः। अच्छिनत्। अच्छिनत। अच्छिनः। अच्छिन्दम् इस प्रकार से रुधादि गण समाप्त हुआ। ❑

अथ तनादिगणः

तनु विस्तारे ।

तनादेरुः ॥२०६ ॥

तनादेर्गणाद्विकरणसंज्ञक उर्भवति कर्तरि विहिते सार्वधातुके परे । तनोति तनुतः तन्वन्ति । मनुङ् अवबोधने । मनुते मन्वाते मन्वते । मनुषे मन्वाथे मनुध्वे । मन्वे मनुवहे मन्वहे मनुमहे मन्महे । डुकृञ् करणे । करोति ।

करोतेः ॥२०७ ॥

करोतेरकारस्य उकारो भवति अगुणे सार्वधातुके परे । कुरुतः कुर्वन्ति । करोषि कुरुथः कुरुथ । करोमि ।

अस्याकारः सार्वधातुकेऽगुणे ॥

करोतेर्लिस्य ॥२०८ ॥

मार्गदर्शक :- आचार्य श्री विनोद कुमार जी महाराज

करोते परस्य उकारस्य नित्यं लोपो भवति वमोः परतः कुर्वः कुर्मः । कुरुते कुर्वाते कुर्वते । भावकर्मणोश्च । तन्यते मन्यते ।

ये च ॥२०९ ॥

करोते परस्य उकारस्य नित्यं लोपो भवति ये च परे । कुर्यात् कुर्वीत । तनोतु तनुतात् तनुतां तन्वन्तु ।

उकाराच्च ॥२१० ॥

अथ तनादि गण प्रारम्भ होता है।

तनु धातु विस्तार अर्थ में है । तन् ति है ।

कर्ता से सार्वधातुक में तनादि गण से विकरण संज्ञक 'उ' होता है ॥२०६ ॥

तनोति तनुतः तन्वन्ति । मनुङ् धातु मानने अर्थ में है । मनुते मन्वाते मन्वते । तनोमि तनुवः 'उकारलोपो वर्गोवा' सूत्र १९१ से व, म के आने पर उकार का लोप विकल्प से होता है । तन्वः तन्मः । मनुवहे मन्वहे मनुमहे मन्महे ।

डुकृञ् धातु करने अर्थ में है । 'करोति' बना है ।

'नाम्यंतयोर्धातु विकरणयोर्गुणः' सूत्र से सर्वत्र गुण हुआ ।

अगुण सार्वधातुक के आने पर करोति के अकार को उकार हो जाता है ॥२०७ ।।

कुरुतः कुर्वन्ति । कुरु वस् ।

व, म के आने पर करोति के उकार का नित्य ही लोप हो जाता है ॥२०८ ॥

कुर्वः, कुर्मः । कुरुते कुर्वाते कुर्वते । भावकर्म में—तन्यते, मन्यते । कुरु यात् ।

'य' विभक्ति के आने पर कुरु के उकार का नियम से लोप हो जाता है ॥२०९ ॥

कुर्यात् । कुरु ईत = कुर्वीत । तनोतु तनुतात् ।

उकार विकरण से 'हि' का लोप हो जाता है ॥२१० ॥

उकाराच्च विकरणात्परस्य हेर्लोपो भवति। तनु तनुतात् तनुतं तनुत। तनवानि तनवाव तनवाम। मनुतां मन्वातां मन्वतां। करोतु कुरुतात् कुरुतां कुर्वन्तु। कुरुतां। अतनोत् अतनुतां अतन्वन्। अतनोः। अमनुत अमन्वातां अमन्वत। अमनुथाः अमन्वाथां अमनुध्वं। अमन्वि अमनुवहि अमन्वहि अमनुमहि अमन्महि। अकरोत् अकुरुतां अकुर्वन्। अकुरुत। भावकर्मणोः। तन्यते। मन्यते। "भावकर्मणोश्च। यणाशिषोर्ये" इतीकारागमः। क्रियते। इति तनादिः ❑

अथ क्र्यादिगणः

डुक्रीञ् द्रव्यविनिमये।

ना क्र्यादेः ॥२११॥

क्र्यादेर्विकरणसंज्ञको ना भवति कर्तरि विहिते सार्वधातुके परे। क्रीणाति। उभयेषामिति ईकारः। क्रीणीतः।

क्र्यादीनां विकरणस्य ॥२१२॥

क्र्यादीनां विकरणाकारस्य लोपो भवति स्वरादावगुणे सार्वधातुके परे। क्रीणन्ति। वृञ् संभक्तौ। वृणीते वृणाते वृणते। ग्रहञ् उपादाने।

सपरस्वरायाः सम्प्रसारणमन्तस्थायाः ॥२१३॥

परेण धातुस्वरेण सह अन्तस्थायाः सम्प्रसारणं भवति। इत्यधिकृत्य।

ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिव्रश्चिभ्रस्जीनामगुणे ॥२१४॥

तनु तनुतात्। तनवानि। मनुतां। करोतु। कुरुतां। अतनोत्। अमनुत। अकरोत्। अकुरुत। भावकर्म में—तन्यते। मन्यते कृ य ते 'यणाशिषोर्ये' इस सूत्र से इकार का आगम होकर 'क्रियते' बना।

इस प्रकार से तनादि प्रकरण समाप्त हुआ। ❑

अथ क्र्यादिगण प्रारम्भ होता है।

डुक्रीञ् खरीदने अर्थ में है।

कर्ता में सार्वधातुक के आने पर क्र्यादि गण में विकरण संज्ञक 'ना' हो जाता है ॥२११॥

क्रीणाति। 'उभयेषामीकारो व्यञ्जनादावदः' सूत्र १५७ से क्र्यादि गण में व्यंजनादि अगुण विभक्ति के आने पर विकरण को ईकार हो जाता है। क्रीणीतः। क्रीणा अन्ति।

स्वरादि अगुण सार्वधातुक के आने पर क्र्यादि गण में विकरण ना के आकार का लोप हो जाता है ॥२१२॥

अतः 'क्रीणन्ति' बना। वृङ् धातु वरण अर्थ में है।
वृणीते वृणाते वृणते। ग्रहञ् धातु ग्रहण अर्थ में है।

पर धातु स्वर के साथ अंतस्थ को संप्रसारण हो जाता है ॥२१३॥

इस सूत्र को अधिकृत करके—

ग्रह्, ज्या, वय्, व्यध्, वश्, व्यच् प्रच्छ् व्रश्च भ्रस्ज् धातु के अन्तस्थ को पर स्वर के साथ अगुण विभक्ति के आने पर संप्रसारण हो जाता है ॥२१४॥

ग्रहादीनामन्तस्थायाः परेण स्वरेण सह सम्प्रसारणं भवत्यगुणे परे। किं सम्प्रसारणं।

सम्प्रसारणं य्वृतोऽन्तस्था निमित्ताः ॥२१५॥

अन्तस्था निमित्ता इ उ ऋतः संप्रसारणसंज्ञा भवन्ति। गृह्णाति गृह्णीतः गृह्णन्ति। गृह्णीते गृह्णाते गृह्णते। ज्या वयोहानौ। जीनाति। भावकर्मणोश्च। जीयते। वेञ् तन्तुसन्ताने। वयति वयतः वयन्ति। वयते। ऊयते। व्यध् ताडने। विध्यति विध्यते। वश कान्तौ।

छशोश्च ॥२१६॥

छशोश्च षो भवति धुट्यन्ते च। वष्टि उष्टः उशन्ति। वक्षि उष्ठः उष्ठ। वश्मि उश्वः उश्मः। उश्यते। व्यच व्याजीकरणे। विचति विचतः विचन्ति। विच्यते। प्रच्छ ज्ञीप्सायां। पृच्छति पृच्छतः पृच्छन्ति। पृच्छते। व्रश्चू छेदने। वृश्चति। वृश्चते। भ्रस्ज पाके। लृवर्णतवर्गलसा इति न्यायात् भृज्जति। भृज्जते। त्रिषु व्यञ्जनेषु संयुज्यमानेषु सजातीयानामेकव्यञ्जनलोपः। क्रीणीयात्। वृणीत। गृह्णीयात् गृह्णीत। क्रीणातु क्रीणीतात् क्रीणीताम्। क्रीणन्तु। क्रीणीहि क्रीणीतात् क्रीणीतं क्रीणीत। क्रीणानि क्रीणीव क्रीणीम। वृणीत। गृह्णातु गृह्णीतात् गृह्णीतां गृह्णन्तु।

आन व्यञ्जनान्ताद्धौ ॥२१७॥

संप्रसारण किसे कहते हैं ?

अन्तस्थ य् व् र् को इ उ ऋ संप्रसारण संज्ञा होती है ॥२१५॥

ग्रह को गृह हो गया गृह्णाति = गृह्णाति गृह्णीतः गृह्णन्ति। गृह्णीते गृह्णाते गृह्णते। ज्यावय की हानि अर्थ में है। ज्या में या को ई होकर 'जीनाति' बना। भाव-कर्म में—जीयते। वेञ् धातु बुनना। वयति। वयते। वे को आकारांत होकर वा को ऊ होकर 'ऊयते'। व्यध्—ताडित करना। य को इ होकर विध्यति। विध्यते। 'वयति' भ्वादिगण में बना है एवं 'विध्यति' दिवादिगण में बना है। वश् धातु—कांति (चमकना)—यह धातु अदादि का है और विकरण का लोप हो जाता है।

धुट् के अन्त में आने पर छ् और श् को ष् हो जाता है ॥२१६॥

वष् होकर 'तवर्गस्य षटवर्गाट्टवर्गः' ११८ सूत्र से टवर्ग होकर वष्टि बना। अगुणी में संप्रसारण होकर उष्टः उशन्ति। वक्षि "षढो कः से" ११९वें सूत्र से ष् को क् होकर पुनः सि को षि होकर वक्षि बना है। उष्ठः उष्ठ। वश्मि उश्वः उश्मः। व और म अन्तस्थ, अनुनासिक होने से धुट् नहीं है।

व्यच्—कपट करना। य को इ होकर तुदादि गण में विचति विचतः विचन्ति बना।

विच्यते। प्रच्छ् धातु—प्रश्न करना।

र् को ऋ होकर पृच्छति। पृच्छते। ब्रश्चू—छेदन करना। वृश्चति। वृश्चते। भ्रस्ज्—भूनना। "लृ वर्ण त वर्ग ल और स ये दन्त्य कहलाते हैं।" 'तवर्गस्य चटवर्गयोगे चटवर्गौ' सूत्र से और दन्त्य होने के न्याय से सकार को त वर्ग मानकर आगे च वर्ग के योग में उसे च वर्ग कर देने से 'भृज्जति' बना। भृज्जते। भ्रस्ज् में र् को ऋ संप्रसारण हुआ है। तीन व्यञ्जनों के संयुक्त करने पर सजातीय में से एक व्यञ्जन का लोप हो जाता है। क्रीणीयात्। वृणीत। गृह्णीयात्। गृह्णीत। क्रीणातु। क्रीणीहि। वृणीत। गृह्णातु।

व्यञ्जनांत धातु से क्र्यादि गण में 'हि' के आने पर विकरण संज्ञक 'आन' हो जाता है ॥२१७॥

व्यञ्जनान्तात् क्र्यादेर्विकरणसंज्ञक आनो भवति हौ परे। गृहाण गृह्णीतात् गृह्णीतं गृह्णीत। गृह्णानि गृह्णाव गृह्णाम। गृह्णीतां। अक्रीणात् अक्रीणीतां अक्रीणन्। अक्रीणाः अक्रीणीतं अक्रीणीत। अक्रीणां अक्रीणीव अक्रीणीम। अवृणीत अवृणातां अवृणत। अवृणीथाः अवृणाथां अवृणीध्वं। अवृणि अवृणीवहि अवृणीमहि। अगृह्णात् अगृह्णीत। भावकर्मणोः—विक्रीयते। व्रियते। गृह्यते। पूङ् पवने।

प्वादीनां ह्रस्वः ॥२१८॥

प्वादीनां ह्रस्वो भवति स्वविकरणे परे। पुनाति पुनीतः पुनन्ति। पुनीयात् पुनीयातां पुनीयुः। पुनातु पुनीतात् पुनीतां पुनन्तु। पुनीहि पुनीतात् पुनीतं पुनीत। पुनानि पुनाव पुनाम। अपुनात् अपुनीतां अपुनन्। अपुनाः अपुनीतं अपुनीत। अपुनां अपुनीव अपुनीम। एवं लूङ् छेदने। लुनाति। लुनीत लुनन्ति। अलुनात्। ज्ञा अवबोधने।

ज्ञश्च ॥२१९॥

ज्ञश्च स्वविकरणे जा भवति। जानाति जानीतः जानन्ति। जानीयात्। जानातु जानीतात् जानीतां जानन्तु। अजानात् अजानीतां अजानन् इति क्र्यादिः। ❑

अथ चुरादिगणः

चुर स्तेये।

चुरादेश्च ॥२२०॥

चुरादेः कारितसंज्ञक इन् भवति स्वार्थे। उपधाया गुणः।

ते धातवः ॥२२१॥

गृहाण। गृह्णीतां। अक्रीणात् दि सि विभक्ति गुणी है। अतः विकरण को ईकार नहीं हुआ। अवृणीत। अगृह्णात्। अगृह्णीत। भाव और कर्म में—क्रीयते, विक्रीयते। 'यणाशिषोर्ये' सूत्र १९८ से इकार का आगम होकर व्रियते बना। गृह्यते। पूङ्-पवित्र करना।

अपने विकरण के आने पर पू आदि को ह्रस्व हो जाता है ॥२१८॥

पुनाति पुनीतः पुनन्ति। पुनीयात्। पुनातु। पुनीहि। अपुनात्। लूङ्-छेदना 'लुनाति' लुनीतः लुनन्ति। अलुनात्। ज्ञा-समझना।

स्वविकरण के आने पर 'ज्ञा' को 'जा' हो जाता है ॥२१९॥

जानाति। जानीयात्। जानातु। जानीहि। अजानात्।

इस प्रकार से क्र्यादि गण समाप्त हुआ।

अब चुरादिगण प्रारम्भ होता है।

चुर् धातु—चुराना।

चुरादिगण में स्वार्थ में कारित संज्ञक 'इन्' होता है ॥२२०॥

और उपधा को गुण हो जाता है 'चोरि' बना। पुनः—

वे सन् आदि प्रत्ययान्त धातु संज्ञक हो जाते हैं ॥२२१॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

ते सनादिप्रत्ययान्ता धातुसंज्ञा भवन्ति। अन् विकरणः कर्त्तरि। अनि च विकरणे इति गुणः। चोरयति चोरयतः चोरयन्ति। मत्रि गुप्तभाषणे। 'अनिदनुबन्धानामगुणे' अत एव इदनुबन्धानां धातूनां नुरागमोऽस्ति गुणागुणे प्रत्यये परे। मन्त्रयते मन्त्रयेते मन्त्रयन्ते। वृञ् आवरणे।

अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु ॥२२२ ॥

अस्योपधाया दीर्घो भवति नाम्यन्तानां वृद्धिर्भवति इन् इच् अट् एषु परतः। वारयति वारयतः वारयन्ति। वारयते। भावकर्मणोश्च।

कारितस्यानामिङ्विकरणे ॥२२३ ॥

कारितस्य लोपो भवति आमिडिङ्विकरणवर्जिते प्रत्यये परे।

स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत् ॥२२४ ॥

स्वरादेशः परनिमित्तकः पूर्ववर्णस्य विधिं प्रति स्थानिवद्भवति। चोर्यते। वार्यते। गुडि सजि पल रक्षणे। गुण्डयति। सञ्जयति। पालयति। उपधाभूतस्येति किं ? अर्च पूजायां। अर्चयति। चोरयेत्। मन्त्रयेत्। वारयेत्। चोरयतु। मन्त्रयतां। वारयतु वारयतां। अचोरयत्। अमन्त्रयत। अवारयत। गुण्डयेत्। गुण्डयतु। अगुण्डयत्। संजयेत। संजयतु। असंजयत्। पालयेत्। पालयतु। अपालयत्। अर्चयेत्। अर्चयतु। आर्चयत्। भावकर्मणोश्च। गुण्ड्यते। संज्यते। पाल्यत। अर्च्यत इत्यादि। एवं सर्वमुन्नेयं। इति चुरादिः।

इस सूत्र से 'चोरि' को धातु संज्ञा होकर 'अन् विकरणः कर्तरि' से अन् विकरण होकर 'अनि च विकरणे' सूत्र २३ से गुण होकर 'चोरयति' बना। मत्रि—गुप्त भाषण करना। 'अनिदनु-बंधानामगुणे' सूत्र ५६ से इकार अनुबंध धातु को नु का आगम होता है गुणी अगुणी प्रत्यय के आने पर। नु का आगम 'मन्त्र्' 'चुरादेश' सूत्र से इन् प्रत्यय 'ते धातवः' से धातु संज्ञा होकर अन् विकरण और गुण होकर 'मन्त्रयते' बना। वृञ्—आवरण करना।

इन् इच् अट् प्रत्ययों के आने पर इसकी उपधा को दीर्घ होता है और नाम्यन्त को वृद्धि होती है ॥२२२ ॥

वृ को वृद्धि होने से वार् इन् होकर धातु संज्ञा होकर अन् विकरण एवं गुण होकर 'वारयति' बना। वारयते इत्यादि। भाव और कर्म में—

आम् और इट् प्रत्यय को छोड़कर अन्य प्रत्यय के आने पर कारित संज्ञक 'इन्' प्रत्यय का लोप हो जाता है ॥२२३ ॥

परनिमित्तक स्वरादेश पूर्व वर्ण की विधि के प्रति स्थानिवत् होता है ॥२२४ ॥

अतः चोर्यते, मन्त्र्यते, वार्यते। गुड्, सज्, पल्—रक्षण करना।

इन प्रत्यय, धातु संज्ञा, नु का आगम, अन् विकरण और गुण होकर गुण्डयति। सञ्जयति। पालयति। उपधाभूत को ही दीर्घ हो ऐसा क्यों कहा ? अर्च-पूजा अर्थ में है। इन् प्रत्यय होकर गुण होकर 'अर्चयति'। चोरयेत्। मन्त्रयेत। वारयेत्। चोरयतु। मन्त्रयतां। वारयतु। वारयतां। अचोरयत्। अमन्त्रयत। अवारयत। गुण्डयेत्। गुण्डयतु। अगुण्डयत्। संजयेत्। संजयतु। असञ्जयत्। पालयेत्। पालयतु। अपालयत्। अर्चयेत्। अर्चयतु। आर्चयत्।

सार्वं तीर्थकराख्यानं धातोस्तत्प्रकृतेरभूत्।
शास्त्रमेतत् तत्र मुख्यं सार्वधातुकमुच्यते ॥१ ॥

इत्याख्याते सार्वधातुकं ❑

अथाऽसार्वधातुकमुच्यते

भूतकरणवत्यश्च ॥२२५ ॥

इति अतीतमात्रे अद्यतनी भवति अद्यभवोऽद्यतनः। तत्रातीतेऽद्यतनी भवति। भू सत्तायां।

सिजद्यतन्याम् ॥२२६ ॥

धातोः सिज्भवति अद्यतन्यां परतः।

इडागमोऽसार्वधातुकस्यादिव्यञ्जनादेरयकारादेः ॥२२७ ॥

धातोः परस्य व्यञ्जनादेरयकारादेरसार्वधातुकस्यादाविडागमो भवति।

इणिक्स्थादापिबतिभूभ्यः सिचः परस्मै[1] ॥२२८ ॥

इणादिभ्यः परस्यः सिचो लुग्भवति परस्मैपदे परे।

भवतेः सिज्लुकि ॥२२९ ॥

भुव इडागमो न भवति सिज्लुकि।

भाव और कर्म में—गुण्ड्यते। सज्ज्यते। पाल्यते। अर्च्यते। इत्यादि। इसी प्रकार से सभी धातुओं के रूप चला लेना चाहिये।

इस प्रकार से चुरादिगण समाप्त हुआ।

सभी का हित करने वाले तीर्थंकर भगवान् के उपदेश में धातु और प्रकृति का शास्त्र हुआ है उसमें भी सार्वधातुक प्रकरण मुख्य कहा जाता है ॥१ ॥

इस प्रकार से आख्यात में सार्वधातुक प्रकरण समाप्त हुआ। ❑

अथ असार्वधातुक प्रकरण प्रारंभ होता है।

भूतकाल में अद्यतनी होती है ॥२२५ ॥

अतीत मात्र के अर्थ में अद्यतनी होती है। आज का ही होने वाला भूतकाल 'अद्यतन' कहलाता है। उस अतीत काल में अद्यतनी होती है। भू—सत्ता अर्थ में है।

अद्यतनी परे धातु से सिच् प्रत्यय होता है ॥२२६ ॥

धातु से परे यकारादि रहित, व्यञ्जनादि जो असार्वधातुक उसकी आदि में 'इट्' का आगम होता है ॥२२७ ॥

परस्मैपद में इण् इक् स्था दा पिब् और भू धातु से परे सिच् का 'लुक्' हो जाता है ॥२२८ ॥

सिच् का लुक् होने पर 'भू' से इट् का आगम नहीं होता है ॥२२९ ॥

---

१ इण्स्था—इत्यादि सूत्रं हस्तलिखिते पुस्तके वर्तते। इक तत्र न गृहीतं।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

भुवः सिज्लुकि ॥२३०॥

भुवो गुणो न भवति सिज्लुकि। अभूत् अभूतां।

भुवो वोन्तः परोक्षाद्यतन्योः ॥२३१॥

भूधातोरन्ते वकारागमो भवति परोक्षाद्यतन्योः स्वरे परे। अभूवन्। अभूः अभूतं अभूत। अभूवं अभूव अभूम। इण् गतौ।

इणो गाः ॥२३२॥

इणो गा भवत्यद्यतन्यां परतः।

अनिडेकस्वरादातः ॥२३३॥

एकस्वरादाकारात्परमसार्वधातुकमनिड् भवति। अगात् अगातां।

आलोपोऽसार्वधातुके ॥२३४॥

धातोराकारस्य लोपो भवत्यसार्वधातुके स्वरादावगुणे परे। अगुः। अगाः अगातं अगात। अगाम् अगाव अगाम। इक् स्मरणे।

इकोऽपि ॥२३५॥

इकोऽपि गा भवत्यद्यतन्यां परतः। इडिकावध्युपसर्गं न व्यभिचरतः। अध्यगात् अध्यगातां अध्यगुः। अस्थात् अस्थातां अस्थुः। अधात्। अदात्। इत्यादि।

इङ् अध्ययने।

सिच् का लुक् होने पर भू को गुण नहीं होता है ॥२३०॥

अतः भू द् ह्यस्तनी अद्यतनी आदि में धातु की आदि में अट् का आगम होकर 'अभूत्' अभूतां बन गया।

अभू अन् है।

परोक्षा और अद्यतनी में स्वर विभक्ति के आने पर भू धातु के अंत में 'वकार' का आगम हो जाता है ॥२३१॥

अभूवन्। अभूः अभूतं अभूत। अभूवम् अभूव अभूम। इण्—गति अर्थ में है।

इण् धातु को अद्यतनी में 'गा' आदेश हो जाता है ॥२३२॥

आकारांत एक स्वर वाली धातु असार्वधातुक में इट् रहित होती है ॥२३३॥

अगात् अगातां। अन् को उस् होकर—

असार्वधातुक में स्वरादि अगुणी विभक्ति के आने पर धातु के आकार का लोप हो जाता है ॥२३४॥

अगुः। इक् धातु स्मरण अर्थ में है।

अद्यतनी में इक् को भी 'गा' आदेश हो जाता है ॥२३५॥

इङ् और इक् धातु 'अधि' उपसर्ग को व्यभिचरित नहीं करते हैं अर्थात् इनमें 'अधिः' उपसर्ग अवश्य लगता है। अध्यगात् अध्यगातां अध्यगुः। स्था धातु से—अस्थात्। धा दा धातु से अधात्। अदात् इत्यादि। इङ् धातु अध्ययन अर्थ में है।

अद्यतनीक्रियातिपत्त्योर्गी वा ॥२३६ ॥

अद्यतनीक्रियातिपत्त्योरात्मनेपदे परे इङो वा गी आदेश इष्यते ।

इवर्णादश्विश्रिडीङ्शीङः ॥२३७ ॥

शिवश्रिडीङ्शीङ्वर्जितादेकस्वरादिवर्णात्परमसार्वधातुकमनिङ् भवति । आदेशबलादगुणित्वे । अध्यगीष्ट अध्यगीषातां अध्यगीषत । अध्यगीष्ठाः अद्यगीषाथां ।

सिचो धकारे ॥२३८ ॥

सिचो लोपो भवति धकारे परे ।

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढः ॥२३९ ॥

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढो भवति । अध्यगीढ्वं । अध्यगीषि अध्यगीष्वहि अध्यगीष्महि । पक्षे स्वरादीनां वृद्धिरादेः । अध्यैष्ट अध्यैषातां अध्यैषत । अध्यैष्ठाः अध्यैषाथां अध्यैढ्वं । अध्यैषि अध्यैष्वहि अध्यैष्महि । परस्मै इति किम् ?

भूप्राप्तौ ॥२४० ॥

भूधातोः भूप्राप्तावात्मनेपदी भवति । अभविष्ट अभविषातां अभविषत । अभविष्ठाः अभविषाथां अभविढ्वं । अभविषि अभविष्वहि । अभविष्महि । समवप्रविभ्यश्चेति स्था रुचादिः ।

स्थादोरिरद्यतन्यामात्मने ॥२४१ ॥

स्थादासंज्ञकयोरन्तस्य इर्भवति अद्यतन्यामात्मनेपदे परे ।

अद्यतनी और क्रियातिपत्ति में आत्मनेपद के आने पर 'इङ्' को विकल्प से 'गी' आदेश होता है ॥२३६ ॥

श्वि, श्रि, डीङ्, शीङ् को छोड़कर एक स्वरादि वर्ण से परे असार्वधातुक अनिट् होते हैं ॥२३७ ॥

आत्मनेपद में 'त' विभक्ति में अध्यगीष् में सिच् पर में रहते गुण क्यों नहीं हुआ गी आदेश करने से गुण नहीं होता है अध्यगीष्ट बना, इसमें सिच् का आगम होकर स् को ष् हुआ है और ष् के निमित्त से तवर्ग को टवर्ग हुआ है । अध्यगीष्ध्वं है ।

धकार के आने पर सिच् का लोप हो जाता है ॥२३८ ॥

नाम्यंत धातु से आशी अद्यतनी और परोक्षा में 'ध' को ढ् हो जाता है ॥२३९ ॥

अतः अध्यगीढ्वं बना । पक्ष में जब 'गी' आदेश नहीं हुआ तब 'इ' को 'स्वरादीनां वृद्धिरादेः' सूत्र ४८ से पूर्व स्वर को वृद्धि होकर सिच् होकर 'अध्यैष्ट' बना ।

परस्मैपद में ऐसा क्यों कहा ?

भू धातु प्राप्ति अर्थ में आत्मनेपदी होता है ॥२४० ॥

आत्मनेपद में 'सिच् इट्' होकर 'अभविष्ट' बनेगा । सम्, अव, प्र, वि उपसर्ग से परे स्था धातु रुचादि हो जाता है अर्थात् इन उपसर्गों के योग से स्था धातु आत्मनेपद में चलता है । सम् अस्था त ।

आत्मनेपद में अद्यतनी से स्था, दा संज्ञक धातु के अंत को इकार होता है ॥२४१ ॥

स्थादोश्च ॥२४२॥

स्थादासंज्ञकयोर्गुणो न भवति अनिटि सिजाशिषोश्चात्मनेपदे परे।

ह्रस्वाच्चानिटः ॥२४३॥

ह्रस्वात्परस्य अनिटः सिचो लुग्भवति धुटि परे॥ समस्थित समस्थिषातां समस्थिषत। समस्थिथाः समस्थिषाथां समस्थिध्वं। समस्थिषि समस्थिष्वहि समस्थिष्महि॥ अदित अदिषातां अदिषत। अदिथाः अदिषाथां अदिध्वं। अदिषि अदिष्वहि। अदिष्महि। ऐधिष्ट ऐधिषातां ऐधिषत। ऐधिष्ठाः ऐधिषाथां ऐधिध्वं। ऐधिषि ऐधिष्वहि ऐधिष्महि।

पचिवचिसिचिरुचिमुचेश्चात् ॥२४४॥

एभ्यः पञ्चभ्यः परमसार्वधातुकमनिड् भवति।

अस्य च दीर्घः ॥२४५॥

व्यञ्जनान्तानामनिटामुपधाभूतस्यास्य दीर्घो भवति परस्मैपदे सिचि परे।

सिचः ॥२४६॥

सिचः परयोर्दिस्योरादिरीद्भवति। अपाक्षीत्।

धुट्श्च धुटि ॥२४७॥

धुटः परस्य सिचो लोपो भवति धुटि परे। अपात्तां अपाक्षुः। अपाक्षीः अपात्तं अपात्त। अपाक्षं अपाक्ष्व अपाक्ष्म। अपक्त अपक्षातां अपक्षत। अपक्थाः अपक्षाथां अपग्ध्वं। अपक्षि अपक्ष्वहि अपक्ष्महि। वद व्यक्तायां वाचि।

स्था दा संज्ञक धातु को अनिट् सिच् आशीस के आने पर आत्मनेपद में गुण नहीं होता है ॥२४२॥

ह्रस्व से परे इट् नहीं होने से सिच् का लोप हो जाता है ॥२४३॥

समस्थित, प्रास्थित आदि बनेंगे। दा धातु से अदित अदिषातां अदिषत।

एध् धातु से ऐधिष्ट ऐधिषातां ऐधिषत।

पच् वच् सिच् रुच् और मुच् ये पांच धातु असार्वधातुक में इट् रहित होते हैं ॥२४४॥

परस्मैपद में सिच् के आने पर व्यञ्जनान्त अनिट् धातु की उपधा के अकार को दीर्घ हो जाता है ॥२४५॥

सिच् के परे दि और सि विभक्ति की आदि में 'ई' हो जाता है ॥२४६॥

पच् दि है सिच् अट् उपधा को दीर्घ, 'ई' आदेश होकर अपाक्ष् ई त् = अपाक्षीत् बना।

धुट से परे धुट् के आने पर सिच् का लोप हो जाता है ॥२४७॥

अपात्तां अपाक्षुः। आत्मनेपद में पच् की उपधा को दीर्घ न होकर अपक्त अपक्षातां अपक्षत बना। वद—स्पष्ट बोलना।

वदव्रजरलन्तानां च ॥२४८ ॥

वदव्रजरलन्तानामुपधाभूतस्यास्य दीर्घो भवति परस्मैपदे सिचि परे ।

इटश्चेटि ॥२४९ ॥

इटः परस्य सिचो लोपो भवति ईटि परे । अवादीत् अवादिष्टां अवादिषुः । धज ध्वज वज व्रज गतौ । प्राव्राजीत् प्राव्राजिष्टां प्राव्राजिषुः । वर ईप्सायां । अवारीत् अवारिष्टां अवारिषुः । चर गतिभक्षणयोः । अचारीत् अचारिष्टां अचारिषुः । फल निष्पत्तौ । अफालीत् अफालिष्टां अफालिषुः । शल श्वल्ल आशुगतौ । अशालीत् । अशालिष्टां अशालिषुः । अशालीः अशालिष्टं अशालिष्ट । अशालिषं अशालिष्व अशालिष्म ।

व्यञ्जनादीनां सेटामनेदनुबन्धहम्यन्तकणक्षणश्वसवधां वा ॥२५० ॥

एदनुबन्धहम्यन्तकणक्षणश्वसवर्जितानां सेटां व्यञ्जनादीनां धातूनां उपधाभूतस्यास्य दीर्घो भवति वा परस्मैपदे सिचि परे । रद विलेखने । अरादीत् अरादिष्टां अरादिषुः । अरदीत् अरदिष्टां अरदिषुः । गद् व्यक्तायां वाचि । अगादीत् अगादिष्टां अगादिषुः । अगदीत् अगदिष्टां अगदिषुः । व्यञ्जनादीनामिति किं ?

मायोगेऽद्यतनी ॥२५१ ॥

माशब्दयोगे धातोरद्यतनी भवति । अट पट इट किट कट गतौ । मा भवानटीत् मा भवन्तावटिष्टां । मा भवन्तोऽटिषुः । मा त्वमटीः मा युवामटिष्टं मा यूयमटिष्ट । माहमटिषं मा वामटिष्व मा वयमटिष्म । सेटामिति किं ? अपाक्षीत् अपाक्तां अपाक्षुः । अपाक्षीः अपाक्तं अपाक्त । अपाक्षं अपाक्ष्व अपाक्ष्म । नित्यमुपधाभूतस्येति किं ? अव रक्ष पालने । अरक्षीत् अरक्षिष्टां अरक्षिषुः । अरक्षीः अरक्षिष्टं अरक्षिष्ट । अरक्षिषं अरक्षिष्व अरक्षिष्म् । तक्षू त्वक्षू तनूकरणे । अतक्षीत् । अत्वक्षीत् । अस्येति किं ? मुष स्तेये ।

परस्मैपद में सिच् के आने पर वद् व्रज रकारान्त और लकारांत धातु की उपधा के अकार को दीर्घ हो जाता है ॥२४८ ॥

इट् के परे ईट् के आने पर सिच् का लोप हो जाता है ॥२४९ ॥

अवादीत् । अवादिष्टां अवादिषुः । धृज ध्वज वज व्रज धातु गति अर्थ में हैं । प्राव्राजीत् । वर ईप्सा अर्थ में है । अवारीत् । चर-गति और भक्षण । अचारीत् । फल-निष्पत्ति अर्थ में है । अफालीत् । शल श्वल्ल-शीघ्रगति अर्थ में है । अशालीत् अशालिष्टां अशालिषुः ।

एत् अनुबंध, हकार मकारांत, कण क्षण श्वस और वध इन धातुओं से रहित इट् सहित व्यंजनादि धातु के उपधाभूत अकार को परस्मैपद में सिच् के आने पर दीर्घ विकल्प से होता है ॥२५० ॥

रद-विलेखन अर्थ में । अरादीत् । अरदीत् । गद्-स्पष्ट बोलना । अगादीत्, अगदीत् । व्यंजनादि धातुओं को ऐसा क्यों कहा ?

मा शब्द के योग में धातु से अद्यतनी विभक्ति हो जाती है ॥२५१ ॥

अट पट इट किट कट गति अर्थ में हैं, अटीत् माभवानटीत् । इसमें उपधा को दीर्घ नहीं हुआ । इट् सहित हो ऐसा क्यों कहा ? अपाक्षीत् । यह इट् रहित है अतः विकल्प नहीं हुआ । नित्य ही उपधा भूत हो ऐसा क्यों कहा ? अव, रक्ष पालन अर्थ में हैं । अरक्षीत् । तक्षू त्वक्षू-कृश-करना । अतक्षीत् । अत्वक्षीत् । अकार को हो ऐसा क्यों कहा ? मुष-चुराना । अमोषीत् । कुष्-निष्कर्ष अर्थ में है । अकोषीत् । वर्जन ऐसा क्यों कहा ? खगै-हंसना । अखगीत् । रगे-शंका अर्थ में । अरगीत् ।

अमोषीत् अमोषिष्टां अमोषिषुः। कुष निष्कर्षे। अकोषीत् अकोषिष्टां अकोषिषुः। वर्जनं किं ? खगे हसने अखगीत् अखगिष्टां अखगिषुः। रगे शङ्कायां। अरगीत्। कगे नोचिते। अकगीत् अकगिष्टां अकगिषुः। ग्रहञ् उपादाने॥ अग्रहीत् अग्रहीष्टां अग्रहीषुः। इटो दीर्घो ग्रहेरपरोक्षायामिति दीर्घः। वह परिकल्कने। रह त्यागे। अरहीत् अरहिष्टां अरहिषुः। टुवमु उद्गिरणे। अवमीत्। क्रमु पादविक्षेपे। अक्रमीत् अक्रमिष्टां अक्रमिषुः। चमु छमु जमु झमु जिमु अदने। अचमीत्। अच्छमीत्। अजमीत्। अझमीत्। अजिमीत्। अजिमिष्टां अजिमिषुः। व्यय क्षये। अव्ययीत् अव्ययिष्टां अव्ययिषुः। अय वय मय पय तय चय रय णय गतौ। आयीत्। अवयीत्। अमयीत्। अपयीत्। अतयीत्। अचयीत्। अरयीत्। अनयीत् अनयिष्टां अनयिषुः। कण निमीलने। अकणीत्। क्षण क्षुण हिंसायां। अक्षणीत्। श्वस प्राणने। अश्वसीत् अश्वसिष्टां अश्वसिषुः। हनु हिंसागत्योः। अद्यतन्यां च वधादेशः। अवधीत् अवधिष्टां अवधिषुः। इत्यादि। टुणदि समृद्धौ। अनन्दीत् अनन्दिष्टां अनन्दिषुः। श्रंसु भ्रंसु अवस्रंसने। ध्वंस गतौ च। अश्रंसिष्ट अश्रंसिषातां अश्रंसिषत। अश्रंसिष्ठाः अश्रंसिषाथां अश्रंसिध्वं। अश्रंसिषि अश्रंसिष्वहि अश्रंसिष्महि। अभ्रंसिष्ट अभ्रंसिषातां अभ्रंसिषत। अध्वंसिष्ट। व्येञ् संवरणे।

सन्ध्यक्षरान्तानामाकारोऽविकरणे॥२५२॥

सन्ध्यक्षरान्तानां धातूनां आकारो भवति अविकरणे परे।

यमिरमिनम्यादन्तानां सिरन्तश्च॥२५३॥

एषामिडागमः सकारपूर्वो भवति परस्मैपदे सिचि परे। यमु उपरमे। अयंसीत् अयंसिष्टां अयंसिषुः। रमु क्रीडायां। अरंसीत् अरंसिष्टां अरंसिषुः।

कगे-अनुचित अर्थ में। अकगीत्। ग्रहञ् ग्रहण करना। अग्रहीत् अग्रहीष्टां अग्रहीषुः। "इटो दीर्घो ग्रहेरपरोक्षायां" इस २९० सूत्र से इट् को सर्वत्र दीर्घ हो गया है। वह—परिकल्कने। रह—त्याग अर्थ में है। अरहीत्। टुवम् उद्गिरण-उगलने अर्थ में है। वमति—अवमीत्, क्रमु-पाद विक्षेपण करना। अक्रमीत्। चमु छमु जमु झमु जिमु—खाने अर्थ में है। अचमीत्। अच्छमीत्। अजमीत्। अझमीत्। अजिमीत्। व्यय—क्षय होना। अव्ययीत्। अय, वय, मय, पय, तय, चय, रय, णय, गति अर्थ में हैं। आयीत्। अवयीत्। अमयीत्। अपयीत्। अतयीत्। अचयीत्। अरयीत्। अनयीत्। कण-निमीलन अर्थ में है। अकणीत्। क्षण क्षुण-हिंसा अर्थ में। अक्षणीत्। श्वस्—जीवित रहना। अश्वसीत्। हनु-हिंसा और गति अर्थ में है। 'अद्यतन्यां च वधादेशः' अद्यतनी में हन् को वध आदेश हो जाता है। अवधीत्। इत्यादि टुणदि धातु समृद्धि अर्थ में है। 'णो नः' सूत्र से न होकर इकार अनुबंध से 'नु' का आगम होकर अनन्दीत्। श्रंसु भ्रंसु-अवश्रंसन अर्थ में। ध्वंस-गति अर्थ में। अश्रंसिष्ट अभ्रंसिष्ट। अध्वंसिष्ट। आत्मनेपद में हैं। व्येञ्-संवरण करना।

अविकरण में संध्यक्षरांत धातु को आकार हो जाता है॥२५२॥

यम् रम् नम् और आकारांत धातु को परस्मैपद सिच् के आने पर इट् का आगम सकारपूर्वक होता है॥२५३॥

यमु-उपरम होना। अयंसीत् अयंसिष्टां अयंसिषुः। रमु-क्रीडा करना। अरंसीत् अरंसिष्टां अरंसिषुः।

व्याङ्परिभ्यो रमः ॥२५४॥

विआङ्परिभ्यः परस्य रमुधातोः परं परस्मैपदं भवति॥ व्यरंसीत्। णमु प्रह्वत्वे शब्दे। अनंसीत्। अव्यासीत् अव्यासिष्टां अव्यासिषुः। अव्यास्त अव्यासातां अव्यासत।

सणनिटः शिडन्तान्नाम्युपधाददृशः ॥२५५॥

दृशवर्जितात् नाम्युपधादनिटः शिडन्ताद्धातोः सण् भवति अद्यतन्यां परतः। सिचोपवादः। रिश रुश हिंसायां। क्रुश आह्वाने गाने रोदने च। लिश विच्छ गतौ। क्रुश ह्वरणदीप्त्योः।

रिशिरुशिक्रुशिलिशिविशिदिशिदृशिस्पृशिमृशिदंशेः शात् ॥२५६॥

एभ्यः परमसार्वधातुकमनिड् भवति। अरिक्षत् अरिक्षतां अरिक्षन्। अरिक्षः अरिक्षतं अरिक्षत। अरिक्षं अरिक्षाव अरिक्षाम। अक्रुक्षत् अक्रुक्षतां अक्रुक्षन्। अक्रुक्षः अक्रुक्षतं अक्रुक्षत।

सणो लोपः स्वरे बहुत्वे ॥२५७॥

सणोऽस्य लोपो भवत्यबहुत्वे स्वरे परे। अक्रुक्षम् अक्रुक्षाव अक्रुक्षाम्। विश प्रवेशने। अविक्षत्। त्विष दीप्तौ।

त्विषिपुष्यतिकृषिश्लिष्यतिद्विषिपिषिविषिशिषिशुषितुषिदुषेः षात् ॥२५८॥

एभ्यः परमसार्वधातुकमनिड् भवति। अत्विक्षत् अत्विक्षतां अत्विक्षन्। कृष विलेखने। अकृक्षत् अकृक्षतां अकृक्षन्। श्लिष आलिङ्गने। अश्लिक्षत्। द्विष अप्रीतौ। अद्विक्षत्। पिष्लृ संचूर्णने। अपिक्षत्। विष्लृ व्याप्तौ। अविक्षत्। शिष्लृ विशेषणे। तुष तुष्टौ। अतुक्षत्। दुष वैकृत्ये। अदुक्षत् अदुक्षतां अदुक्षन्। दुह प्रपूरणे।

वि और आङ् उपसर्ग से परे रम धातु परस्मैपद में होती है ॥२५४॥

व्यरंसीत्। णमु धातु नमस्कार करने और शब्द करने अर्थ में है। अनंसीत्। अव्यासीत्। अव्यासिष्टां। अव्यास्त, अव्यासातां।

दृश वर्जित, नामि उपधा से अनिट् और शिट् अंत वाली धातु को अद्यतनी में 'सण्' हो जाता है ॥२५५॥

और सिच् का अपवाद हो जाता है। सण् प्रत्यय लाने पर गुण वृद्धि नहीं होता है। रिश रुश-हिंसा करना। क्रुश-आह्वानन करना, गाना, रोना। लिश, विच्छ्-गमन करना। क्रुश-हरण और दीप्ति। विश्-प्रवेश करना। दिश-अतिसर्जन करना।

रिश् रुश् क्रुश् लिश् विश् दिश् दृश् स्पृश् मृश् और दंश् धातु अनिट् होती हैं ॥२५६॥

'छशोश्च' सूत्र से श को ष हुआ, 'षढो कः से' सूत्र से ष को क होकर सण् के स को ष होकर अरिक्षत् अरिक्षतां अरिक्षन्। अक्रुक्षत्।

अबहुत्व स्वर के आने पर सण् के अकार का लोप हो जाता है ॥२५७॥

अक्रुक्षम्। विश-प्रवेश अर्थ में। अविक्षत्। त्विष्-दीप्त होना। पुष्-पुष्ट होना।

त्विष् पुश् कृष् श्लिष् द्विष् पिष् विष् शिष् शुष् तुष् और दुष् धातु से परे असार्वधातुक में इट् नहीं होता है ॥२५८॥

अत्विक्षत्। कृष-विलेखन करना। अकृक्षत्। श्लिष्-आलिंगन करना। अश्लिक्षत्। द्विष् अप्रीति अर्थ में है—अद्विक्षत्। पिष्लृ-चूर्ण करना। अपिक्षत्। विष्लृ-व्याप्त होना। अविक्षत्। शिष्लृ—विशेष करना। तुष्-तुष्ट होना अतुक्षत्। दुष्-दुषित होना। अदुक्षत्। दुह्-प्रपूरण अर्थ में।

दहिदिहिदुहिमिहिरिहिरुहिलिहिलुहिनहिवहेर्हात् ॥२५९ ॥

एभ्यः परमसार्वधातुकमनिड् भवति। अधुक्षत् अधुक्षतां अधुक्षन्। दिह उपचये। अधिक्षत्। अनिटामिति किं ? कुष निष्कर्षे। अकोषीत् अकोषिष्टां अकोषिषुः। शिडन्तादिति किं ? अभुक्त अभुक्षातां अभुक्षत। अभुक्थाः अभुक्षाथां अभुग्ध्वं। अभुक्षि अभुक्ष्वहि अभुक्ष्महि। नाम्युपधादिति किं ? दह भस्मीकरणे। अधाक्षीत्। प्रकृत्याश्रितमन्तरङ्गं प्रत्ययाश्रितं बहिरङ्गं। "अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान्। इति धत्वं चतुर्थत्वं च। अदाग्धां अधाक्षुः। अधाक्षीः अदाग्धं अदाग्ध। अधाक्षं अधाक्ष्व अधाक्ष्म। अदृश इति किं ? दृशिर् प्रेक्षणे।

सृजिदृशोरागमोऽकारः स्वरात्परो धुटि गुणवृद्धिस्थाने ॥२६० ॥

सृजिदृशोः स्वरात्परोऽकारागमो भवति गुणवृद्धिस्थाने धुटि परे। अद्राक्षीत् अद्राष्टां अद्राक्षुः।

भृजादीनां षः ॥२६१ ॥

भृजादीनां षो भवति धुट्यन्ते च। सृज विसर्गे। अस्राक्षीत् अस्राष्टां अस्राक्षुः। इति भ्वादिः ॥ ❑

अथ अदादिगण

अदेर्घस्लृ सनद्यतन्योः ॥२६२ ॥

अदेर्घस्लृ आदेशो भवति सनद्यतन्योः परतः।

दह् दिह् दुह् मिह् रिह् रुह् लिह् लुह् नह् वह् इन हकारांत धातुओं को असार्वधातुक में इट् नहीं होता है ॥२५९ ॥

अदुह् स् त् = अधुक्षत्। दिह् उपचय अर्थ में है। अधिक्षत्। इट् रहित हो ऐसा क्यों कहा ? कुष निष्कर्ष अर्थ में है। अकोषीत्। शिडन्त हो ऐसा क्यों कहा ? भुज्-पालन करने और भोजन करने में है। अभुक्त अभुक्षातां अभुक्षत। नामि उपधा से हो ऐसा क्यों कहा ?

दह, भस्म करने अर्थ में है। अधाक्षीत् बना। 'प्रकृति से आश्रित कार्य अन्तरंग कार्य है एवं प्रत्यय के आश्रित कार्य बहिरंग कार्य है एवं अंतरंग और बहिरंग विधि में अंतरंग विधि बलवान होती है' इसलिये द को चतुर्थ अक्षर 'ध' हो गया है। अदाग्धां अधाक्षुः। दृश् को छोड़कर ऐसा क्यों कहा ? दृशिर्-देखना।

सृज् और दृश के स्वर से परे धुट् के आने पर गुणवृद्धि के स्थान में अकार का आगम हो जाता है ॥२६० ॥

अद्राक्षीत् अद्राष्टां अद्राक्षुः।

धुट् के अन्त में आने पर भृज् आदि के अन्त को षकार हो जाता है ॥२६१ ॥

सृज् धातु विसर्ग अर्थ में है। अस्राक्षीत् अस्राष्टां अस्राक्षुः।

इस प्रकार से भ्वादिगण में अद्यतनी प्रकरण समाप्त हुआ। ❑

अथ अदादि गण प्रारम्भ होता है।

सन् और अद्यतनी में अद् को घस्लृ आदेश हो जाता है ॥२६२ ॥

पुषादिगण, द्युतादि गण, लृकारानुबंध, ऋ सृ और शास् धातु से।

पुषादिद्युतादिलृकारानुबन्ध्यार्त्तिसर्त्तिशास्तिभ्यश्च परस्मै ॥२६३ ॥

एभ्योऽण् भवति अद्यतन्यां परस्मैपदे। सिचोऽपवादः। अघसत् अघसतां अघसन्। पुष पुष्टौ॥ अपुषत् अपुषतां अपुषन्। शुष शोषणे। अशुषत् अशुषतां अशुषन्। द्युत शुभ रुच दीप्तौ। अद्युतत् अद्युततां अद्युतन्। अद्युतः अद्युततं अद्युतत। अद्युतं अद्युताव अद्युताम। अशुभत्। अरुचत्। श्वित आवर्णे। अश्वितत्। षु, श्रु, द्रु, दु, ऋच्छ, गम्लृ, सृप्लृ गतौ।

अर्त्तिसर्त्योरणि ॥२६४ ॥

अर्त्तिसर्त्योर्गुणो भवति अणि परे। आरत् असरत्। शासु अनुशिष्टौ।

शासेरिदुपधाया अण्व्यञ्जनयोः ॥२६५ ॥

शासेरुपधाया इद्भवति अण्व्यञ्जनयोः परतः।

शासिवसिघसीनां च ॥२६६ ॥

निमित्तात् परः शासिवसिघसीनां सकारः षत्वमापद्यते। अशिषत्। परस्मा इति किं ? व्यद्योतिष्ट व्यद्योतिषातां व्यद्योतिषत। शीङ् स्वप्ने। अशयिष्ट। ब्रुवो वचिरिति वचिरादेशः।

अणऽसुवचिरुहाम्लिलिपिसिचिह्व ॥२६७॥

एभ्योऽण् भवति अद्यतन्यां परतः। असु क्षेपणे।

अस्यतेस्थोन्तः ॥२६८ ॥

अस्यतेरन्ते थकारागमो भवत्यणि परे। अपास्थत् अपास्थताम् अपास्थन्।

अणि वचेरोदुपधायाः ॥२६९ ॥

वचेरुपधाया ओद्भवति कर्त्तरि विहितायामद्यतन्यामणि परे। अवोचत्। अवोचत। ख्या प्रकथने।

परे अद्यतनी परस्मैपद में अण् प्रत्यय होता है ॥२६३ ॥

सिच् नहीं होता है। अघसत् अघसतां अघसन्। पुष् पुष्टि अर्थ में है। अपुषत्। शुष-शोषण करना। अशुषत्। द्युत शुभ रुच्-दीप्ति अर्थ में हैं। अद्युतत्। अशुभत्। अरुचत्। श्वित-आवरण अर्थ में है। अश्वितत्। शु श्रु द्रु दु ऋच्छ गम्लृ सृप्लृ-गति अर्थ में हैं।

अण् के आने पर ऋ और सृ को गुण हो जाता है ॥२६४ ॥

अ अर् अ त = आरत्। असरत्। शास्-अनुशासन करना।

अण् और व्यंजन के जाने पर शास् की उपधा को इकार हो जाता है ॥२६५ ॥

निमित्त से परे शास् वस् और घस् के सकार को षकार हो जाता है ॥२६६ ॥

अशिषत्। परस्मैपद में ऐसा क्यों कहा ? व्यद्योतिष्ट इसमें आत्मनेपद होने से सिच् इट् गुण सभी हो गया है।

शीङ्-सोना। अशयिष्ट। 'ब्रुवो वचि' इस ९४वें सूत्र से ब्रू को वच् आदेश हो जाता है।

अस् वच् ख्या, लिप् सिच् और ह्व धातु से अद्यतनी में अण् हो जाता है ॥२६७ ॥

अस्—क्षेपण करना। अस्यति।

अण् प्रत्यय के आने पर अस् के अंत में थकार का आगम हो जाता है ॥२६८ ॥

आस्थत् अप उपसर्ग पूर्वक—'अपास्थत्' बना।

कर्ता से अद्यतनी में अण् के आने पर वच् की उपधा को 'ओ' हो जाता है ॥२६९ ॥

अवोचत् बना। ख्या-कहना। ख्याति।

आलोपोऽसार्वधातुके ॥२७० ॥

धातोराकारस्य लोपो भवति स्वरादावगुणेऽसार्वधातुके परे। आख्यत् आख्यतां आख्यन्। लिप् उपदेहे। अलिपत्। व्यवस्थितवाधिकाराल्लिम्पादीनामात्मनेपदे वा अण् पक्षे सिच्। अलिपत अलिप्त। धुटश्च धुटि सिचो लोपः। अलिपेतां अलिप्सातां अलिपन्त अलिप्सत। अलिपथाः अलिप्थाः। अलिपेथां अलिप्साथां अलिपध्वं अलिब्ध्वं। अलिपे अलिप्सि अलिपावहि अलिप्स्वहि अलिपामहि अलिप्स्महि। षिचिर् क्षरणे। असिचत्। ह्वेञ् स्पर्धायां शब्दे च। आह्वत आह्वतां आह्वन्। आह्वत आह्वेतां आह्वन्त। हन् हिंसागत्योः।

अद्यतन्यां च ॥२७१ ॥

हन्तेर्वधिरादेशो भवति अद्यतन्यां परतः। अवधीत् अवधिष्टां अवधिषुः। 'आत्मनेपदे वा' हन्तेर्वधिरादेशो वा भवति। आङो यमहनौ स्वाङ्गकर्मकौ चेत्यात्मनेपदं भवति।

हनः ॥२७२ ॥

हन्तेरन्तस्य लोपो भवत्यद्यतन्यां सिच्यात्मनेपदे तथयोः परतः। आहत आहसातां आहसत। अवधिष्ट अवधिषातां अवधिषत ॥ इत्यादिः ॥ हु दानादनयोः।

सिचि परस्मै स्वरान्तानाम् ॥२७३ ॥

स्वरान्तानां वृद्धिर्भवति परस्मैपदे सिचि परे। नामिन एव।

असार्वधातुक में स्वरादि अगुण प्रत्यय के आने पर धातु के आकार का लोप हो जाता है ॥२७० ॥

आख्यत्। लिप्—अलिपत्।

व्यवस्थित वा के अधिकार से लिंपादि को आत्मनेपद में अण् होता है और विकल्प से सिच् होता है। अण् में—अलिपत। सिच् में अलिप्त 'धुटश्च धुटि' इस २४७ सूत्र से सिच् का लोप हो गया है। अलिप्सातां अलिप्सत। षिचिर्—क्षरण होना।

असिचत्। ह्वेञ्-स्पर्धा करना और शब्द करना-बुलाना। २५२ सूत्र से संध्यक्षर धातु को आकारांत होकर २७० से आकार का लोप होकर २६७ से अण् होकर आह्वत् बना। आह्वत। हन्-हिंसा और गति।

अद्यतनी में हन् को वध आदेश हो जाता है ॥२७१ ॥

अवधीत् 'आत्मनेपदे वा' ३६९वें सूत्र से आत्मनेपद में हन् को वध आदेश विकल्प से होता है। "आङो यमहनौ स्वाङ्गकर्मकौ च" इस नियम से आत्मनेपद हो जाता है।

हन् के नकार का लोप हो जाता है आत्मनेपद में अद्यतनी के सिच् के आने पर ॥२७२ ॥

आङ् उपसर्ग पूर्वक अट्का आगम होकर आअहत = आहत। आहसातां आहसत। पक्ष में—अवधिष्ट।

इस प्रकार से अदादिगण में अद्यतनी प्रकरण समाप्त हुआ।

अद्यतनी में जुहोत्यादि गण प्रारम्भ होता है।

हु—दान देना और भोजन करना।

परस्मैपद में सिच् के आने पर स्वरांत धातु को वृद्धि हो जाती है ॥२७३ ॥

नामि को ही वृद्धि होती है।

मार्गदर्शक आचार्य श्री सुविधिसागर जी महाराज

उतोऽयुरुणुस्नुक्षुहुवः ॥२७४ ॥

युरुणुस्नुक्षुहुवर्जितादेकस्वरादुदन्तात्परमसार्वधातुकमनिड् भवति। अहौषीत् अहौष्टां अहौषुः। अधात् अधातां अधुः। स्थादोरिरद्यतन्यामात्मने। इति इकारादेशः।

स्थादोश्च ॥२७५ ॥

स्थादासंज्ञकयोर्गुणो न भवति अनिटि सिजाशिषीश्चात्मनेपदे परे। इति गुणनिषेधः। ह्रस्वाच्चानिट इति सिचो लोपः। अधित अधिषातां अधिषत। अधिथाः अधिषाथां अधिढ्वं। अधिषि अधिष्वहि अधिष्महि। समस्थित समस्थिषातां समस्थिषत। इति जुहोत्यादिः॥ दिवु क्रीडाविजिगीषादीति। अदेवीत् अदेविष्टां अदेविषुः।

स्वरतिसूतिसूयत्यूदनुबन्धाच्च ॥२७६ ॥

एभ्यः परपसार्वधातुकमनिड् भवति वा। षूङ प्राणिप्रसवे। असोष्ट असोषातां असोषत। असोष्ठाः आसोषाथाम्।

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढः ॥२३९ ॥*

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढो भवति। असोढ्वं। असोषि असोष्वहि असोष्महि। असविष्ट असविषाताम्। असविषत। दहि दिहि दुहि इत्यादिनानिट्॥

यु, रु, णु, स्नु, क्षु और णु को छोड़कर उकारांत एक स्वर वाली धातु को असार्वधातुक में इट् नहीं होता है ॥२७४ ॥

अहौषीत् अहौष्टां अहौषुः। अधात्। सूत्र २४१ से स्था और दा संज्ञक धातु को आत्मनेपद में अद्यतनी में इकार हो जाता है।

अनिट् आशिष् सिच् के परे आत्मनेपद में स्था और दा संज्ञक को गुण नहीं होता है ॥२७५ ॥

इस सूत्र से गुण का निषेध हो गया है। 'ह्रस्वश्चानिटः' सूत्र २४३ से सिच् का लोप हो गया। अधित अधिषातां अधिषत। समस्थित समस्थिषातां।

इस प्रकार से अद्यतनी में जुहोत्यादि गण समाप्त हुआ है।

अद्यतनी में दिवादि गण प्रारंभ होता है।

दिवु—क्रीड़ा विजिगीषा आदि अर्थ में है।

अदेवीत् अदेविष्टां अदेविषुः।

षुञ् षूङ धातु और ऊकारानुबंध धातु से असार्वधातुक में अनिट् विकल्प से होता है ॥२७६ ॥

षूङ् प्राणि प्रसव अर्थ में है। अनिट् पक्ष में—असोष्ट-असोषातां असोषत। असो ध्वं है।

नाम्यंत धातु से आशीः अद्यतनी परोक्षा में ध को 'ढ' हो जाता है ॥२३९ ॥

इससे असोढ्वं बना। इट् पक्ष में—असविष्ट असविषातां।

"दहिदिहिदुहि इत्यादि" सूत्र से इट् नहीं होता है।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

सेट्सु वा ॥२७७ ॥

नाम्यन्ताद्धातोः परस्य सेटामाशीरद्यतनीपरोक्षाणां धकारस्य ढो भवति वा। असविद्ढ्वं असविध्वं।

नहेर्द्धः ॥२७८ ॥

नहेर्हकारस्य धो भवति धुट्यन्ते च। अनात्सीत् अनाद्धां अनात्सुः। अनात्सीः अनाद्धं अनाद्ध। अनात्सं अनात्स्व अनात्स्म। अनद्ध अनत्सातां अनत्सत। अनद्धाः अनत्साथां अनद्ध्वं। अनत्सि अनत्स्वहि अनत्स्महि। इति दिवादिः।

स्तुसुधूञ्भ्यः परस्मै ॥२७९ ॥

स्तुसुधूञ्भ्य इडागमो भवति परस्मैपदे सिचि परे। अस्तावीत् अस्ताविष्टां अस्ताविषुः। धूञ् कम्पने। अधावीत्। उदनुबन्धत्वाद्विकल्पेनेट्। आशिष्ट आशिषातां आशिषत। आष्ट आक्षातां आक्षत। अचैषीत् अचैष्टां अचैषुः। अचेष्ट अचेषातां अचेषत। इति स्वादिः।

अदितुदिनुदिक्षुदिस्विद्य-
तिविद्यतिविन्दतिविनत्तिछिदिभिदिहदिशदिसदिपदिस्कन्दिखिदेर्दात् ॥२८० ॥

एभ्यः षोडशभ्यः परमसार्वधातुकमनिड् भवति।

व्यञ्जनान्तानामनिटाम् ॥२८१ ॥

नाम्यंत धातु से आशीः अद्यतनी परोक्षा में इट् सहित होने पर धकार को ढकार विकल्प से होता है ॥२७७ ॥

असविद्ढ्वं, असविध्वं। अट् नह सिच् 'ई' दि।

नह् के हकार को धुट् अन्त में धकार हो जाता है ॥२७८ ॥

'अघोषे प्रथमः' से प्रथम अक्षर होकर उपधा को दीर्घ होकर अनात्सीत् अनाद्धां अनात्सुः। आत्मनेपद में—अनद्ध अनत्सातां अनत्सत।

इस प्रकार से अद्यतनी में दिवादिगण समाप्त हुआ है।

अद्यतनी में स्वादिगण प्रारम्भ होता है।

परस्मैपद में सिच् के आने पर स्तु, सु और धू धातु से इट् का आगम होता है ॥२७९ ॥

अस्तावीत् अस्ताविष्टां। धूञ्—कंपित होना। अधावीत्। उदनुबंध में विकल्प से इट् होता है। अशूङ्व्याप्तौ आशिष्ट आशिषातां। अनिट् पक्ष में—आष्ट आक्षातां आक्षत। चिञ्—चयन अर्थ में है। अचैषीत् अचैष्टां अचैषुः। अचेष्ट अचेषातां।

इस प्रकार से अद्यतनी में स्वादि गण समाप्त हुआ।

अद्यतनी में तुदादिगण प्रारंभ होता है।

अद् तुद् नुद् क्षुद् स्विद् विद् विन्द् विद् छिद् भिद् हद् शद् सद् पद् स्कंद और खिद् इन सोलह दकारांत धातु से असार्वधातुक में इट् नहीं होता है ॥२८० ॥

परस्मैपद में सिच् के आने पर व्यंजनान्त अनिट् धातु की वृद्धि हो जाती है ॥२८१ ॥

व्यञ्जनान्तानामनिटां धातूनां वृद्धिर्भवति परस्मैपदे सिचि परे। तुद व्यथने। अतौत्सीत् अतौत्तां अतौत्सुः। अतुत्त अतुत्सातां अतुत्सत। मृड् प्राणत्यागे।

ऋतोऽवृङ्वृञः ॥२८२॥

वृङ्वृञ्वर्जितादेकस्वरादृतः परमसार्वधातुकमनिड् भवति।

ऋदन्तानां च ॥२८३॥

ऋदन्तानां च गुणो न भवति अनिटि सिजाशिषोश्चात्मनेपदे परे। अमृत अमृषातां अमृषतां अमुचत् अमुचतां अमुचन्।

सिजाशिषोश्चात्मने ॥२८४॥

नामिन उपधायाः सिच्यानात्मनेपदे परे आशिषि चानिटि गुणो न भवति कर्तरि विहितायामद्यतन्यां परस्मैपदे। अमुक्त अमुक्षातां अमुक्षत।

स्पृशमृशकृशतृपिदृपिसृपिभ्यो वा ॥२८५॥

एभ्यः सिज्वा भवति अद्यतन्यां।

स्पृशादीनां वा ॥२८६॥

स्पृशादीनां स्वरात्परः अकारागमो भवति वा गुणवृद्धिस्थाने धुटि परे॥ स्पृश संस्पर्शने॥ अस्प्राक्षीत् अस्प्राष्टां अस्प्राक्षुः। अस्पार्क्षीत् अस्पार्ष्टां अस्पार्क्षुः। सण इति सण्। अस्पृक्षत्। मृश आमर्शने॥ अम्प्राक्षीत् अम्प्राष्टां अम्प्राक्षुः। अमार्क्षीत् अमार्ष्टां अमार्क्षुः। अमृक्षत्। कृश विलेखने।

तुद्—व्यथित होना। अतौत्सीत् अतौत्तां अतौत्सुः। आत्मनेपद में वृद्धि नही होने से सिच् का लोप होकर अतुत्त, अतुत्सातां अतुत्सत।

मृड्—प्राण त्याग करना।

वृङ् वृञ् को छोड़कर एक स्वर वाले ऋकारांत धातु अनिट् होते हैं॥२८२॥

आत्मनेपद में अनिट् में सिच् आशिष के आने पर ऋकारांत को गुण नहीं होता है॥२८३॥

ह्रस्वान्त से स को लोप होता है अमृत अमृषातां अमृषत। मुच्—अमुचत्।

आत्मनेपद में सिच् और आशिष के आने पर अनिट् में नामि उपधा को गुण नहीं होता है॥२८४॥

अमुक्त अमुक्षातां अमुक्षत।

स्पृश्, मृश् कृश् तृप् दृप् सृप् से परे अद्यतनी में सिच् विकल्प से होता है॥२८५॥

स्पृश आदि धातु को स्वर से परे गुण वृद्धि के स्थान में धुट के आने पर अकार का आगम विकल्प से होता है॥२८६॥

स्पृश—संस्पर्श करना। गुण होने पर अकार का आगम होने से अस्प्राक्षीत् अस्प्राष्टां अस्प्राक्षुः। वृद्धि होकर अकार का आगम होने पर अस्पार्क्षीत् अस्पार्ष्टां अस्पार्क्षुः। सण् प्रत्यय में—अस्पृक्षत् बना।

मृश्—छूना। अम्प्राक्षीत्। अमार्क्षीत्। अमृक्षत्। कृश्—विलेखन अर्थ में है—अक्राक्षीत्। अकार्क्षीत् अकृक्षत्। तृप्—प्रीणन अर्थ में। अत्राप्सीत्। अतार्प्सीत् 'पुषादित्वात्' अण् होने से 'अतृपत्'। दृप्—हर्ष और मोहन अर्थ में। अद्राप्सीत्। अदार्प्सीत्। अदृपत्।

अक्राक्षीत् अक्राष्टां अक्राक्षुः। अकार्क्षीत् अकार्ष्टां अकार्क्षुः। अकृक्षत्॥ तृपिदृप्योर्वा॥ तृप मीणने॥ अत्राप्सीत् अत्राप्तां अत्राप्सुः। अतार्प्सीत्। पुषादित्वादण् भवति। अत्रपत्। दृप हर्षमोहनयोः। अद्राप्सीत् अद्राप्ताम् अद्राप्सुः अदार्प्सीत्। अदृपत् एतौ पुषादी। सृप्ल् वि गतौ। अस्राप्सीत्। असार्प्सीत्। असृपत्। इति तुदादिः।

इरनुबन्धाद्वा ॥२८७॥

इरनुबन्धाद्धातोर्वा अण् भवति। कर्तर्यद्यतन्यां परस्मैपदे परे। अरुधत् अरुधतां अरुधन्। अरौत्सीत् अरौद्धां अरौत्सुः। अरौत्सीः अरौद्धं अरौद्ध। अरौप्सं अरौत्स्व अरौत्स्म। अणभावपक्षे सिच्।

राधिरुधिक्रुधिक्षुधिबन्धिशुधिसिध्यतिबुध्यतियुधिव्यधिसाधेर्धात् ॥२८८॥

एभ्यः परमसार्वधातुकमनिड् भवति। इत्यनेन पूर्वोदाहरणेषु नेट्।

युजिरुजिरञ्जिमुजिभजिभञ्जिसञ्जित्यजिभ्रस्जियजिमस्जिसृजिनिजिविजिष्वञ्जेर्जात् ॥२८९॥

मार्गदर्शक – आचार्य श्री सुविधिसागर महाराज

एभ्यः परमसार्वधातुकमनिड् भवति। अभुक्त अभुक्षातां अभुक्षत। इरनुबन्धाद्वेत्यण्। अयुजत् अयुजतां अयुजन्। अणभावे अयौक्षीत् अयौक्तां अयौक्षुः। अयुक्त अयुक्षातां अयुक्षत। इति रुधादिः। तनु विस्तारे। अतनीत् अतनिष्टां अतनिषुः। अतनिष्ट अतनिषातां अतनिषत। अमनिष्ट अमनिषातां अमनिषत। अकार्षीत् अकार्ष्टां अकार्षुः। अकृत अकृषातां अकृषत इत्यादि। इति तनादिः। अक्रैषीत् अक्रैष्टां अक्रैषुः। अक्रेष्ट अक्रेषातां अक्रेषत। नञा निर्दिष्टमनित्यत्वात्।

ये दो धातु पुषादिगण की हैं। सृप्ल्—गति अर्थ में है। अस्राप्सीत्। असार्प्सीत्। असृपत्।

इस प्रकार से अद्यतनी में तुदादिगण समाप्त हुआ।

अद्यतनी में तुदादि गण प्रारंभ होता है।

कर्ता से विहित अद्यतनी के परस्मैपद में इर् अनुबंध धातु से विकल्प से अण् प्रत्यय होता है ॥२८७॥

रुधिर्—आवरण करना। अरुधत् अरुधातां। अण् के अभाव में-सिच्, ईत्, वृद्धि होकर अरौत्सीत् अरौद्धां अरौत्सुः।

राध् रुध् क्रुध् क्षुध् बन्ध् शुध् सिध् बुध् युध् व्यध् और साध् इन धकारांत धातु से असार्वधातुक में अनिट् हो जाता है ॥२८८॥

युज् रुज् रञ्ज् भुज् भज् भञ्ज् सञ्ज् त्यज् भ्रस्ज् यज् मस्ज् सृज् निज् विज् और स्वञ्ज् इन जकारांत धातु से परे असार्वधातुक में इट् नहीं होता है ॥२८९॥

अभुक्त अभुक्षातां अभुक्षत। इन सभी धातुओं में इट् का अनुबंध हो जाने से विकल्प से अण् होता है। अयुजत्। अण् के अभाव में अयौक्षीत् अयौक्तां अयौक्षुः। आत्मनेपद में—आयुक्त अयुक्षातां अयुक्षत।

इस प्रकार से अद्यतनी में रुधादिगण समाप्त हुआ।

अद्यतनी में तनादिगण प्रारंभ होता है।

तनु-विस्तारे—अतनीत् अतनिष्टां। अतनिष्ट। मनुङ् अवबोधन अर्थ में—अमनिष्ट। कृ—अकार्षीत्। आत्मने अकृत।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

श्लोकः

ऋदृवृङ्वृञां सनीङ् वा स्यादात्मने च सिजाशिषोः ।
संयोगादेर्ऋतो वाच्यः सुडसिद्धो बहिर्भवः ॥१॥

संयोगादेः ऋतः—स्मृ आध्याने इत्यस्य यथा । तर्हि 'सुड् भूषणे संपर्युपात्' इत्यनेन कृञो धातोः सुटि प्रत्यये समागते सति संस्कृ उपस्कृ इत्यत्र संयोगो वर्तते, तत्रापि इट् प्रत्ययो भविष्यति विकल्पेन; नैवं यतः कारणात् सुडसिद्धो बहिर्भवः । सुट् प्रत्यय आगतोऽपि अनागत इव वर्तते । तत्कारणगर्भितं विशेषणमाह—कथंभूतः सुट् ? बहिर्भवो बहिरङ्गः । असिद्धं बहिरङ्गमन्तरङ्गे इति न्यायादित्यर्थः ।

इति इड्विकल्पेन । पुनरपि,

ऋदृवृङ्वृञोपि वा दीर्घो न परोक्षाशिषोरिटः ।
न परस्मै सिचि प्रोक्त इति योगविभञ्जनात् ॥२॥

इति इटो दीर्घो विकल्पेन । वृङ् सभक्तौ । अवृत अवृषातां अवृषत । अवरिष्ट अवरिषातां अवरिषत । अवरीष्ट अवरीषातां अवरीषत । ग्रहीङ् उपादाने ।

इटो दीर्घो ग्रहेरपरोक्षायाम् ॥२९०॥

ग्रहेः परस्य इटो दीर्घो भवति अपरोक्षायां । अग्रहीत् अग्रहीष्टां अग्रहीषुः । अग्रहीष्ट अग्रहीषातां अग्रहीषत । इति क्र्यादिः ।

इस प्रकार से तनादिगण समाप्त हुआ ।

अद्यतनी में क्र्यादिगण प्रारंभ होता है ।

क्री—अक्रैषीत् अक्रैष्टां । आत्मनेपद में—अक्रेष्ट अक्रेषातां । अर्थ—ऋकारांत वृङ् वृञ् धातु को सन् के आने पर, आत्मनेपद में एवं सिच् आशिष के आने पर इट् विकल्प से होता है ।

संयोगादि ऋकारांत से—स्मृ—धातु आध्यान—स्मरण अर्थ में है। ऐसे ही "सुड् भूषणे संपर्युपात्" सूत्र से सं, परि, उप उपसर्ग के योग में कृ धातु से सुट् प्रत्यय के आने पर 'संस्कृ' उपस्कृ इस प्रकार कृ धातु भी संयोगादि ऋदन्त बन गई । वहाँ पर भी विकल्प से इट् होने वाला था । किन्तु नहीं हुआ क्योंकि 'सुडसिद्धो बहिर्भवः' इस श्लोकार्थ के अन्तिम चरण के नियम से सुट् प्रत्यय होने पर भी नहीं हुये के समान है । उस कारण से गर्भित विशेषण को कहते हैं । सुट् कैसा है ? बाहर में होने वाला बहिरंग कहलाता है । 'अन्तरंग के होने पर बहिरंग असिद्ध हो जाता है' इस न्याय से ऐसा अर्थ होता है ।

इस प्रकार से यहाँ इट् विकल्प से होता है । पुनरपि ।

श्लोकार्थ—वृङ् वृञ् को ऋकारांत धातु से परोक्षा और आशिष के इट् को विकल्प से दीर्घ हो जाता है ।

इस नियम से विकल्प से इट् दीर्घ हो जाता है । वृङ् संभक्ति अर्थ में है । जब इट् नहीं हुआ तब अवृत अवृषातां अवृषत । इट् होने पर दीर्घ नहीं हुआ । अवरिष्ट । इट् को दीर्घ करने पर अवरीष्ट अवरीषातां अवरीषत । गृहीञ्—ग्रहण करना ।

अपरोक्षा में ग्रह धातु से परे इट् को दीर्घ हो जाता है ॥२९०॥

अग्रहीत् अग्रहीष्टां अग्रहीषुः । अग्रहीष्ट ।

इस प्रकार से अद्यतनी में क्र्यादि गण समाप्त हुआ ।

श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण् कर्त्तरि ॥२९१ ॥

एभ्यश्चण् भवति कर्त्तर्यद्यतन्यां परतः ।

चण् परोक्षाचेक्रीयितसनन्तेषु ॥२९२ ॥

चणादिषु धातोर्द्विर्वचनं भवति । अभ्यासस्यादिव्यञ्जनमवशेष्यमिति अनादेर्लोपः । भज श्रिञ् सेवायां । अशिश्रियत् । अदुद्रुवत् अदुद्रुवतां । असुस्रुवत् । कमु कान्तौ ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

कवर्गस्य चवर्गः ॥२९३ ॥

अभ्यासकवर्गस्य चवर्गो भवति आन्तरतम्यात् । अचकमत् । इति अभ्यासो धातुवत् । पक्षे अचीकमत् ।

इन्यसमानलोपोपधाया ह्रस्वश्चणि ॥२९४ ॥

समानलोपवर्जितस्य लघ्वन्तस्योपधाया ह्रस्वो भवति लघुनि धात्वक्षरे इनि चण्परे ।

दीर्घो लघोरस्वरादीनाम् ॥२९५ ॥

समानलोपवर्जितस्य लघ्वन्तस्य दीर्घो भवति लघुनि धात्वक्षरे इनि चण्परे । कारितस्य लोपः । अचूचुरत् अचूचुरतां अचूचुरन् । असमानलोपोपधाया इति किम् ? क्षिप क्षान्तौ । अचिक्षिपत् । क्षल शौचे । अचिक्षलत् ।

अद्यतनी में चुरादि गण प्रारम्भ होता है ।

अद्यतनी से कर्ता में श्रि, द्रु, स्रु, कम् और कारित प्रत्ययान्त धातुओं से 'चण्' प्रत्यय होता है ॥२९१ ॥

अट् श्रि दि ।

चण् प्रत्यय, परोक्षा, ये क्रीयित और सन्नंत के आने पर धातु को द्वित्व होता है ॥२९२ ॥

अ श्रि श्रि त् 'अभ्यासस्यादिव्यञ्जनमवशेष्यं' सूत्र से अभ्यास को आदि व्यंजन शेष रहकर अन्त व्यञ्जन का लोप भज् श्रिञ्—सेवा अर्थ में । इवर्ण को इय् होकर चण् का अकार शेष रहकर अशिश्रियत् बना । द्रु—अदुद्रुवत् । अदुद्रुवतां अदुद्रुवन् । असुस्रुवत् । कमु—कांत होना ।

अट् क कम् अत्

क्रम से अभ्यास के कवर्ग को चवर्ग हो जाता है ॥२९३ ॥

अचकमत् ।

समान लोप वर्जित लघ्वन्त उपधा को लघु धात्वक्षर इन् चण् के आने पर ह्रस्व हो जाता है ॥२९४ ॥

लघु धात्वक्षर इन् चण् के आने पर समान लोप वर्जित लघ्वन्त को दीर्घ हो जाता है ॥२९५ ॥

कारित प्रत्यय का लोप हो जाता है । चुर् चुर् इन् चण् दि = अचूचुरत् । समान लोप वर्जित लघ्वन्त उपधा को ऐसा क्यों कहा ? क्षिप्-क्षांति अर्थ में है । अचि क्षिपत् । क्षल्-अचि क्षलत् ।

अलोपे समानस्य सन्वल्लघुनीनि चण्परे ॥२९६ ॥

समानस्यालोपे सति लघुनि धात्वक्षरे अभ्यासस्य सन्वत्कार्यं भवति इनि चण्परे । किं सन्वत्कार्यं ?

सन्यवर्णस्य ॥२९७ ॥

अभ्यासावर्णस्य इत्वं भवति सनि परे । अपीपलत् अपीपलतां अपीपलन् । अलोपे समानस्येति किं ? अदन्ताः कथं वाक्यप्रबन्धे इत्यादयः ।

धातोश्च ॥२९८ ॥

अनेकाक्षरस्य धातोरन्ते स्वरादेर्लोपो भवति इनि परे । अचकथत् अचकथतां अचकथन् । एवं रच प्रयत्ने । व्यररचत् व्यररचतां व्यररचन् । इत्यादि । समानस्येति किम् ? पटुमाचष्टे पटुं करोति तत्करोति तदाचष्टे इति इन् । अपीपटत् । वृद्धौ सन्ध्यक्षरलोपः । रूप रूपक्रियायां । व्यरुरूपत् व्यरुरूपतां व्यरुरूपन् । लघुनि धात्वक्षरे इति किं ? तर्ज भर्त्स सन्तर्जने । अततर्जत अततर्जेतां अततर्जन्त । संयोगविसर्गानुस्वारपरोऽपि गुरुः स्याद् ह्रस्वः । अबभर्त्सत अबभर्त्सेताम् अबभर्त्सन्त । वृङ् वरणे । अवीवरत् अवीवरतां अवीवरन् । अततन्त्रत् ।

स्वरादेर्द्वितीयस्य ॥२९९ ॥

स्वरादेर्धातोर्द्वितीयावयवस्य द्विर्वचनं भवति । तत्र च ।

न नबदराः संयोगादयोऽये ॥३०० ॥

स्वरादेर्धातोर्द्वितीयावयवस्य संयोगादयो नबदरा न द्विरुच्यन्ते न तु ये परे । अर्च पूजायां । आर्चिचत् आर्चिचतां आर्चिचन् । एवं अर्ह पूजायां । आर्जिहत् ।

समान के अलोप होने पर लघु धात्वक्षर के आने पर अभ्यास को सन्वत् कार्य होता है इन् चण् के आने पर ॥२९६ ॥

सन्वत् कार्य क्या है ?

सन् के आने पर अभ्यास के अकार को इकार हो जाता है ॥२९७ ॥

अपीपलत् । अलोप में असमान को ऐसा क्यों कहा ? अदन्त धातु में 'कथ'—कहता है ।

इन् के आने पर अनेकाक्षर धातु के अंत स्वर का लोप हो जाता है ॥२९८ ॥

अचकथत् । रच—प्रयत्न करना-अररचत् = व्यररचत् । समानस्य ऐसा क्यों कहा ? पटुं आवष्टे, पटुं करोति है "तत्करोति तदाचष्टे इन्" इस सूत्र से इन् होकर द्वित्व होकर अपीपटत् । वृद्धि में संध्यक्षर का लोप हो जाता है । रूपृ-धातु रूप क्रिया अर्थ में है । व्यरु रूपत्—अभ्यास को ह्रस्व हुआ है । लघु धात्वक्षर में ऐसा क्यों कहा है ? तर्ज भर्त्स-संतर्जन करना अततर्जत । 'संयोगविसर्गानुस्वार परोपि' से गुरु ह्रस्व हो गया अवभर्त्सत । वृङ् वरण अर्थ में है । अवीवरत् । अततन्त्रत् ।

स्वरादि धातु के द्वितीय अवयव को द्वित्व होता है ॥२९९ ॥

और उसमें—

स्वरादि धातु के द्वितीय अवयव के संयोगादि 'न ब द र' अक्षर द्वित्व नहीं होते हैं और य प्रत्यय के परे भी द्वित्व नहीं होते हैं ॥३०० ॥

अर्च—पूजा करना । अर्च च त् 'सन्यवर्णस्य' सूत्र २९७ से इकार होकर आर्चिचत् । अर्हपूजा योग्य है—आर्जिहत् ।

न शासृनुबन्धानाम् ॥३०१ ॥

शास ऋदनुबन्धानां चोपधाया ह्रस्वो न भवति इनि चण्परे । अशशासत् अशशासताम् अशशासन् । ढौकृ तौकृ गतौ । अडुढौकत अडुढौकेतां अडुढौकन्त । अतुतौकत । शासेरिति किं ? आङः शासूङ् इच्छायां । आशीशसत् भ्राज् भ्राष् दीप्तौ ।

भाषदीपजीवमीलपीडकणवणभणश्रणमणहेठलुपां वा ॥३०२ ॥

एषामुपधाया ह्रस्वो भवति वा इनि चण्परे । भाष् व्यक्तायां वाचि । दीप दीप्तौ । जीव प्राणधारणे । मील निमेषणे । पीड गहने । कण वण भण श्रण मण शब्दे । हेठ गतौ । लुप्लृ छेदने अबिभ्रजत् अबिभ्रजतां अबिभ्रजन् । अबिभ्रजत । अबिभ्राजत् अबभ्राजत । अबिभ्रशत् । अबिभ्रशत । अबभ्राशत् । अबभ्राशत । अबिभषत । अबभाषत । अदीदिपत् । अदिदीपत् । अजीजिवत् । अजिजीवत् । अमीमिलत् । अमिमीलत् । अपिपीडत् । अपीपिडत् । अचीकणत् । अचकाणत् । अवीवणत् । अववाणत् । अबीभणत् । अबभाणत् । अमीमणत् । अममाणत् । अशीश्रणत् । अशश्राणत् । अजीहेठत् । अजिहेठत् । अलूलुपत् अलुलूपत् । चिति स्मृत्यां । अचिचिन्तत् । स्फुट परिहासे ।

शिट्परो घोषः ॥३०३ ॥

शिटः परो घोषोऽवशेष्यो भवति । शिटो लोप इत्यर्थः । अपुस्फुटत् । लक्ष दर्शनाङ्कनयोः । अललक्षत् । भक्ष अदने । अबभक्षत् । कुट्ट अनृतभाषणे । अचुकुट्टत् । लड उपसेवायां । अलीलडत् । मिदि तिल स्नेहने । अमिमिन्दत् । अतितिलत् । ओलडि उत्क्षेपे । अललण्डत् । पीड अवगाहने ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

शास और ऋदनुबंध की उपधा को इन् चण् के आने पर ह्रस्व नहीं होता है ॥३०१ ॥

अशशासत् । ढौकृ, तौकृ-गति अर्थ में हैं । अडुढौकत अतुतौकत । शासेः ऐसा क्यों कहा ? आङ्पूर्वक शासूङ् धातु-इच्छा अर्थ में है । आशीशसत् । भ्राज् भ्राष्-दीप्ति अर्थ में हैं ।

भ्रण भ्राष भाष, दीप, जीव, मील, पीड, कण, वण, भण, श्रण, मण, हेठ और लुप इन धातु की उपधा को इन् चण् के आने पर विकल्प से ह्रस्व होता है ॥३०२ ॥

भाष-स्पष्ट बोलना । दीप्-दीप्त होना । जीव-प्राणधारण करना । मील-वंद करना । पीड—गहन । कण वण भण श्रण मण-शब्द करना । हेठ-गमन करना । लुप्लृ-छेदन करना । भ्राज्-अबिभ्रजत् । अबभ्राजत् । अबभ्राजत । अबिभ्रषत । अबभ्राषत् । अबिभ्राषत् । अबिभाषत् अबभाषत । अदिदीपत् । अदीदिपत् । अजीजिवत् अजिजीवत् । अमीमिलत् । अमिमीलत् । अपिपीडत, अपीपिडत् । अचीकणत् । अचकाणत् । अवीवणत् अववाणत् । अबीभणत्, अबभाणत् । अमीमणत् अममाणत् । अशिश्रणत् । अशश्राणत् । अजीहेठत् अजिहेठत् । अलूलुपत् अलुलूपत् । चिति-स्मृति अर्थ में है । अचिचितत् । स्फुट-खिलना ।

शिट् के परे अघोष अवशेष रहता है ॥३०३ ॥

अर्थात् शिट् का लोप हो जाता है । अपुस्फुटत् । लक्ष-दर्शन और अंकन अर्थ में है । अललक्षत् । भक्ष्-भोजन करना । अबभक्षत् । कुट्ट-झूठ बोलना । अचुकुट्टत् । लड्-उपसेवा अर्थ में—अलीलडत् । मिदि और तिल-स्नेह करना । अमिमिन्दत् । अतितिलत् । ओलडि-उत्क्षेपण करना—अललण्डत् । पीड-अवगाहन करना अपीपिडत् । नट-अवस्यंदने-अनीनटत् । वध-संयमन करना । अवीबधत् । चुट् छुट् कुट्-छेदन करना । अचूचुटत् अचूछुटत् अचूकूटत् । पुट् चुट-अल्पीभाव अर्थ में है । अपूपुटत् । अचूचुटत् । मुट्-चूर्ण करना, अमूमुटत् । घट-चलना, अजीघटत् । छद, षद, संवरण करना अची छदत्

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

अपीपिडत्। नट अवस्यन्दने। अनीनटत्। बध संयमने। अबीबधत्। चुट छुट कुट छेदने। अचूचुटत्। अचूछुटत्। अचूकुटत्। पुट चुट अल्पीभावे। अपूपुटत्। अचूचुटत्। मुट चूर्णने। अमूमुटत्। घट चलने। अजीघटत्। छद षद संवरणे। अचीछदत्। असीषदत्। क्षिप क्षान्तौ। अचिक्षिपत्। नक्क धक्क पिशि नाशने। अननक्कत्। अदधक्कत् अपिपिंशत्। चक्क चुक्क व्यथने। अचचक्कत् अचुचुक्कत्। क्षल शौचे। अचिक्षलत् चुद संचोदने। अचूचुदत्। गुडि सुजि जँसि पल रक्षणे। अजुगुण्डत्। असुसुञ्जत। अजजंसत् अजजंसतां अजजंसन्। अपीपलत्। तिल प्रतिष्ठायां। अतीतिलत्। तुल उन्माने। अतूतुलत् मूल रोहणे। अमूमुलत्। मान पूजायां। अमीमनत्। श्लिष श्लेषणे। अशिश्लिषत्। जप मानसे। अजीजपत्। ज्ञप मानुबन्धे। अजिज्ञपत्। व्यय क्षये। अविव्ययत्। चूर्ण संकोचने। अचुचूर्णत्। पूज पूजायां। अपुपूजत्। अर्क्कईड स्तवने। आर्चिक्कत्। ऐडिडत्। शुठ आलस्ये। अशूशुठत्। शुठि शोषणे। अशुशुण्ठत्। पचि विस्तारवचने। अपपञ्चत्। तिज निशामने। अतीतिजत्। वर्ध छेदनपूरणयोः। अववर्धत्। कुबि आच्छादने। अचुकुंबत्। लुबि तुबि अर्दने। अलुलुम्बत्। अतुतुम्बत्। म्रक्ष म्लक्ष रक्षणे। अममक्षत्। अमम्लक्षत्। इल प्रेरणे। ऐलिलत्। लुण्ट स्तेये। अलुलुण्टत्। छर्द वमने। अचछर्दत्। गुडि वेष्टने। अजुगुण्डत्। गर्द अभिकाङ्क्षायां। अजगर्दत्। रुष रोषणे। अरूरुषत्। मडि भूषायां हर्षे च। अममण्डत्। श्रण दाने। अशिश्रणत्। भडि कल्याणे। अबभण्डत्। तत्रि कुटुम्बधारणे। अततन्त्रत्। मत्रि गुप्तभाषणे। अममन्त्रत्। विद संवेदने। अवीविदत्। दंश दशने। अददंशत्। रूप रूपणे। अरुरूपत्। भ्रूण आशायां। अबुभ्रूणत्। शठ श्लाघायां। अशीशठत्। स्यम वितर्के। असिस्यमत्। गूरी उद्यमे। अजूगुरत्। कुत्स अवक्षेपणे। अचुकुत्सत्। कूट प्रमादे। अचूकुटत्। वञ्च प्रलंभने। अववञ्चत्। मद तृप्तियोगे। अमीमदत्। दिव परिकूजने। अदीदिवत्। कुस्म कुस्मयने। अचुकुस्मत्। चर्च अध्ययने। अचचर्चत्। कण निमीलने। अचीकणत्। जसु ताडने। अजीजसत्। पष बन्धने। अपीपषत्। अम रोगे। आमिमत्। चट स्फुट भेदने। अचीचटत् अपुस्फुटत्। घुषिर् शब्दे। अजूघुषत्। लस शिल्पयोगे। अलीलसत्। भूष अलङ्कारे। अबूभुषत। रक लक आस्वादने। अरीरकत्। अलीलकत्। लिगि विचित्रीकरणे। अलिलिङ्गत्। मुद संसर्गे। अमूमुदत्। मुच प्रमोचने। अमूमुचत्। ग्रस कवलग्रहणे। अजिग्रसत्। पूरी आप्यायने। अपूपुरत्।

असीषदत्। क्षिप-क्षांति करना, अचिक्षिपत्। नक्क धक्क पिशि-नाश होना, अननक्कत्। अदधक्कत। अपि-पिंशत्। चक्क चुक्क-व्यथित होना, अचचक्कत्। अचुचुक्कत् क्षण शुद्ध होना, अचिक्षलत्। चुद-संचोदन करना। किसी कार्य के लिये प्रेरित करना अचूचूदत्। गुडि सुजि जसि पल-रक्षण करना अजुगुण्डत्। असुसुञ्जत्। अजजंसत्। अपीपलत्। तिल-प्रतिष्ठा अर्थ में है, अतीतिलत्। तुल-उत्मान करना तौलना अतूलुलत्। मूल-रोहण करना, अमुमूलत्। मान-पूजा अमीमनत्। श्लिष्-आलिंगन करना, अशिश्लिषत्। जप-मन में जपना, अजीजपत्। ज्ञप, मानु-बंध होना, अजिज्ञपत्। व्यय-क्षय होना, अविव्ययत्। चूर्ण-संकोचन करना, अचुचूर्णत्। पूज-पूजा करना, अपुपूजत्। अर्क्क ईड-स्तुति करना, आर्चिकत्। ऐडिडत्। शुठ-आलस्य करना अशू-शुठत। शुठि-शोषण करना, अशुशुण्ठत्। पचि-विस्तार करना, अपपञ्चत्। तिज-निशामन करना, अतीतिजत्। वर्ध-छेदन पूरण करना, अवबर्धत्। कुबि-आच्छादन करना, अचुकुम्बत्। लुबि तुबि-अर्दन करना, अलुलुंवत् अतुतुम्वत्। म्रक्ष म्लक्ष-रक्षण करना, अममक्षत्। अमम्लक्षत्। इल-प्रेरणा ऐलिलित्, लुण्ट्-चुराना, अलुलुण्ठत्। छर्द-वमन करना अचछर्दत्। गुडि-वेष्टित करना, अजुगुण्डत्। गर्द-अभिकांक्षा करना। अदगर्दत्। रुष-रूष्ट होना अरूरुषत्। मडि-भूषा और हर्षित होना, अममण्डत्। श्रण-दान देना, अशिश्रणत् भडि-कल्याण करना, अबभण्डत्। तत्रि-कुटुम्ब धारण करना

इतः परमदन्ताः कथ्यन्ते। कथ वाक्यप्रबन्धने। अचकथत्। गण संख्याने। अजगणत्। पठ वट ग्रन्थे। अपपठत्। अववटत्। रह त्यागे। अररहत्। पद गतौ। अपपदत्। कल गतौ संख्याने च। अचकलत्। मह पूजाणां। अममहत्। स्पृह ईप्सायां। अपस्पृहत्। शूच पैशुन्ये। अशुशूवत्। कुमार क्रीडायां। अचुकुमारत्। गोम् उपदेहे। अजुगोमत्। गवेष मार्गणे। अजगवेषत्। भाज पृथक्कर्मणि। अबभाजत्। स्तेन चौर्ये। अतिस्तेनत्। परस्मैभाषा। आगर्वादात्मनेपदी। पद गतौ। अपपदत अपपदेतां अपपदन्त। अपपदथाः अपपदेथां अपपदध्वं। अपपदे अपपदावहि अपपदामहि। मृग अन्वेषणे। अममृगत। कुह विस्मापने। अचुकुहत। शूर वीर विक्रान्तौ। अशुशूरत। अविवीरत। स्थूल परिवृंहणे। अतुस्थूलत। अर्थ उपयाच्ञायां। आर्तिथत। संग्राम संयुद्धे। असंसंग्रामत्। गर्व माने। अजगर्वत्। आत्मने भाषा॥ मूत्र प्रस्नवणे। अमुमूत्रत्। पार तीर कर्मसमाप्तौ। अपपारत्। अतितीरत्। चित्र विचित्रीकरणे। अचिचित्रत। छिद्र कर्णभेदे। अचिछिद्रत। अन्ध दृष्ट्युपसंहारे। आन्दधत्। दण्ड दण्डनिपातने। अददण्डत्। सुख दुःख तल्क्रिययोः। असुसुखत्। अदुदुःखत्। रस आस्वादनस्नेहनयोः। अररसत्। व्यय वित्तसमुत्सर्गे। अवव्ययत्। वर्ण वर्णक्रियाविस्तारगुणवचने। अववर्णत्। पर्ण हरितभावे। अपपर्णत्। अघ पापकरणे। आजिघत्। इति चुरादयः।

अततन्त्रत्। मत्रि-गुप्त भाषण करना अममन्त्रत्। बिद-जानना अवीविदत्। दंश-दशना, अददंशत्। रूप-देखना। अरूरुपतं। भ्रूण-आशा करना, अबुभ्रूणत्। शठ-श्लाघा अशीशठत्। स्यम्-वितर्क करना, असिस्यमत्। गूरा-उद्यम करना अजुगरत्। कुत्स-अवक्षेपण करना, निन्दा। अचुकुत्सत्। कूट कपट-प्रमाद करना, अचुकूटत्। वञ्च-गतौ च्च लगना, अवञ्चत्। मद-हृष्ट होना, अमीमदत्। दिव-परिकूजन करना, अदीदिवत्। कुस्म-कुस्मयने आश्चर्य करना। अचुकुस्मत्। चर्च-अध्ययन करना, अचचर्चत्। कण-निमीलित होना एक आँख बन्द कर निशाना करना। अचीकणत्। जसुताडित करना, अजीजसत्। पष-बन्धन करना, अपीपषत्। आम रोगी होना, आमिमत्। चट, स्फुट-भेदन करना, अचीचटत् अपुस्फुटत्। घुषिर्-शब्द करना, अजूघुषत्। लस-शिल्प योगे, अलीलसत्। भूष-अलंकृत होना, अबुभुषत्। रक, लक-आस्वादन करना, अरीरकत् अलीलकत्। लिगि विचित्रीकरण, अलिलिगत्। मुद-संसर्ग, अमूमुदत्। मुच् छूटना, अमूमुचत्। ग्रस-ग्रास खाना, अजिग्रसत्। पूरी-वृद्धिगत होना, अपूपुरत्।

इससे आगे अकारांत कहे जाते हैं—

कथ-कहना, अचकथत्, गण-संख्या करना, अजगणत्। पठ वट-ग्रन्थ पढ़ना, अपपठत्, अववटत् रह-त्याग करना, अररहत्। पद-गमन करना, अपपदत्। कल-गति और संख्या करना, अचकलत्। मह—पूजा करना, अममहत्। स्पृह—इच्छा करना, अपस्पृहत्। शुच्—पैशुन्य करना, अशुशूचक कुमार क्रीड़ा करना, अचूकुमारत्। गोम—उपदेह करना, अजुगोमत्। गवेष—मार्गण करना, अजवगवेषत्। भाज्, पृथक् क्रिया में है, अबभाजत्। स्तेन—चोरी करना, अतिस्तेनत्। यहां तक परस्मैपद हुआ। आगे गर्वपर्यंत आत्मनेपदी हैं। पद—गति अर्थ में, अपपदत। अपपदेतां अपपदन्त। मृग-अन्वेषण करना, अममृगत। कुह—विस्मापन करना, अचुकुहत। शूर, वीर-विक्रांति अर्थ में है, अशुशूरत अविवीरत। स्थूल-परिवृंहण होना, अतुस्थूलत। अर्थ—पास जाकर माँगना। आर्तिथत। संग्राम—युद्ध करना, असंसंग्रामत। गर्व—मान करना, अजगर्वत। यहाँ तक आत्मनेपदी हुई हैं।

मूत्र—प्रस्रवण करना, अमुमूत्रत् 'पार, तीर—कार्य की समाप्ति, अपपारत्। अतितीरत्। चित्र-विचित्रीकरण, अचिचित्रत्।' छिद्र—कर्ण भेदन करना, अचिछिद्रत। अंध-दृष्टि का उपसंहार आन्दधत्। दण्ड—दण्डे से मारना, अददण्डत्। सुख-सुखी होना, दुःख-दुःखी होना, असुसुखत्। अदुदुःखत्। रस-आस्वादन करना, स्नेह करना, अररसत्। व्यय-धन त्याग करना, अवव्ययत्। वर्ण-वर्ण,

मास्म भूत्। मास्मैधिष्ट। मास्म पाक्षीत् मास्म पाक्तां मास्म पाक्षुः मास्म पाक्षीः मास्म पाक्तं मास्म पाक्त मास्म पाक्षं मास्म पाक्ष्व मास्म पाक्ष्म। मास्म पक्त मास्म पक्षातां मास्म पक्षत। मास्म पक्थाः मास्म पक्षायां मास्म पग्ध्वं। मास्म पक्षि मास्म पक्ष्वहि मास्म पक्ष्महि। मा भूत्। मैधिष्ट। मा पाक्षीत्। मा पक्त।

इति अद्यतनी समाप्ता। ❑

परोक्षा ॥३०४॥

चिरातीते काले परोक्षा विभक्तिर्भवति। अक्ष्णां परः परोक्षं। सम्प्रति इन्द्रियाणामविषय इत्यर्थः। चण परोक्षाचेक्रीयितसन्नन्तेषु द्विर्वचने सति।

भवतेरः ॥३०५॥

भवतेरभ्यासस्य अकारो भवति परोक्षायां। आगमादेशयोरागमो विधिर्बलवान्। इति गुणो न भवति। बभूव बभूवतुः बभूवुः। इडागमो सार्वधातुकस्यादिव्यञ्जनादेरिति व्यञ्जनादाविडागमः। बभूविथ बभूवथुः बभूव। बभूव बभूविव बभूविम।

नाम्यादेर्गुरुमतोऽनृच्छः ॥३०६॥

ऋच्छ इति वर्जितान्नाम्यादेर्गुरुमतो धातोरेकस्वरादाम् भवति परोक्षायां।

क्रिया, विस्तार और गुण के अर्थ में है। अववर्णत्। पर्ण-हरित भाव में—अपपर्णत्। अघ-पाप करना, आजिघत्।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

इस प्रकार से अद्यतनी में चुरादिगण समाप्त हुआ। मा और मास्म के योग में अद्यतनी में अट् का आगम नहीं होता है जैसे—मास्मभूत्। मास्म ऐधिष्ट। मास्म पाक्षीत्। मास्म पाक्तां। मास्म पाक्षुः। इत्यादि।

इस प्रकार से अद्यतनी प्रकरण समाप्त हुआ। ❑

अथ परोक्षा प्रकरण प्रारम्भ होता है।

चिरकाल के अतीत काल में 'परोक्षा' विभक्ति होती है ॥३०४॥

अक्ष्णां परे = परोक्षं—इन्द्रियों से जो परे है वह परोक्ष है। अर्थात् वर्तमान काल में जो इन्द्रियों का विषय नहीं है।

भू अट् अतुस् उस्। "चण् परोक्षा चेक्रीयितसन्नंतेषु" इस सूत्र से द्वित्व करने पर भू भू अ।

परोक्षा में भू के अभ्यास को अकार हो जाता है ॥३०५॥

आगम और आदेश में आगम विधि बलवान् होती है। इससे गुण नहीं होता है। अभ्यास को तृतीय अक्षर हो जाता है। बभूव, बभूवतुः बभूवुः। 'इडागमो सार्वधातुकस्यादिव्यञ्जनादेरिति' इस सूत्र से व्यञ्जन की आदि में इट् का आगम हो जाता है। बभूविथ बभूवथुः बभूव, बभूव बभूविव, बभूविम।

ऋच्छ को छोड़कर नाम्यन्त, गुरुमान् एकस्वर वाली धातु से परोक्षा में 'आम्' होता है ॥३०६॥

परोक्षा में आम् के बाद कृ धातु का प्रयोग किया जाता है ॥३०७॥

एधाम् कृ कृ ए

आमः कृञनुप्रयुज्यते ॥३०७॥

आमन्तस्य कृञनुप्रयुज्यते परोक्षायां। द्विर्वचनं।

ऋवर्णस्याकारः ॥३०८॥

अभ्यास ऋवर्णस्याकारो भवति।

सर्वत्रात्मने ॥३०९॥

सर्वेषां धातूनां गुणो न भवति परोक्षायामात्मनेपदे सर्वत्र। अधाञ्चक्रे एधाञ्चक्राते एधाञ्चक्रिरे।

कृञोऽसुटः ॥३१०॥

असुटः कृञः परोक्षायां थलि चानिड् भवति। एधाञ्चकृषे एधाञ्चक्राथे एधाञ्चकृढ्वे। एधाञ्चक्रे एधाञ्चकृवहे एधाञ्चकृमहे।

असु भुवौ च परस्मै ॥३११॥

आमन्तस्यासु भुवावप्यनुप्रयुज्यते परस्मैपदे परे परस्मैपदं चातिदिश्यते। एधामास एधामासतुः एधामासुः। एधामासिथ एधामासथुः एधामास। एधामास एधामासिव एधामासिम। एधांबभूव एधांबभूवतुः एधांबभूवुः। अस्योपधायामित्यादिना दीर्घः। पपाच।

परोक्षायां च ॥३१२॥

सर्वेषां धातूनां गुणो न भवति परोक्षायां परस्मैपदे द्वित्वबहुत्वयोः परतः।

अस्यैकव्यञ्जनमध्येनादेशादेः परोक्षायाम् ॥३१३॥

अनादेशादेर्धातोरेकव्यञ्जनमध्यगतस्यास्य एत्वं भवत्यभ्यासलोपश्च परोक्षायामगुणे। पेचतुः पेचुः।

अभ्यास के ऋ वर्ण को अकार हो जाता है ॥३०८॥

आत्मने पद में परोक्षा में सभी धातु को गुण नहीं होता है ॥३०९॥

एधांचक्रे। आते इरे। एधांचक्राते एधांचक्रिरे।

परोक्षा में थल् के आने पर सुट् रहित कृ धातु अनिट् होता है ॥३१०॥

एधांचकृषे, एधांचक्राथे, एधांचकृढ्वे। एधांचक्रे एधांचकृवहे एधांचकृमहे।

परस्मैपद में आम् के अन्त में असु और भू धातु का प्रयोग होता है ॥३११॥

और परस्मैपद ही होता है। एधामास एधामासतुः एधामासुः एधांबभूव, एधांबभूवतुः एधांबभूवुः। पच् पच् पपच 'अस्योपधायाम्' इत्यादि से दीर्घ होकर पपाच बना।

परोक्षा में परस्मैपद में द्वित्व-बहुत्व विभक्ति के आने पर सभी धातु को गुण नहीं होता है ॥३१२॥

आदेश रहित एक व्यंजन मध्यगत धातु के अकार को 'एकार' हो जाता है ॥३१३॥

और परोक्षा में अगुण विभक्ति के आने पर अभ्यास का लोप हो जाता है। पेचतुः पेचुः।

श्लोकार्थ—अकारांत, स्वरांत सृज् और दृश धातु से थल् विभक्ति के आने पर विकल्प से इट् होता है। ऋच् में नित्य ही अनिट् रहता है। वृ और व्येङ धातु से थल् के आने पर नित्य ही इट् होता है।

नित्यात्वतां स्वरान्तानां सृजिदृशोश्च वेट् थलि।
ऋचि नित्यानिटः स्युश्चेद् वृव्येडां नित्यमिट् थलि॥

इत्येषामिड् वा भवति थलि परे।

थलि च सेटि॥३१४॥

अनादेशादेर्धातोरेकव्यञ्जनमध्यगतस्य अस्य एत्वं भवत्यभ्यासलोपश्च सेटि थलि परे। पेचिथ पपक्थ पेचथुः पेच।

अट्युत्तमे वा॥३१५॥

उपधाया अस्य दीर्घो भवति अन्त्यानां नामिनां च वृद्धिर्भवति वा परोक्षायामुत्तमपुरुषेऽटि परे। पपाच पपच।

सृवृभृस्तुद्रुस्तुश्रुव एव परोक्षायाम्॥३१६॥

एषामेव न इट् भवति परोक्षायामन्येषां भवत्येव। इति स्नादिनियमादिट्। पेचिव। पेचिम। पेचे पेचाते पेचिरे। पेचिषे पेचाथे पेचिध्वे। पेचे पेचिवहे पेचिमहे। अस्यैकव्यञ्जनमित्युपलक्षणम्। उपलक्षणं किं ? स्वस्य स्वसदृशस्य च ग्राहकमुपलक्षणम्। इत्याकारस्यानेकव्यञ्जनस्यापि क्वचित्। राध् साध् संसिद्धौ।

राधो हिंसायाम्॥३१७॥

हिंसार्थस्य राध एत्वं भवति अभ्यासलोपश्च परोक्षायामगुणे। अपरराध अपरेधतुः अपरेधुः। इत्यादि। हिंसायामिति किं ? आरराध आरराधतुः। इत्यादि॥

इस श्लोक से थल् के आने पर इस पच् में इट् विकल्प से होता है।

इट् सहित थल् के आने पर आदेश रहित धातु के एक व्यंजन मध्यगत अकार को एकार हो जाता है॥३१४॥

और अभ्यास का लोप हो जाता है। पेचिथ, पपक्थ।

परोक्षा के उत्तम पुरुष अट् के आने पर उपधा के अकार को विकल्प से दीर्घ होता है॥३१५॥

और अन्त्य नामिको वृद्धि हो जाती है। पपाच, पपच।

सृ वृ भृ स्तु द्रु स्तु और श्रु इन धातु से परोक्षा में इट् नहीं होता है॥३१६॥

अन्य धातु से इट् हो जाता है। इस सूत्र के नियम से पच् में इट् हो जाता है पेचिव, पेचिम। आत्मनेपद में—पेचे, पेचाते इस पच् में एक व्यंजन जो कहा है वह उपलक्षण है। उपलक्षण किसे कहते हैं ? अपने और अपने सदृश को ग्रहण करने वाला उपलक्षण कहलाता है। इस प्रकार से अनेक व्यंजन वाले आकार को भी कहीं पर हो जाता है। जैसे—राध् साध्—सिद्धि अर्थ में हैं।

हिंसा अर्थ में राध धातु को 'एत्व' हो जाता है और परोक्षा के अगुण विभक्ति में अभ्यास का लोप हो जाता है॥३१७॥

अपरराध, अपरेधतुः अपरेधुः। हिंसा अर्थ में हो ऐसा क्यों कहा ? आरराध, आरराधतुः आरराधुः। इत्यादि।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

राजिभ्राजिभ्रासिभ्लासीनां वा ॥३१८ ॥

एषां वा एत्वं भवति अभ्यासलोपश्च परोक्षायामगुणे। राजृ दीप्तौ। रराज रेजतुः रराजतुः रेजुः रराजुः। रेजिथ रराजिथ। थलि च सेटि वा एत्वमभ्यासलोपश्च। रेजथुः रराजथुः रेज रराज। रराज रेजिव रराजिव रेजिम रराजिम। रेजे रजाजे रेजाते रराजाते रेजिरे रराजिरे। रेजिषे रराजिषे रेजाथे रराजाथे रेजिढ्वे रराजिढ्वे। रेजे रराजे रेजिवहे रराजिवहे रेजिमहे रराजिमहे। भ्रासृट् भ्राजृट भ्लास्सृट् दीप्तौ। भ्रेजे बभ्राजे। भ्रेसे बभ्रासे। भ्लेसे बभ्लासे। कासृ भासृ दीप्तौ। चकासे चकासाते चकासिरे। चकासिषे चकासाथे चकासिध्वे। चकासे चकासिवहे। चकासिमहे। एवं बभासे बभासाते बभासिरे। एकव्यञ्जनमध्यगतस्येति किं ? ननन्द ननन्दतुः ननन्दुः ननन्दिथ ननन्दथुः ननन्द ननन्दिव ननन्दिम।

परोक्षायामिन्धिश्रन्थिग्रन्थिदम्भीनामगुणे ॥३१९ ॥

इन्धिश्रन्थिग्रन्थिदम्भीनामनुषङ्गलोपो भवति परोक्षायामगुणे। इत्यनेनानुषङ्गलोपः। जिइन्धि दीप्तौ। समीधे समीधाते समीधिरे।

तृफलभजत्रपश्रन्थिदम्भीनां च ॥३२० ॥

एषामुपधाया अस्य एत्वं भवति अभ्यासलोपश्च परोक्षायामगुणे सेटि थलि च। तृ प्लवनतरणयोः। ततार।

ऋदन्तानां च ॥३२१ ॥

ऋदन्तानां गुणो भवति परोक्षायामगुणे। तेरतुः तेरुः। तेरिथ तेरथुः तेर। ततार ततर तेरिव तेरिम। फल निष्पत्तौ। पफाल फेलतुः फेलुः। भज श्रीङ् सेवायां। बभाज भेजतुः भेजुः। त्रपूष् लज्जायां। त्रेपे त्रेपाते त्रेपिरे। श्रन्थ ग्रन्थ संदर्भे। शश्रन्थ श्रेथतुः श्रेथुः। निरनुषङ्गैः तृप्रभृतिभिः साहचर्यादभ्यासलोपः अकारस्य एत्वं च न स्यात्। शश्रन्थिथ। जग्रन्थ। ग्रेथतुः ग्रेथुः। जग्रन्थिथ। दम्भू दम्भे। ददम्भ देभतुः देभुः। ददम्भिथ। अन्यत्र नानुषङ्गलोप इति किं ? ननन्द ननन्दतुः ननन्दुः। ननन्दिथ। सस्रंसे। बभ्रंसे। दध्वंसे।

परोक्षा के अगुणी में राजि, भ्राजि, भ्रासि और भ्लासि धातु को एत्व विकल्प से होता है और अभ्यास का लोप हो जाता है ॥३१८ ॥

राजृ—दीप्त होना। रराज, रेजतुः रराजतुः। रेजुः, रराजुः। थल् में इट् के आने पर एत्व और अभ्यास का लोप विकल्प से होता है। रेजिथ, रराजिथ। सारे ही रूप विकल्प से दो दो रहेंगे। आत्मनेपद में भी दो दो रहेंगे। रेजे, रराजे। रेजाते, रराजाते। भ्रासृट् भ्राजृट् भ्लासृट्—दीप्त होना। भ्रेजे, बभ्राजे। भ्रेसेसे—बभ्रासे। भ्लेसे बभ्लासे। कासृ भासृ—दीप्त होना। चकासे चकासाते चकासिरे। बभासे बभासाते बभासिरे।

'एकव्यंजनमध्यगतस्य' ऐसा क्यों कहा है ? ननन्द ननन्दतुः ननंदुः।

परोक्षा में अगुण विभक्ति के आने पर इन्धि श्रन्थि ग्रन्थि और दंभि धातु के अनुषंग का लोप हो जाता है ॥३१९ ॥

त्रि इन्धी—दीप्त होना। अनुषंग का लोप होकर सम् उपसर्ग पूर्वक समीधे[1] समीधाते समीधिरे।

परोक्षा के अगुण में इट् सहित थल् के आने पर तृ फल भज् त्रप् श्रन्थि ग्रन्थि और दंभि की उपधा के अकार को एकार और अभ्यास का लोप होता है ॥३२० ॥

तृ—प्लवन और तरना। ततार।

परोक्षा के अगुणी में ऋदन्त को गुण हो जाता है ॥३२१ ॥

---

१. उपधा को दीर्घ होता है।

परोक्षायामभ्यासस्योभयेषाम् ॥३२२ ॥

उभयेषां ग्रहादिस्वप्यादीनामभ्यासस्यान्तस्थायाः सम्प्रसारणं भवति परोक्षायां । गुण्यर्थोयं योगः । ग्रहीङ् उपादाने । जग्राह ग्रहिज्यावयीत्यादिना संप्रसारणं जगृहतुः जगृहुः ।

आकारादट औ ॥३२३ ॥

आकारात्पररयाट् और्भवति ।

सन्ध्यक्षरे च ॥३२४ ॥

धातोराकारस्य लोपो भवति सन्ध्यक्षरे च परे । ज्या वयोहानौ । जिज्यौ ॥

य इवर्णस्य ॥३२५ ॥

असंयोगा पूर्वस्यानेकाक्षरस्य इवर्णस्य यो भवति । इति इवर्णस्य यकारः । जिज्यतुः जिज्युः ।

इटि च ॥३२६ ॥

धातोराकारस्य लोपो भवति इटि परे । जिज्यिथ जिज्यथुः जिज्य । जिज्यौ जिज्यिव जिज्यिम । वेञ तन्तुसन्ताने ।

वेञश्च वयिः ॥३२७ ॥

वेञो वा वयिर्भवति परोक्षायाम् । तत्र च संप्रसारणं भवति । उवाय ऊयतुः ऊयुः । उवयिथ ऊयथुः ऊय । उवाय उवय ऊयिव ऊयिम । पक्षे सन्ध्यक्षरान्तानामाकारो विकरणे इत्याकारादेशः ।

एवं उपधा के अकार को 'ए' होकर अभ्यास का लोप होने से तेरतुः तेरुः । फल-निष्पन्न होना, पफाल फेलतुः फेलुः । भज, श्रीङ्—सेवा करना । बभाज भेजतुः भेजुः । त्रपूष्—लज्जा करना त्रेपे त्रेपाते त्रेपिरे । श्रन्थ ग्रन्थ—संदर्भ । शश्रन्थ श्रेथतुः श्रेथुः । अनुषंग रहित तृ आदि धातु के सहचारी होने से अभ्यास का लोप और अकार को एकार नहीं हुआ । शश्रन्थिथ । जग्रन्थ ग्रेथतुः ग्रेथुः । जगन्थिथ । दम्भू—दम्भ करना । ददम्भ देभतुः देभुः । ददम्भिथ । अन्यत्र अनुषंग लोप नहीं होता है ऐसा क्यों कहा ? तो ननन्द ननन्दतुः ननन्दुः में अनुषंग लोप नहीं हुआ है । सस्रंसे बभ्रंसे दध्वंसे ।

ग्रहादि और स्वप्यादि धातुओं में अभ्यास के अंतस्थ को परोक्षा में संप्रसारण हो जाता है ॥३२२ ॥

गुणी विभक्ति के लिये यह योग—सूत्र है इससे यह अर्थ हुआ कि अगुणी में दोनों को संप्रसारण कर दो । ग्रह धातु से—जग्राह । "ग्रहिज्या" इत्यादि सूत्र से संप्रसारण होकर जगृहतुः जगृहुः ।

आकार के परे अट् को 'औ' हो जाता है ॥३२३ ॥

संध्यक्षर के आने पर धातु के आकार का लोप हो जाता है ॥३२४ ॥

ज्या-जिज्यौ । पूर्व अभ्यास के जी को ह्रस्व होकर 'जि' बना है ।

असंयोग अपूर्व अनेकाक्षर के इवर्ण को य हो जाता है ॥३२५ ॥

इवर्ण को यकार होकर जिजी अतुस् = जिज्यतुः जिज्युः ।

इट् के आने पर धातु के आकार का लोप हो जाता है ॥३२६ ॥

जिज्यिथ जिज्यथुः जिज्य । वेञ्—कपड़ा बुनना ।

परोक्षा में वेञ् को वय् आदेश विकल्प से होता है ॥३२७ ॥

और संप्रसारण होकर उवाय ऊयतुः ऊयुः । उवयिथ । पक्ष में—'संध्यक्षरान्तानामाकारो विकरणे' सूत्र से आकार हो जाने से 'वा' बन गया । वा—गति और बंधन करना ।

न वाश्व्योरगुणे च ॥३२८॥

वाश्व्योरगुणे च गुणिनि संप्रसारणं न भवति परोक्षायां। ववौ ववतुः ववुः। ववित्थ ववाथ ववथुः वव। ववौ ववित्व ववित्म। व्यध ताडने। विव्याध विविधतुः विविधुः। विव्यधित्थ विव्यद्ध। वश कान्तौ। उवाश ऊशतुः ऊशुः। उवशित्थ उवष्ठ। व्यच व्याजीकरणे। विव्याच विविचतुः विविचुः। विव्यचित्थ। प्रच्छ ज्ञीप्सायां।

प्रच्छदीनां परोक्षायाम् ॥३२९॥

प्रच्छादीनां संप्रसारणं न भवति परोक्षायां। पप्रच्छ पप्रच्छतुः पप्रच्छुः। पप्रच्छित्थ पप्रष्ठ। ओव्रश्चू छेदने। वव्रश्च वव्रश्चतुः वव्रश्चुः। वव्रश्चित्थ। इवर्णतवर्गलसा दन्त्यः इति न्यायात् सकारस्य दकारः। भ्रस्ज पाके। बभ्रज्ज बभ्रज्जतुः बभ्रज्जुः। बभ्रज्जित्थ। स्कोः संयोगाद्योरन्ते च इति सकारलोपः। भृज्जादीनां षः इति षत्वं। बभ्रष्ठ। स्वपि वचि यजादीनां यण् परोक्षाशीष्षु। इति संप्रसारणं भवति। ञिष्वप् शये। सुष्वाप सुषुपतुः सुषुपुः सुष्वपित्थ सुष्वप्थ सुषुपथुः सुषुप। सुष्वाप सुष्वप सुषुपिव सुषुपिम। वच परिभाषणे। उवाच ऊचतुः ऊचुः। उवक्थ।

यजो वयो वहेश्चैव वेञ्येञौ ह्वयतिस्तथा।
वद्वसौ श्वयतिश्चैव स्मृता नव यजादयः ॥१॥

यज देवपूजासंगतिकरणदानेषु। इयाज ईजतुः ईजुः। इयजित्थ। भ्रज्जादीनां षः इति षत्वं। इयष्ठ। ईजथुः ईज। इयाज इयज ईजिव ईजिम। ईजे ईजाते ईजिरे। ईजिषे ईजाथे ईजिध्वे। ईजे ईजिवहे ईजिमहे। टुवप् बीजसन्ताने। उवाप ऊपतुः ऊपुः। उवपित्थ उपप्थ ऊपथुः ऊप। ऊपे ऊपाते ऊपिरे। वहि प्रापणे। उवाह ऊहतुः ऊहुः। उवहित्थ। सहिवहोरोदवर्णस्येति ओत्वं। उवोढ। ऊहे ऊहाते ऊहिरे।

परोक्षा में 'वा' आदि में गुणी और अगुणी के आने पर संप्रसारण नहीं होता है ॥३२८॥

ववौ ववतुः ववुः। ववित्थ ववाथ, ववथुः वव। ववौ ववित्व ववित्म। व्यध—ताड़ित करना। विव्याध विविधतुः विविधुः। विव्यधित्थ, विव्यद्ध। वश—कान्ति अर्थ में है। उवाश ऊशतुः ऊशुः। उवशित्थ, उवष्ठ। व्यच्—बहाना करना।

विव्याच विविचतुः विविचुः। विव्यचित्थ। प्रच्छ—प्रश्न करना।

परोक्षा में प्रच्छ आदि को संप्रसारण नहीं होता है ॥३२९॥

पप्रच्छ पप्रच्छतुः पप्रच्छुः। पप्रच्छित्थ पप्रष्ठ। ओव्रश्चू—छेदना। वव्रश्च वव्रश्चतुः वव्रश्चुः वव्रश्चित्थ। "लृवर्णतवर्गलसा दन्त्या" इस न्याय से भ्रस्ज् के सकार को दकार होकर च वर्ग होकर 'भ्रज्ज्' बना। वभुज्ज वभुज्जतुः। थल् में—"स्कोः संयोगाद्योरंते च" ११७, सूत्र से सकार का लोप होकर "भृज्जादीनां षः" २६१ सूत्र से ष होकर थ को ठ होकर वभ्रष्ठ बना।

इट् में बभुज्जित्थ। "स्वपिवचियजादीनां यण् परोक्षाशीष्षु"। सूत्र से संप्रसारण हो जाता है। ञिष्वप—शयन करना। सुष्वाप। सुषुपतुः सुषुपुः। सुष्वपित्थ, सुष्वप्थ। वच—बोलना। उवाच ऊचतुः ऊचुः उवचित्थ उवक्थ। यजादिगण में किन-किन धातु को लेना ?

श्लोकार्थ—यज् वय् वह् वेञ् व्येञ् ह्वेञ्, वद वस और श्वि ये नव धातु यजादि कहलाते हैं।।१॥

यज—देव पूजा, संगतिकरण और दान देने अर्थ में है। इयाज ईजतुः ईजुः 'इयजित्थ' "भ्रज्जादीनां षः" सूत्रे से ज् को ष् करके इयष्ठ बना। आत्मनेपद में—ईजे ईजाते ईजिरे।

टुवप्—बीज बोना। उवाप ऊपतुः ऊपुः। उवपित्थ, उवप्थ। ऊपे ऊपाते ऊपिरे। वह्—प्राप्त कराना। उवाह ऊहतुः ऊहुः उवहित्थ। 'सहिवहोरोदवर्ण' इस सूत्र से अवर्ण को ओ होकर उवोढ "होढः" सूत्र से ह् को ढ् हुआ है। ऊहे ऊहाते ऊहिरे। व्येञ्—बुनना।

न व्ययतेः परोक्षायाम् ॥३३० ॥

व्ययतेराकारो न भवति परोक्षायां गुणिनि। विवाय विव्यतुः विव्युः। विव्यिथ विव्येथ विव्यथुः विव्य। विव्याय विव्यय विव्यिव विव्यिम। विव्ये विव्याते विव्यिरे। ह्वेञ्-स्पर्धायां वाचि।

अभ्यस्तस्य च ॥३३१ ॥

ह्वयतेरभ्यस्तमात्रस्य च संप्रसारणं भवति। जुहाव जुहवतुः जुहवुः। जुहविथ जुहोथ। जुहुवे जुहुवाते जुहुविरे। वद व्यक्तायां वाचि। उवाद ऊदतुः ऊदुः। उवदिथ। ऊदे ऊदाते ऊदिरे। वस निवासे। उवास ऊषतुः ऊषुः। उवसिथ उवस्थ। ऊषे ऊषाते ऊषिरे। टुओश्वि गतिवृद्धयोः।

श्वयतेर्वा ॥३३२ ॥

श्वयतेर्वा संप्रसारणं भवति परोक्षायां चेक्रीयिते च। शुशाव शुशुवतुः शुशुवुः। शुशविथ शुशोथ शुशुवथुः शुशुव। शुशाव शुशव शुशुविव शुशुविम। शुशुवे शुशुवाते शुशुविरे। शिश्वाय शिश्वियतुः शिश्वियुः। शिश्वयिथ शिश्वेथ शिश्वियथुः शिश्विय। शिश्वाय शिश्वय। शिश्विये शिश्वियाते शिश्वियिरे। इति भ्वादिः ॥

वा परोक्षायाम् ॥३३३ ॥

अदेर्घस्लृ आदेशो भवति वा परोक्षायां। जघास। गमहनेत्यादिना उपधालोपो भवत्यगुणे। जक्षतुः जक्षुः। जघसिथ जघस्थ जक्षथुः जक्ष। जघास जघस जक्षिव जक्षिम। घस्लृभावे।

परोक्षा के गुणी में व्येञ् धातु आकारांत नहीं होता है ॥३३० ॥

विव्याय विव्यतुः विव्युः, विपिव्यथ विव्येथ। आत्मनेपद में—विव्ये विव्याते विव्यिरे। ह्वेञ्—बुलाना।

ह्वे धातु के अभ्यस्त मात्र को संप्रसारण हो जाता है ॥३३१ ॥

जुहाव जुहुवतुः जुहुवुः। जुहुविथ जुहोथ। आत्मनेपद में—जुहुवे जुहुवाते जुहुविरे। वद—स्पष्ट बोलना। उवाद ऊदतुः ऊदुः। उवदिथ। ऊदे ऊदाते ऊदिरे। वस—निवास करना। उवास ऊषतुः ऊषुः उवसिथ, उवस्थ। ऊषे ऊषाते ऊषिरे।

टुओश्वि—गति और वृद्धि अर्थ में। श्वि—

परोक्षा और चेक्रीयित में श्वि को विकल्प से संप्रसारण होता है ॥३३२ ॥

शुशाव शुशुवतुः शुशुवुः। संप्रसारण न होने से—शिश्वाय। शिश्वियतुः शिश्वियुः। आत्मनेपद में—शिश्विये शिश्वियाते।

इस प्रकार से परोक्षा में भ्वादि गण समाप्त हुआ।

परोक्षा में अदादि गण प्रारम्भ होता है।

परोक्षा में विकल्प से अद् को घस् आदेश होता है ॥३३३ ॥

जघास। जघस् अतुस् 'गमहन्' इत्यादि सूत्र से अगुणी में उपधा का लोप हो जाता है अतः घ के अ का लोप होकर प्रथम अक्षर क् होकर स को ष होकर जक्षतुः जक्षुः बन गया।

इट् में जघसिथ-अनिट् में—जघस्थ बना। जब घस् आदेश नहीं हुआ तब—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

अस्यादेः सर्वत्र ॥३३४॥

अभ्यासस्यादेरस्य दीर्घो भवति परोक्षायां सर्वत्र। आद आदतुः आदुः। आदिथ आत्थ आदथुः आद। आद आद्व आद्म। शीङ् स्वप्ने। शिश्ये शिश्याते शिश्यिरे। उवाच ऊचतुः ऊचुः। ऊचे ऊचाते ऊचिरे। उष दाहे। विद ज्ञाने। जागृ निद्राक्षये।

उषविदजागृभ्यो वा ॥३३५॥

उषादिभ्यो वा आम् भवति परोक्षायां। ओषाञ्चकार ओषाञ्चक्रतुः ओषाञ्चक्रुः।

आमि विदेरेव ॥३३६॥

आमि परे विदेरेव गुणो न भवति। विदाञ्चकार विदाञ्चक्रतुः विदाञ्चक्रुः। जागराञ्चकार जागराञ्चक्रतुः जागराञ्चक्रुः। आमभावे अभ्यासस्यासवर्णे इत्युवादेशः। उवोष ऊषतुः ऊषुः। विवेद विविदतुः विविदुः। जजागार।

परोक्षायामगुणे ॥३३७॥

जागर्तेर्गुणो भवति परोक्षायामगुणे परे। जजागरतुः जजागरुः। इत्यदादिः।।

भीह्रीभृहुवां तिवच्च ॥३३८॥

एषां वा आम् भवति परोक्षायां स च तिवद्भवति। इति तिवद्भावाद् द्विर्वचनं। जुहुवाञ्चकार जुहुवाञ्चक्रतुः जुहुवाञ्चक्रुः। जुहाव जुहुवतुः जुहुवुः। जुहविथ जुहोथ जुहुवथुः जुहुव। जुहाव जुहव जुहुविव जुहुविम। ञिभी भये। बिभयाञ्चकार बिभयाञ्चक्रतुः बिभयाञ्चक्रुः। बिभाय बिभ्यतुः बिभ्युः। बिभयिथ

परोक्षा में सर्वत्र अभ्यास के आदि के 'अ' को दीर्घ हो जाता है ॥३३४॥

आद आदतुः आदुः। आदिथ,। शीङ्—सोना। शिश्ये शिश्याते शिश्यिरे। वच—उवाच ऊचतुः ऊचुः। ऊचे। उष—दाह। विद—ज्ञान। जागृ = निद्राक्षय।

उष विद जागृ से परोक्षा में आम् विकल्प से होता है ॥३३५॥

गुण होकर ओषांचकार ओषांचक्रतुः ओषांचक्रुः।

आम् के आने पर विद् धातु को ही गुण नहीं होता है ॥३३६॥

विदाञ्चकार विदाञ्चक्रतुः विदाञ्चक्रुः। गुण होकर—जागराञ्चकार। जागराञ्चक्रतुः जागराञ्चक्रुः। आम् के अभाव में 'अभ्यासस्यासवर्णे' इस १७६ सूत्र से उव् आदेश हो गया। उवोष ऊषतुः ऊषुः। विवेद विविदतुः विविदुः। जजागार।

परोक्षा के अगुण में जागृ को गुण हो जाता है ॥३३७॥

जजागरतुः जजागरुः।

इस प्रकार से परोक्षा में अदादिगण समाप्त हुआ।

परोक्षा में जुहोत्यादिगण प्रारंभ होता है।

भी, ह्री, भृ और हु धातु को परोक्षा में विकल्प से आम् होता है एवं वह तिवत् हो जाता है ॥३३८॥

तिवत् होने से धातु को द्वित्व हो जाता है। जुहुवाञ्चकार। जुहाव। ञिभी—भयभीत होना। बिभयाञ्चकार। बिभाय। ह्री—लज्जा करना। जिह्रयाञ्चकार। जिह्राय। भृञ्—धारण पोषण करना। बिभराञ्चकार। इत्यादि। ओहाङ्—जहे जहाते दधौ दधतुः दधुः। दधे दधाते दधिरे।

बिभेथ। ह्री लज्जायां। जिह्रयाञ्चकार जिह्रयाञ्चक्रतुः जिह्रयाञ्चक्रुः। जिह्राय जिह्रियतुः जिह्रियुः। बिभराञ्चकार बिभराञ्चक्रतुः बिभराञ्चक्रुः। इत्यादि। जहे जहाते जहिरे। दधौ दधतुः दधुः। दधिथ दधाथ। दधे दधाते दधिरे। दधिषे दधाथे दधिध्वे। दधे दधिवहे दधिमहे। इति जुहोत्यादिः। दिदेव दिदिवतुः दिदिवुः। सुषुवे सुषुवाते सुषुविरे। ननाह नेहतुः नेहुः। नेहिथ ननद्ध नेहथुः नेह। ननाह नेहिव नेहिम। नेहे नेहाते नेहिरे। इति दिवादिः। सुषाव सुषुवतुः सुषुवुः। सुषविथ सुषोथ।

अस्यादेः सर्वत्र ॥३३९॥

अभ्यासस्य अकारस्य दीर्घो भवति परोक्षायां सर्वत्र।

अश्नोतेश्च ॥३४०॥

अश्नोतेस्तस्माद्दीर्घीभूताद्भ्यासाकारात्परः परादौ नकारागमो भवति परोक्षायां। आनशे आनशाते आनशिरे। व्यानशे व्यानशाते व्यानशिरे। ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु।

ऋच्छ ऋतः ॥३४१॥

ऋच्छधातोर्गुणो भवति परोक्षायां।

तस्मान्नागमः परादिरन्तश्चेत्संयोगः ॥३४२॥

तस्माद्दीर्घीभूताद्भ्यासस्याकारात्परः परादौ नकारागमो भवति धातोरन्तः संयोगश्चेत्परोक्षायां। आनर्च्छ आनर्च्छतुः। आनर्च्छुः। अञ्जू व्यक्तिमर्षणकान्तिगतिषु। आनञ्ज आनञ्जतुः आनञ्जुः। आनञ्जिथ आनङ्क्थ आनञ्जथुः आनञ्ज। आनञ्ज आनञ्जिव आनञ्जिम। तस्मादिति किं। आछि आयामे। आञ्छ आञ्छतुः आञ्छुः। अयमस्यादेः सर्वत्र इति न क्लृप्तो दीर्घः। अन्तश्चेत्संयोग इति किं ? आट आटतुः। ऋध वृद्धौ।

इस प्रकार से परोक्षा में जुहोत्यादिगण समाप्त हुआ।

अथ परोक्षा में दिवादि गण

दिवु—क्रीड़ादि। दिदेव दिदिवतुः दिदिवुः। सुषुवे सुषुवाते। ननाह नेहतुः नेहुः। नेहे नेहाते नेहिरे। इस प्रकार से परोक्षा में दिवादि गण समाप्त हुआ।

अथ परोक्षा में स्वादि गण।

षुञ्—अभिषव करना। सुषाव सुषुवतुः सुषुवुः।

परोक्षा में सर्वत्र अभ्यास के अकार को दीर्घ हो जाता है ॥३३९॥

दीर्घीभूत अभ्यास के आकार वाले अश् धातु से पर की आदि में नकार का आगम हो जाता है ॥३४०॥

परोक्षा में—अशूङ् व्याप्त होना। आनशे आनशाते आनशिरे। व्यानशे। ऋच्छ—गति, इंद्रिय प्रलय, मूर्ति भाव।

परोक्षा में ऋच्छ धातु को गुण हो जाता है ॥३४१॥

उस दीर्घीभूत अभ्यास के अकार से परे पर की आदि में नकार का आगम होता है यदि परोक्षा में अंत संयोग है ॥३४२॥

अर्च्छ, आर्च्छ 'न' आगम से आनर्च्छ आनर्च्छतुः। अञ्जू—व्यक्ति, मर्षण कांति और गति। आनञ्ज आनञ्जतुः। तस्मात् ऐसा क्यों कहा ? आछि—आयाम अर्थ में है। आञ्छ आञ्छतुः आञ्छुः अयं

ऋकारे च ॥३४३ ॥

तस्माद्दीर्घीभूतादभ्यासाकारात्परः परादौ नकारागमो भवति ऋकारे च परोक्षायां । आनृधे आनृधाते आनृधिरे ।

चेः किर्वा ॥३४४ ॥

चेः किर्वा भवति परोक्षायां । चिकाय चिक्यतुः चिक्युः । चिक्ये । चिचाय चिच्यतुः चिच्युः । चिच्ये चिच्याते चिच्यिरे । इति स्वादिः । तुतोद तुतुदतुः तुतुदुः । मृङ् प्राणत्यागे ।

आशीरद्यतन्योश्च ॥३४५ ॥

मृङ् आत्मनेपदी भवति चकारादनि च परे नान्यत्र । ममार मम्रतुः मम्रुः ।

मार्गदर्शक : विविधसागर जी महाराज

थल्यृकारात् ॥३४६ ॥

ऋकारान्तात् थलि नेड् भवति । ममर्थ मम्रथुः मम्र । मुमोच मुमुचतुः मुमुचुः । मुमुचे मुमुचाते मुमुचिरे । इति तुदादिः ॥ रुरोध रुरुधतुः । बुभुजे बुभुजाते । युयोज । युयुजे । इति रुधादिः । ततान तेनतुः तेनुः । तेने तेनाते तेनिरे । मेने मेनाते मेनिरे । चकार चक्रतुः । चक्रे चक्राते ।

"अस्यादेः सर्वत्र" इससे दीर्घ नहीं हुआ । 'अंतश्चेत् संयोगः' ऐसा क्यों कहा ? अटआट आटतुः । ऋध-वृद्धि होना ।

परोक्षा में दीर्घीभूत अभ्यास अकार से परे ऋकार के आने पर पर की आदि में नकार का आगम होता है ॥३४३ ॥

आनृधे आनृधाते आनृधिरे । चिञ्—चयन करना ।

परोक्षा में चवर्ग को कवर्ग विकल्प से होता है ॥३४४ ॥

चिकाय चिक्यतुः चिक्युः । चिक्ये । चिचाय चिच्यतुः चिच्युः । चिच्ये चिच्याते चिच्यिरे ।

इस प्रकार से परोक्षा में स्वादि गण समाप्त हुआ ।

अथ परोक्षा में तुदादि गण

तुतोद तुतुदतुः तुतुदुः । मृङ्—प्राण त्याग करना ।

अन् विकरण के आने पर मृङ् आत्मनेपद में चलता है अन्यत्र नहीं ॥३४५ ॥

ममार मम्रतुः मम्रुः ।

थल् के आने पर ऋकारांत से इट् नहीं होता है ॥३४६ ॥

ममर्थ मम्रथुः मम्र । मुच्—मुमोच मुमुचतुः मुमुचुः । मुमुचे ।

परोक्षा में तुदादिगण समाप्त हुआ ।

अथ परोक्षा में रुधादि गण ।

रुरोध रुरुधतुः रुरुधुः । भुज धातु भोजन अर्थ । उसमें आत्मनेपदी है भुज्—बुभुजे बुभुजाते बुभुजिरे । युजिर्—युयोज युयुजतुः युयुजुः । युयुजे ।

इस प्रकार से परोक्षा में रुधादि गण समाप्त हुआ ।

अथ परोक्षा में तनादि गण प्रारंभ होता है ।

तनु—विस्तार करना । ततान तेनतुः तेनुः । तेने तेनाते । मेने मेनाते मेनिरे । डुकृञ्—चकार चक्रतुः चक्रुः । चक्रे चक्राते चक्रिरे ।

सुट् भूषणे सम्पर्युपात् ॥३४७॥

सम्पर्युपात्परस्य कृञ् आदौ सुट् भवति भूवर्णेऽर्थे द्विर्वचने।

शिट्परोऽघोषः ॥३४८॥

अभ्यासस्य शिटः परोऽघोषोऽवशेष्यो भवति। शिटो लोप इत्यर्थः। संचस्कार।

ऋतश्च संयोगादेः ॥३४९॥

व्यञ्जनादेरनेकाक्षरस्य लिङ्गस्य लघोः ऋतो रशब्दादेशो भवति इनि परे। पृथ प्रख्याने। पृथुं करोति प्रथयति। अपिप्रथत्। मृदुं करोति म्रदयति। अमिम्रदत्। दृढं करोति द्रढयति। अदिद्रढत्। कृशं करोति क्रशयति। अचिक्रशत्। भृशं करोति भ्रशयति अबिभ्रशत्। परिवृढं करोति परिव्रढयति पर्यविव्रढत्। इत्यादि।

पृथुं मृदुं दृढं चैव कृशं च भृशमेव च।
परिपूर्वं वृढं चैव षडेतान्नविधौ स्मरेत् ॥१ ॥

धातोश्च हेतौ ॥४४७ ॥

हेतुकर्तृकव्यापारे वर्त्तमानाद्धातोः कारितसंज्ञक इन् भवति। उवर्णस्य जान्तस्यापवर्गपरस्यावर्णे इत्यभ्यसावर्णस्य इकारः॥ दीर्घो लघोरस्वरादीनामिति दीर्घः। भवति कश्चित्तमन्यः प्रयुंक्ते भावयति भावयते। भावयेत्। भावयतु। अभावयत्। इन्व्यञ्जनादेरुभयमित्युक्तत्वात् सर्वेषामिन्प्रत्यया-नामुभयपदित्वम्॥ अबीभवत्। भावयाञ्चक्रे। भावयिता। भाव्यात्। भावयिषीष्ट। भावयिष्यति। भावयिष्यते। अभावयिष्यत् अभावयिष्यत। पाचयति। अपीपचत्। एधयति ऐदिधत्। नन्दयति। अननन्दत्। स्रंसयति असस्रंसत्।

इन् और चण् के आने पर स्वर की आदि को दीर्घ नहीं होता है ॥४४५ ॥

आर्तिथपत्। अविवेदपत्।

इन् के आने पर व्यञ्जनादि अनेकाक्षर लघु लिंग के ऋ को रकार हो जाता है ॥४४६ ॥

पृथ—प्रख्यान करना। पृथुं करोति = प्रथयति, ऋ को र् हुआ है अपिप्रथत्। मृदुं करोति = म्रदयति। अभिम्रदत्। दृढं करोति = द्रढयति। अदिद्रढत्। कृशं करोति = क्रशयति। अचिक्रशत्। भृशं करोति = भ्रशयति, अबिभ्रशत्। परिवृढं करोति = परिव्रढयति। पर्यविव्रढत्। इत्यादि।

श्लोकार्थ—पृथु, मृदु, दृढ, कृश, भृश और परिवृढ ये छह हैं जिनके ऋ को र् होता है ॥१ ॥

अथ प्रेरणार्थक धातु का प्रकरण

हेतु कर्तृक व्यापार में वर्तमान धातु से कारित संज्ञक 'इन्' प्रत्यय होता है ॥४४७ ॥

कोई होता है और अन्य कोई उसको प्रेरणा देता है। इस अर्थ में कारित संज्ञक 'इन्' होता है और हुआता है। 'दीर्घो लघोरस्वरादीनां' २२२ सूत्र से वृद्धि होकर भौ इ है 'औ आव्' से 'भावि' बना 'ते धातवः' से धातु संज्ञा होकर अन् विकरण और गुण करके भावयति बना 'इन्यजादेरुभयम्' सूत्र ३७ से इन्नंत धातु उभयपदी होती हैं अतः भावयते। ऐसे ही दसों लकारों में देखिये।

भावयति, भावयते। भावयेत्, भावयेत। भावयतु, भावयतां। अभावयत्, अभावयत। सूत्र २९५ से दीर्घ हुआ। अबीभवत्। भावयाञ्चकार भावयाञ्चक्रे। भावयिता। भाव्यात्, भावयिषीष्ट। भावयिष्यति, भावयिष्यते। अभावयिष्यत्, अभावयिष्यत।

पच्—पाचयति—पकवाता है। पाचयति। अपीपचत्।

एधयति। ऐदिधत्। नन्दयति। अननन्दत्।

स्रंसयति। असस्रंसत्।

शाच्छासाह्वाव्यावेपामिनि ॥४४८ ॥

एषामायिर्भवति इनि परे। शाययति। अशीशयत्। छाययति अचिच्छयत्। अवसाययति। अवासीषयत्। ह्वाययति।

ह्वयतेर्नित्यम् ॥४४९ ॥

ह्वयतेर्नित्यं संप्रसारणं भवति कारिते च संश्चणोः परयोः॥ अजूहवत्। व्याययति। अविव्ययत्। वाययति। अवीवयत्। पाययति।

लोपः पिबतेरीच्चाभ्यासस्य ॥४५० ॥

पिबतेरभ्यासस्य ईद्भवति उपधायाश्च लोपो भवति इनि चण्परे। अपीप्यत्। आदयति। आदिदत्। वाचयति अवीवचत्। हावयति अजूहवत्।

अर्त्तिह्वीब्लीरीक्नुयीक्ष्माटयादन्तानामन्तः पो यलोपो गुणश्च नामिनाम् ॥४५१ ॥

अर्त्यादीनामादन्तानां च पकारोन्तो भवति यथासंभवं यलोपश्च नामिनां गुणश्च इनि परे॥ अर्पयति आर्प्पिपत्। ह्वेपयति। अजिह्विपत्। ब्ली वरणे। ब्लेपयति। अबिब्लिपत्। रीङ् श्रवणे। रेपयति अरीरिपत्। क्नूयी शब्दे। क्नोपयति। अचुक्नुपत्। क्ष्मायी विधूनने। क्ष्मापयति। अचिक्ष्मपत्। ह्वेपयति अजिह्वपत्। धापयति। अदीधपत्। मापयति अमीमपत्। स्थापयति। स्थापयेत्। अस्थापयत्।

तिष्ठतेरित् ॥४५२ ॥

तिष्ठतेरिद्भवति इनि चण् परे। अतिष्ठिपत् घ्रापयति।

जिघ्रतेर्वा ॥४५३ ॥

जिघ्रतेर्वा इद्भवति इति चण्परे। अजिघ्रिपत्। अजिघ्रपत्। देवयति। अदीदिवत्। सावयति। असूषुवत्। नहयति। अनीनहत्। अभिषावयति। आशयति। आशिशत्। चाययति। अचीचयत्।

इन् प्रत्यय के आने पर शा छा सा ह्वा व्या और वेप् धातु से आय् होता है ॥४४८ ॥

शाययति। छाययति। अचिच्छयत्। अवसाययति। अवासीषयत्। ह्वाययति।

कारित प्रत्यय, चण् और सन् के आने पर ह्वा को नित्य ही संप्रसारण होता है ॥४४९ ॥

अजूहवत्। व्याययति। अविव्ययत्। वाययति। अवीवयत्। पाययति।

इन् चण् के आने पर पा के अभ्यास को 'ई' और उपधा का लोप हो जाता है ॥४५० ॥

अपीप्यत्। अद्—आदयति। आदिदत्। वाचयति। अवीवचत्। हु—हावयति। अजूहवत्।

ऋ ह्वी ब्ली री, क्नूयी क्ष्मा आदि धातु और आकारांत धातु के अन्त में पकार का आगम हो जाता है और इन् के आने पर यथासंभव 'य' का लोप, नामि को गुण हो जाता है ॥४५१ ॥

अर्पयति। आर्प्पिपत्। ह्वेपयति। अजिह्विपत्। ब्ली-वरण। ब्लेपयति। अबिब्लिपत्। रीङ्—श्रवण करना। रेपयति। अरीरिपत्। क्नूयी-शब्द करना। क्नोपयति। अचुक्नुपत्। क्ष्मायी-हिलाना। क्ष्मापयति। अचिक्ष्मपत्। घ्रापयति। अदीधपत्। मापयति। अमीमपत्। स्थापयति। स्थापयेत्। स्थापयतु। अस्थापयत्।

इन् चण् के आने पर स्था को विकल्प से इत् होता है ॥४५२ ॥

अतिष्ठिपत्। घ्रापयति।

इन् चण् के आने पर घ्रा को विकल्प से इत् होता है ॥४५३ ॥

अजिघ्रिपत्। अजिघ्रपत्। देवयति। अदीदिवत्। सावयति। असूषुवत्। नहयति। अनीनहत्।

तोदयति। अतूतुदत्। मारयति। अमीमरत्। मोचयति। अमूमुचत्। रोधयति। अरूरुधत्। भोजयति अबूभुजत्। योजयति। अयूयुजत्। तानयति। अतीतनत्। मानयति। अमीमनत्। कारयति अचीकरत्।

स्मिजिक्रीङामिनि ॥४५४॥

एषामाकारो भवति इनि परे। विस्मापयति। व्यसिस्मपत्। विजापयति। व्यजिजपत्। विक्रापयति। व्यचिक्रपत्। अध्यापयति। अध्यापिपत्। वीरयति अवीवरत्। ग्राहयति अजिग्रहत्। चोरयति अचूचुरत्। तन्त्रयति अततन्त्रत्।

मानुबन्धानां ह्रस्वः ॥४५५॥

मानुबन्धानां धातूनां ह्रस्वो भवति इनि परे॥ अस्योपधाया दीर्घो न भवति॥ घटादयो मानुबन्धाः। घट चेष्टायां॥ घटयति॥ अजिघटत्। व्यथ भयचलनयोः॥ व्यथयति। अविव्यथत्।

जनिजृष्क्नस्रञ्जोऽमन्ताश्च ॥४५६॥

एषां ह्रस्वो भवति सनि परे। जनिङ् प्रादुर्भावे। जनयति। अजीजनत्। जृष् वयोहानौ॥ जरयति अजीजरत्। क्नस ह्वरण दीप्तौ। क्नसयति। अचिक्नसत्। रञ्ज रागे।

रञ्जेरिनि मृगरमणे ॥४५७॥

मृगरमणार्थे इनि परे रञ्जेरनुषङ्गलोपो भवति। रजयति। अरीरजत्। पक्षे रञ्जयति॥ अररञ्जत्। रमु क्रीडायां। रमयति। अरीरमत्। श्रमु तमसि खेदे च। श्रमयति। अशिश्रमत्।

ज्वलह्वलह्मलनमोनुपसर्गा वा ॥४५८॥

अभिषावयति। आशयति। आशिशत्। वृद्धि होकर—चाययति। अचीचयत्। तोदयति। अतूतुदत्। मारयति। अमीमरत्। मोचयति अमूमुचत्। रोधयति। कारयति। अचीकरत्। इत्यादि।

इन् के आने पर स्मि, जि, क्री और इङ् को आकार हो जाता है ॥४५४॥

विस्मापयति। व्यसिस्मपत्। विजापयति। व्यजिजपत्। विक्रापयति। व्यचिक्रपत्। अध्यापयति। अध्यापिपत्। वारयति। अवीवरत्। ग्राहयति। अजिग्रहत्। चोरयति। अचूचुरत्।

इन् के आने पर मानुबंध धातु को ह्रस्व हो जाता है ॥४५५॥

अ की उपधा को दीर्घ नहीं होता है। घटादि धातु मानुबंध कहलाते हैं। घट-चेष्टा करना। घटयति। अजीघटत्। व्यथ-भय, चलन। व्यथयति। अविव्यथत्।

जन् जृष् क्नस् और रञ्ज के धातु को इन् के आने पर ह्रस्व होता है ॥४५६॥

जनिङ्-प्रादुर्भावे। जनयति। अजीजनत्। जृष्-जीर्ण होना या वृद्ध होना। जरयति। अजीजरत्। क्नस-ह्वरण और दीप्त अर्थ में है। क्नसयति। अचिक्सनत्। रञ्ज-रंग।

मृगों को रमण कराने अर्थ में इन् प्रत्यय के आने पर रञ्ज के अनुषंग का लोप हो जाता है ॥४५७॥

रजयति। अरीरजत्। पक्षे—रञ्जयति। अररञ्जत्। रमु-क्रीडा करना। रमयति। अरीरमत्। श्रमु-श्रमयति। अशिश्रमत्।

ज्वल्, ह्वल, ह्मल और नम धातु उपसर्ग सहित नियम से मानुबन्ध होते हैं। और उपसर्ग रहित विकल्प से मानुबन्ध होते हैं ॥४५८॥

एते सोपसर्गा नित्यं मानुबन्धा भवन्ति ॥ एते अनुपसर्गा वा मानुबन्धा भवन्ति । तत्र सोपसर्गपक्षे मानुबन्धानां ह्रस्वः । ज्वल दीप्तौ प्रज्वलयति ॥ प्राजिज्वलत् । ह्वल ह्मल चलने । प्रह्वलयति । प्राजिह्वलत् । प्रह्मलयति । प्राजिह्मलत् । अमन्तत्वात् ॥ प्रणमयति । प्राणीनमत् । उपनमयति । उपानीनमत् ।

अनुपसर्गा वा ॥४५९ ॥

एते अनुपसर्गा वा मानुबन्धा भवन्ति । ज्वलयति । ज्वालयति । अजिज्वलत् । ह्वलयति । ह्वालयति । अजिह्वलत् । ह्मलयति अजिह्मलत् । नमयति ॥ नामयति । अनीनमत् ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

ग्लास्नावनवमश्च ॥४६० ॥

एते मानुबन्धा वा भवन्ति । ग्लै हर्षक्षये । ग्लापयति । ग्लपयति । अजिग्लपत् । ष्णा शौचे ॥ स्नपयति । स्नापयति । असिस्नपत् । वन षण संभक्तौ ॥ वनयति । वानयति । अवीवनत् । टुवमुद्गिरणे । वमयति । वामयति । अवीवमत् ।

न कमभ्यमि चमः ॥४६१ ॥

एषां ह्रस्वो न भवति इनि परे ।

कमेरिनिङ् कारितम् ॥४६२ ॥

कमेः कारितसंज्ञक इनिङ् भवति स्वार्थे । कमु कान्तौ । कामयते । अचिकमत् । अम हम मी मृ हय गतौ ॥ आमयति । आमिमत् । चमु अदने । चामयति । अचीचमत् ।

शमोऽदर्शने ॥४६३ ॥

शमोऽदर्शनेऽर्थे ह्रस्वो भवति इनि परे । शमयति रोगान् । अशिशमत् । अदर्शन इति किं ? निशामयति रूपं । न्यशीशमत् ।

यमोऽपरिवेषणे ॥४६४ ॥

उपसर्ग पक्ष में मानुबन्ध होने से ह्रस्व होते हैं । ज्वल-दीप्त होना प्रज्वलयति । प्राजिज्वलत् । ह्वल ह्मल—चलन । प्रह्वलयति । प्राजिह्वलत् । प्रह्मलयति । प्राजिह्मलत् । प्रणमयति । प्राणीनमत् । उपनमयति । उपानिनमत् ।

उपसर्ग रहित विकल्प से मानुबन्ध होते हैं ॥४५९ ॥

ज्वलयति । ज्वालयति । अजिज्वलत् । ह्वलयति, ह्वालयति नमयति, नामयति । अनीनमत् ।

ग्ला, स्ना वन और वम ये धातु मानुबन्ध विकल्प से होते हैं ॥४६० ॥

ग्लापयति, ग्लपयति । ष्णा—नहाना । स्नपयति, स्नापयति वन षण—संभक्ति । वनयति, वानयति । वमयति । वामयति । अवीवमत् ।

कम अम और चम को इन् के आने पर ह्रस्व नहीं होता है ॥४६१ ॥

कम से कारित संज्ञक इनिङ होता है स्वार्थ में ॥४६२ ॥

कामयते । ङानुबंध प्रत्यय से आत्मनेपदी हो गया है । अचीकमत् । अम, हम, मी, मृ, हय—गमन करना । आमयति आमिमत् । चमु—खाना । चामयति । अचीचमत् ।

इन् के आने पर शम् को अदर्शन अर्थ में ह्रस्व होता है ॥४६३ ॥

शमयति । रोगों को शांत करता है । अशिशमत् । नहीं देखना अर्थ हो ऐसा क्यों कहा ? देखने अर्थ में दीर्घ हो गया । निशामयति रूपं । न्यशीशमत् ।

अपरिवेषण अर्थ में यम् को ह्रस्व होता है ॥४६४ ॥

यमः अपरिवेषणेऽर्थे ह्रस्वो भवति इनि परे। यम उपरमे। नियमयति। अपरिवेषण इति किं आयामयति। आयीयमत्।

स्खदिरवपरिभ्यां च ॥४६५॥

स्खदिरवपरिभ्यां च ह्रस्वो भवति इनि परे। स्खदिष् स्खदने। अवस्खदयति। अन्योपसर्गान्न भवति। उपस्खादयति। अवचिस्खदत्। परिचिस्खदत्। उपचिस्खदत्।

पण गतौ ॥४६६॥

पणो गत्यर्थे ह्रस्वो भवति इनि परे॥ पणयति॥ अगत्यर्थ इति किं ? पाणयति। अपीपणत्।

इति इन्नन्ताः॥

आत्मेच्छायां यिन् ॥४६७॥

नाम्नो यिन्भवति आत्मेच्छायां।

यिन्यवर्णस्य ॥४६८॥

अवर्णस्य इत्वं भवति यिनि परे॥ पुत्रमिच्छत्यात्मनः पुत्रीयति॥ पुत्रीयेत्। पुत्रीयतु। अपुत्रीयत्। अपुत्रीयीत्॥ पुत्रीयाञ्चकार। पुत्रीयिता। पुत्रीय्यात्। पुत्रीयिष्यति। अपुत्रीयिषीत्। एवं घटीयति। वस्त्रीयति। सुवर्णीयति।

काम्य च ॥४६९॥

नाम्नः काम्यो भवति आत्मेच्छायां। पुत्रमिच्छत्यात्मनः पुत्रकाम्यति। पुत्रकाम्येत्। पुत्रकाम्यतु। अपुत्रकाम्यत्। अपुत्रकाम्यीत्। पुत्रकाम्याञ्चकार। पुत्रकाम्यिता। पुत्रकाम्यात्। पुत्रकाम्यिष्यति। अपुत्रकाम्यिष्यत्। एवं इदंकाम्यति।

नियमयति। अपरिवेषण ऐसा क्यों कहा ? आयामयति आयीयमत्।

इन् के आने पर अव, परि उपसर्ग पूर्वक स्खदिष् धातु ह्रस्व हो जाता है ॥४६५॥

अवस्खदयति। अन्य उपसर्ग से ह्रस्व नहीं होगा। यथा—उपस्खादयति।

इन् के आने पर पण गत्यर्थ में ह्रस्व होता है ॥४६६॥

पणयति। गत्यर्थ ऐसा क्यों कहा ? पाणयति।

इस प्रकार से कारित संज्ञक इन प्रत्ययान्त प्रकरण समाप्त हुआ।

अथ नाम धातु प्रकरण

आत्म इच्छा में नाम से यिन् प्रत्यय होता है ॥४६७॥

यिन् के आने पर अवर्ण को ईकार होता है ॥४६८॥

पुत्रमिच्छत्यात्मनः। अपने लिये पुत्र चाहता है।

पुत्र य् ति अवर्ण को ई होकर 'पुत्रीय्' रहा 'ते धातवः' से धातु संज्ञा होकर अन् विकरण और पुत्रीयति। पुत्रीयेत्। पुत्रीयतु। अपुत्रीयत्। अपुत्रीयीत्। पुत्रीयाञ्चकार पुत्रीयिता। पुत्रीय्यात्। पुत्रीयिष्यति। अपुत्रीयिष्यत्। घट इच्छति आत्मनः। घटीयति। वस्त्रीयति सुवर्णीयति।

आत्म इच्छा अर्थ में नाम से 'काम्य' प्रत्यय हो जाता है ॥४६९॥

पुत्रकाम्य 'ते धातवः' से धातु संज्ञा होकर पुत्रकाम्यति इत्यादि। इदंकाम्यति आत्मनः। इदंकाम्यति।

उपमानादाचारे ॥४७० ॥

उपमानान्नाम्नो यिन्भवति आचारेऽर्थे। पुत्रमिव आचरति पुत्रीयति माणवकं। एवं क्षीरीयति जलं। भूपीयति पुत्रकं। इति यिन्नन्तः।

कर्तुरायिस्सलोपश्च ॥४७१ ॥

कर्तुरुपमानान्नाम्नः आयि भवति आचारेऽर्थे यथासंभवं सलोपश्च ॥

आय्यन्ताच्च ॥४७२ ॥

आयिप्रत्ययान्ताद्धातोरात्मनेपदं भवति। श्येन इव आचरति श्येनायते। श्येनायेत। श्येनायतां। अश्येनायत। अश्येनायिष्ट। श्येनायाञ्चक्रे। श्येनायिता। श्येनायिष्यते। अश्येनायिष्यत ॥ एवं अप्सरायते ॥

ओजसोप्सरसोर्नित्यं पयसस्तु विभाषया ॥
आयिलोपश्च विज्ञेयो गर्दभत्यश्वतीत्यपि ॥१ ॥

ओजस्वि इव आचरति। ओजायते। एवं अप्सरायते। पयायते।

नामिव्यञ्जनान्तादायेरादेः ॥४७३ ॥

नामिव्यञ्जनान्तात्परस्य आयेरादेर्लोपो भवति। पयस्यते। वाशब्दस्येष्टाऽर्थत्वात्क्वचिदायिलोपः। आय्यन्ताच्चेत्यन्तग्रहणाधिक्यादायिलोपे परस्मैपदं भवति ॥ गर्दभ इव आचरति गर्दभति। एवं अश्वति। अग्नीयते। एवं पटूयते। पित्रीयते। रैयते।

नलोपश्च ॥४७४ ॥

आचार अर्थ में उपमान नाम से यिन् प्रत्यय होता है ॥४७० ॥

पुत्रमिव आचरति = पुत्रीयति। क्षीरीयति। भूपीयति। इस प्रकार से नाम से यिन्नंत प्रत्ययान्त समाप्त हुआ।

आचार अर्थ में उपमान, नामकर्ता से 'आय्' प्रत्यय होता है ॥४७१ ॥

और यथा संभव 'स' का लोप हो जाता है।

आय् प्रत्ययान्त धातु आत्मनेपदी होता है ॥४७२ ॥

श्येन इव आचरति = श्येनायते। एवं अप्सरा इव आचरति = अप्सरायते। अप्सरस् में सकार का लोप हुआ है।

श्लोकार्थ—ओजस् और अप्सरस् के सकार का नित्य ही लोप होता है और पयस् के सकार का विकल्प से लोप होता है। एवं गर्दभ और अश्व में आय् प्रत्यय का लोप हो जाता है ॥१ ॥

ओजस्वि इव आचरति = ओजायते। पयः इव आचरति = पयायते।

नामि, व्यञ्जनान्त से परे आय् की आदि का लोप होता है ॥४७३ ॥

पयस्यते। वा शब्द इष्ट अर्थ वाला होने से कहीं पर आय् का लोप होता है। 'अय्यन्ताच्च' सूत्र ४७२ में 'अंत' शब्द के ग्रहण की अधिकता होने से 'आय्' प्रत्यय का लोप होने पर परस्मैपद होता है। गर्दभ इव आचरति = गर्दभति। अश्वति। अग्नीयते। आय् की आदि 'आ' का लोप होकर पूर्व स्वर को ई और या दीर्घ होकर अग्नीयते बना। पटूयते। पित्रीयते। रैयते।

यिन् आय् प्रत्यय के आने पर 'न' का लोप हो जाता है ॥४७४ ॥

नलोपश्च भवति यिन्यायोः परतः। विध्वस्यते॥ अनुद्वह्यते।

ओतायिन्नायिपरे स्वरवत् ॥४७५॥

ओतः परौ यिन्नायिस्वरवद्भवतः॥ ओ अविति संधिः। गामित्यात्मन इच्छति गव्यति। गौरिवाचरति गव्यते।

औत्वश्च ॥४७६॥

औतः परो यिन्नायिस्वरवद्भवति॥ नावमिच्छत्यात्मनः नाव्यति। नौरिवाचरति नाव्यते।

वा गल्भक्लीबहोढेभ्यः ॥४७७॥

एभ्यः परमात्मनेपदं भवति। वाशब्दस्येष्टार्थत्वात् क्वचिदायिलोपः। गल्भ इव आचरति गल्भते। क्लीबते। होढते।

कष्टकक्षसत्रगहनाय पापे क्रमणे ॥४७८॥

एभ्यश्चतुर्थ्यन्तेभ्यः पापे वर्त्तमाने क्रमण इत्यर्थे आयिप्रत्ययो भवति। कष्टाय कर्मणे क्रामति कष्टायते। एवं कक्षायते। सत्रायते। गहनायते। पाप इति किं ? कष्टाय तपसे क्रामति।

बाष्पोष्मफेनमुद्गमनि ॥४७९॥

मार्गदर्शक ... महाराज

बाष्पादिभ्यो द्वितीयान्तेभ्य उद्गमनेऽर्थे आयिप्रत्ययो भवति॥ बाष्पमुद्गमति बाष्पायते। ऊष्माणमुद्गमति उष्मायते। नस्य लोपः फेनमुद्गमति फेनायते।

सुखादीनि वेदयते ॥४८०॥

सुखादिभ्यो द्वितीयान्तेभ्यो वेदयते इत्यर्थे आयिप्रत्ययो भवति। सुखमावेदयते सुखायते। एवं दुःखायते। तदनुभवतीत्यर्थः।

विध्वस्यते। अनुद्वह्यते।

ओकार से परे यिन् आय् प्रत्यय स्वरवत् हो जाते हैं ॥४७५॥

गां इति आत्मनः इच्छति। गो य ति 'ओ अव्' गव्यति। गौरिव आचरति = गव्यते।

औकार से परे यिन् आय् स्वरवत् होते हैं ॥४७६॥

नावं इच्छति आत्मनः = नाव्यति। नाव्यते।

गल्भ, क्लीब और होढ से परे आत्मनेपद होता है ॥४७७॥

वा शब्द इष्ट अर्थवाची होने से कहीं पर आय् का लोप हो जाता है। गल्भते। क्लीबते। होढते। गल्भ-धृष्टता। होढ—अनादर होना।

कष्ट, कक्ष, सत्र और गहन ये चतुर्थ्यंत शब्द पाप अर्थ में होवें तव आय् प्रत्यय होता है ॥४७८॥

कष्टाय कर्मणे क्रामति = कष्टायते। कक्षायते। सत्रायते। जहनायते। पाप अर्थ हो ऐसा क्यों कहा ? तो कष्टाय तपसे क्रामति। यहाँ तपस्या अर्थ में आय् प्रत्यय नहीं हुआ है।

वाष्प, ऊष्म और फेन से उद्गमन अर्थ में आय् प्रत्यय होता है ॥४७९॥

वाष्पमुद्गमति = वाष्पायते। ऊष्मायते। फेनायते।

द्वितीयान्त, सुखादि से वेदन अर्थ में आय् प्रत्यय होता है ॥४८०॥

सुखमावेदयते = सुखायते। दुःखायते। उसका अनुभव करता है।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

शब्दादीन् करोति ॥४८१ ॥

शब्दादिभ्यो द्वितीयान्तेभ्यः । करोत्यर्थे आयिप्रत्ययो भवति । शब्दं करोति शब्दायते । एवं वैरायते । कलहायते ।

नमस्तपोवरिवसश्च यिन् ॥४८२ ॥

एभ्यो यिन्भवति करोत्यर्थे । नमस्करोति नमस्यति देवान् । एवं तपस्यति शत्रून् । वरिवस्यति गुरून् ।

कण्ड्वादिभ्यो यन् ॥४८३ ॥

कण्ड्वादिभ्यो यन्भवति करोत्यर्थे ॥ कण्डूं करोति कण्डूयते । एवं तिरस्करोति तिरस्यते । इत्यायिप्रत्ययान्ताः ।

गुपूधूपविच्छपनेरायः ॥४८४ ॥

गुपूप्रभृतिभ्य आयः प्रत्ययो भवति स्वार्थे । गोपायति । गोपायाञ्चकार ॥ गोपयिता । एवं धूपायति । विच्छायति । विश विच्छ गतौ । पणायते । पणि व्यवहारे । पनायते । पन स्तुतौ च ॥ इत्यायान्ताः ।

अभूततद्भावे कृभ्वस्तिषु विकाराच्च्विः ॥४८५ ॥

विकारान्नाम्नश्च्विर्भवति अभूततद्भावेऽर्थे कृभ्वस्तिषु परेषु ।

च्वौऽचावर्णस्य ईत्वम् ॥४८६ ॥*

अवर्णस्य ईत्वं भवति च्वौ च परे । च्विसर्वापहारिप्रत्ययस्य लोपः । अशुक्लं शुक्लं करोति शुक्लीकरोति । अशुक्लः शुक्लः क्रियते शुक्लीक्रियते । अशुक्लः शुक्लो भवति शुक्लीभवति ।

द्वितीयान्त शब्दादि से करोति अर्थ में आय् प्रत्यय होता है ॥४८१ ॥

शब्दं करोति = शब्दायते । वैरायते कलहायते ।

नमस् तपस् वरिवसस् शब्द से करोत्यर्थ में यिन् प्रत्यय होता है ॥४८२ ॥

नमस्करोति = नमस्यति । तपस्यति । वरिवस्यति ।

कण्डू आदि से करोति अर्थ में 'यन्' प्रत्यय होता है ॥४८३ ॥

कण्डूं करोति = कंडूयते । तिरस्करोति = तिरस्यते । इति आयि प्रत्ययान्त ।

गुपू, धूप, विच्छ और पन धातु से स्वार्थ में 'आय' प्रत्यय होता है ॥४८४ ॥

गुपू—रक्षणे = गोपायति । गोपायाञ्चकार । गोपायिता । धूप—संताने । धूपायति । विश् विच्छ—गमन करना । विच्छायति । पणि—व्यवहारे । पणायते । पन—स्तुति और व्यवहार । पनायते ।

इति आय प्रत्ययान्त ।

अभूत तद्भाव अर्थ में कृ भू अस् धातु से विकार होने से 'च्वि' प्रत्यय होता है ॥४८५ ॥

च्वि प्रत्यय के आने पर अवर्ण को 'ईकार' हो जाता है ॥४८६ ॥

च्वि प्रत्यय का सर्वापहारी लोप हो जाता है । अशुक्लं—शुक्लं करोति, शुक्ल + अम् कृ विभक्ति का लोप होकर शुक्ल कृ अवर्ण को 'ई' होकर 'शुक्ली कृ' है 'ते धातवः' से धातु संज्ञा होकर 'शुक्लीकरोति' बना । अशुक्लः शुक्लः क्रियते = शुक्लीक्रियते । शुक्लीभवति, शुक्लीस्यात् । अपटुः पटुः स्यात् ।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

अशुक्लः शुक्लः स्यात् शुक्लीस्यात्। अदीर्घो दीर्घः क्रियते दीर्घीक्रियते। अदीर्घं दीर्घं करोति दीर्घीकरोति। अदीर्घो दीर्घो भवति दीर्घीभवति। अदीर्घो दीर्घः स्यात् दीर्घीस्यात्। एवं पुत्रीक्रियते पुत्रीकरोति पुत्रीभवति पुत्रीस्यात्। अवनिता वनिता क्रियते। वनितीक्रियते। एवमग्नीक्रियते अग्नीकरोति अग्नीभवति अग्नीस्यात्। पटिक्रयते पटूकरोति पटूभवति पटूस्यात्।

ऋत ईदन्तश्च्विचेक्रीयितयिन्नायिषु ॥४८७ ॥*

ऋदन्तस्य च्विचेक्रीयितयिन्नायिषु परत ईदन्तो भवति। मात्रीकरोति मात्रीक्रियते मात्रीभवति मात्रीस्यात्। पित्रीकरोति पित्रीक्रियते। पित्रीभवति पित्रीस्यात्। इत्यादि। एवं सर्वमवगन्तव्यं।

इति च्विप्रत्ययान्ताः समाप्ताः। ❑

अथ पुषादयः।

पुषादिद्युतादिलृकारानुबन्धार्त्तिसर्त्तिशास्तिभ्यश्च परस्मै ॥४८८ ॥

इत्यण् प्रत्ययः सर्वत्र भवति। पुष पुष्टौ। अपुषत्। शुष शोषणे। अशुषत्। दुःख वैकल्ये। अदुःखत्। श्लिष आलिङ्गने। अश्लिषत्। ञिच्छिदा गात्रप्रक्षरणे। अच्छिदत्। क्षुध बुभुक्षायां। अक्षुधत्। शुध शौचे। अशुधत्। षिध संराद्धौ। असिधत्। रध हिंसायां। अरधत्। तृप प्रीणने। अतृपत्। दृप हर्षणमोचनयोः। अदृपत्। मुह वैचित्ये। अमुहत्। द्रुह जिघांसायां। अद्रुहत्। ष्णुह उद्गिरणे। अस्नुहत्। ष्णिह प्रीतौ। अस्निहत्। णश् अदर्शने। अनशत्। शम् दम् उपशमे। अशमत् अदमत्। तमु कांक्षायां। अतमत्। श्रमु तपसि खेदे च। अश्रमत्। भ्रमु अनवस्थाने। अभ्रमत्। क्षमूष् सहने। अक्षमत्।

च्वि प्रत्यय के आने पर अवर्ण को 'ई' एवं अन्य स्वर में पूर्व स्वर को दीर्घ होता है। अतः पटूस्यात्।

च्वि, चेक्रीयित, यिन् आमि प्रत्यय के आने पर ऋकारांत से पर 'ई' हो जाता है ॥४८७ ॥

अमातरम् मातरम् करोति, मातृ + अम् कृ विभक्ति का लोप होकर, ईकार होकर मातृ + ई = मात्रीकरोति।

अपितरम् पितरम् करोति = पित्रीकरोति। पित्रीस्यात् इत्यादि। ऐसे सभी में समझ लेना चाहिये।

इति च्वि प्रत्ययांत। ❑

अथ पुषादि प्रकरण

पुषादि, द्युतादि, लृकारानुबंध, ऋ, सृ और शास् धातु से अद्यतनी के परस्मैपद में सर्वत्र 'अण्' प्रत्यय हो जाता है ॥४८८ ॥

पुष्—पुष्ट होना। अपुषत्। शुष—शोषण करना। अशुषत् दुःख—विकल होना। अदुःखत्। श्लिष्—आलिंगन करना। अश्लिषत्। ञिच्छिदा—गात्रप्रक्षरणे। अच्छिदत्। क्षुध्—बुभुक्षा = अक्षुधत्। शुच्—शुद्ध होना। अशुधत्। षिध्—संराद्ध अर्थ में। असिधत्। रध—हिंसा। अरधत्। तृप्—प्रीणन। अतृपत्। दृप्—हर्ष-और मोचन = अदृपत्। मुह—अमुहत्। द्रुह—द्रोह करना। अद्रुहत्। ष्णुह—उद्गिरण। अस्नुहत्। ष्णिह—प्रीति। अस्निहत्। णश्—नष्ट होना। अनशत्। शम् दम्—उपशम होना = अशमत्, अदमत्। तमु—कांक्षा = अतमत्। अश्रमत्। अभ्रमत्। अक्षमत्। अक्लमत्। अमदत्। अपासत्। अयसत्। जसु—मोक्षणे = अजसत्। तसु, दसु उपक्षये अतसत्। अदसत्। वसु—स्तंभे = अवसत्। प्लुष्—दाह। अप्लुषत्। विष्—प्रेरणा = अविषत्। कुश—श्लेषण-अकुशत्। बुस्—उत्सर्ग करना = अबुसत्। मुश—खंडन करना अमुशत्। मसि—

क्लमु ग्लानौ। अक्लमत्। मदीहर्षे। अमदत्। असु क्षेपणे। अपासत्। यसु प्रयत्ने। अयसत्। जसु मोक्षणे। अजसत्। तसु दसु उपक्षये। अतसत्। अदसत्। वसु स्तम्भे। अवसत्। प्लुष दाहे। अप्लुषत्। विष प्रेरणे। अविषत्। कुश श्लेषणे। अकुशत्। बुस उत्सर्गे। अबुसत्। मुश खण्डने। अमुशत्। मसि परिणामे। अमसत्। लुठ विलोडने। अलुठत्। उच समवाये। औचत्। भृश भ्रंश अधःपतने। अभृशत्। वृश वरणे। अवृशत्। कृश तनूकरणे। अकृशत्। ञितृष पिपासायां। अतृषत्। तुष हृष तुष्टौ। अतुषत्। अहृषत्। कुप क्रुध रुष रोषे। अकुपत्। अक्रुधत्। अरुषत्। डिप क्षेपे। अडिपत्। स्तुप समुच्छ्राये। अस्तुपत्। गुप व्याकुलत्वे। अगुपत्। युप रुप लुप विमोहने। अयुपत्। अरुपत्। अलुपत्। लुभ गार्ध्ये। अलुभत्। क्षुभ संचलने। अक्षुभत्। नभ तुभ हिंसायां। अनभत् अतुभत्। क्लिन्दू आर्द्रीभावे। अक्लिन्दत्। ञिमिदा स्नेहने। अमिदत्। ञिक्ष्विदा मोचने। आक्ष्वदत्। ऋध वृद्धौ। आर्द्धत्। गृधु अभिकांक्षायां। अगृधत्। इति पुषादिः। पुषादिद्युतादीत्यण् प्रत्ययः। द्युत शुभ रुच दीप्तौ। अद्युतत् अद्योतिष्ट। एवं सर्वत्र आत्मनेपदेऽपि। अशुभत्। अरुचत्। श्वित आवरणे।

श्वितादीनां ह्रस्वः ॥४८९॥

श्वितादीनां ह्रस्वो भवति। अश्वितत्। घुट् परिवर्तने। अघुटत्। रुट लुट लुठ प्रतीघाते। अरुटत्। अलुटत्। अलुठत्। क्षुभ संचलने। अक्षुभत्। श्रंस भ्रंस अवस्रंसने। अश्रसत्। अभ्रसत्। ध्वंस गतौ च। अध्वसत्। स्रंभु विश्वासे। अस्रभत्। वृत वर्तने। अवृतत्। वृद्ध वृद्धौ। वृधु वर्धने। अवृधत्। शृदृ शब्दकुत्सायां। अशृदत्। स्यन्दू प्रस्रवणे। अस्यदत्। कृपू सामर्थ्ये। अकृपत्। गृधु अभिकांक्षायां। अगृधत्।

ऋतो लृत्॥४९०॥

कृपेर्धातोः ऋतो लृत् भवति। अक्लृपत्।

इति द्युतादिः॥

परिणामे = अमसत्। लुठ— विलोडन = अलुठत्। उच्—समवाये = औचत्। भ्रश, भ्रंश—अधःपतन—अभृशत्। वृश्—वरण करना = अवृशत्। कृश—तनू करना अकृशत्। तृष—प्यास = अतृषत्। तुष हृष—तुष्ट होना = अतुषत्, अहृषत्। अकुपत्। अरुषत् अक्रुधत्। डिप—क्षेपण करना = अडिपत्। षुप्—समुच्छ्राये = अस्तुपत् गुप—व्याकुलता = अगुपत्। युप, रुप, लुप—विमोहन अयुपत् अरुपत् अलुपत्। लुभ—गृद्धता = अलुभत्। अशुभत्। नभ तुभ हिंसा = अनभत् अतुभत्। क्लिन्दू—गीला होना। अक्लिन्दत्। ञिमिदा—स्नेह करना = अमिदत्। ञिक्ष्विदा—मोचन = अक्ष्वदत्। ऋध—वृद्धि होना = आर्द्धत्। गृधु—अभिकांक्षा—अगृधत्। इति पुषादिः। द्युत शुभ रुच—दीप्त होना = अद्युतत्। अद्योतिष्ट। इसी प्रकार से सर्वत्र आत्मनेपद में भी रूप चलते हैं। अशुभत् अरुचत्। श्वित्—आवरण करना।

श्वित आदि को ह्रस्व हो जाता है ॥४८९॥

अश्वितत्। घुट—परिवर्तन होना = अघुटत्। रुट् लुट लुठ—प्रतिघात होना = अरुटत् अलुटत् अलुठत्। स्रंस् भ्रंस्—अस्रसत्, अभ्रसत्। अध्वसत् स्रंभु—विश्वास = अस्रभत्। वृत-वर्तने = अवृतत्। वृद्ध-वृद्धि होना। वृधु—वर्धित होना = अवृधत्। शृद् = शब्द कुत्सा में = अशृदत्। स्यंदू—प्रस्रवण करना = अस्यंदत्। कृपू—सामर्थ्य = अकृपत्। अगृधत्।

कृप धातु से ऋ को 'लृ' हो जाता है ॥४९०॥

अक्लृपत्।

इति द्युतादिः।

भावसेनत्रिविद्येन वादिपर्वतवज्रिणा।
कृतायां रूपमालायामाख्यातः परिपूर्यते ॥१॥ ❑

अथ कृदन्ताः केचित्प्रत्ययान्ते

आचार्यरत्न श्री देशभूषण जी महाराज

सिद्धिरिज्वद्ञ्णानुबन्धे ॥४९१॥

ञ्णानुबन्धे कृत्प्रत्यये परे इचि कृतं कार्यमतिदिश्यते यथासंभवं।

धातोः ॥४९२॥

अविशेषेण धातोरित्यधिकारो वेदितव्यः।

कृत् ॥४९३॥

वक्ष्यमाणाः प्रत्ययाः कृत्संज्ञका वेदितव्याः।

कर्त्तरि कृ ॥४९४॥

कृत्प्रत्ययान्ताः कर्तृकारके भवन्ति।

वर्त्तमाने शन्तृङानशावप्रथमैकाधिकरणामन्त्रितयोः ॥४९५॥

अप्रथमैकाधिकरणामन्त्रितयोः परयोः वर्तमानकाले धातोः शन्तृङानशौ भवतः॥

सार्वधातुकवत् ॥४९६॥

शानुबन्धे कृति परि सार्वधातुकवत्कार्यं भवति। कृदन्ताः प्रायो वाच्यलिङ्गाः। शन्तृङन्तं क्विबन्तं धातुत्वं न जहाति। भवन् पुमान्। भवन्ती स्त्री। भवत्कुलं। लोकोपचारादानशानङावात्मनेपदे।

अर्थ—वादीरूपी पर्वतों के लिये वज्र के सदृश ऐसे वादिपर्वत वज्री श्री भावसेन त्रिविद्य मुनिराज ने इस रूपमाला टीका में आख्यात प्रकरण पूर्ण किया है ॥१॥

इस प्रकार से यहाँ तक तिङंत प्रकरण समाप्त हुआ है। ❑

अथ कृदन्त प्रकरण प्रारंभ होता है।

ञानुबंध, णानुबंध कृत् प्रत्यय के आने पर यथासंभव इच् में कहा गया कार्य हो जाता है ॥४९१॥

सामान्यतया 'धातोः' इस सूत्र से धातु का अधिकार समझना चाहिये ॥४९२॥

आगे धातु से कहे जाने वाले सभी प्रत्यय 'कृत्संज्ञक' समझना चाहिये ॥४९३॥

कृत् प्रत्यय वाले शब्द कर्तृकारक में होते हैं ॥४९४॥

अप्रथमैकाधिकरण और आमंत्रित से परे वर्तमानकाल में धातु से शतृङ् और आनश् प्रत्यय होते हैं ॥४९५॥

शानुबंध कृत् प्रत्यय के आने पर सार्वधातुकवत् कार्य होता है ॥४९६॥

कृत् प्रत्यय वाले शब्द प्रायः वाच्यलिंग होते हैं। अर्थात् विशेष्य के अनुकूल होते हैं। शतृङ् प्रत्यय वाले और क्विप् प्रत्यय वाले शब्द धातुपने को नहीं छोड़ते हैं। भू शतृङ्। श् ऋ और ङ् अनुबंध हैं अतः 'भू अन्त्' रहा 'अन् विकरणः कर्तरि' सूत्र से अन् विकरण होकर 'अनि च विकरणे' सूत्र से गुण

आनोऽत्रात्मने ॥४९७॥

अत्र आनः प्रत्यय आत्मनेपदं भवति।

आन्मोन्त आने ॥४९८॥

अकारान्तान्मकारागमो भवति आने परे॥ एधमानः पुत्रः। एधमाना लक्ष्मीः। एधमानं कुल। तथा पचन् पचन्ती पचत्। पचमानः पचमाना पचमानमित्यादि॥ अदन् अदन्ती अदत्। शयानः शयाना शयानं।

ङे न गुणः ॥४९९॥

नाम्यन्तयोर्धातुविकरणयोर्गुणो न भवति ङानुबन्धे कृति परे। ब्रुवन् ब्रुवाणः। जुह्वत् जुह्वानः। दधत् दधानः। दीव्यन्। सूयमानः। सुन्वन् सुन्वानः। अश्नुवानः॥ सर्वेषामात्मने इत्यादिना गुणो न भवति। चिन्वन् चिन्वानः। भावे। भूयमानं देवदत्तेन। एध्यमानमस्माभिः। भावे सर्वत्र नपुंसकलिङ्गत्वं एकत्वं च। कर्मणि। पच्यमान ओदनः। पच्यमानौ ओदनौ। पच्यमानाः ओदनाः। क्रियमाणः कट इत्यादि।

होकर भव अत् रहा। 'असंध्यक्षरयोरस्य तौ तल्लोपश्च' सूत्र २६ से अकार का लोप होकर 'भवन्त्' बना 'कृत्तद्धितसमासाश्च' सूत्र ४२३ से लिंग संज्ञा होकर व्यञ्जनान्त पुल्लिग में 'भवत्' बन गया। स्त्रीलिंग में 'नदाद्यञ्च वाह' इत्यादि सूत्र ३७२ से 'ई' प्रत्यय होकर भवन्ती बन कर लिंग संज्ञा होकर स्वरांत स्त्रीलिंग में नदी के समान रूप चलेगा। एवं नपुंसक लिंग में 'भवेत्' बनेगा।

लोकोपचार से आनश् और आनङ् प्रत्यय आत्मनेपद में होते हैं।

यहाँ आन प्रत्यय आत्मनेपद में होता है ॥४९७॥

आन प्रत्यय के आने पर अकारांत शब्द से मकार का आगम हो जाता है ॥४९८॥

एध् अ म् आन = एधमान 'कृत्तद्धितसमासाश्च' सूत्र से लिंग संज्ञा होकर बालकवत् एधमानः। स्त्रीलिंग में रमावत् 'एधमाना' नपुंसकलिंग में कुलवत् एधमानं बनेगा।

ऐसे ही पच् धातु से पचन्, पचन्ती, पचत् बनेंगे।

आनश् में पचमानः पचमानां, पचमानं बनेंगे।

अद्—अदन्। शीङ्—शयानः आदि।

ङानुबंध कृदन्त प्रत्यय के आने पर नाम्यंत धातु और विकरण को गुण नहीं होता है ॥४९९॥

ब्रू अन्त् 'स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ' ८३ सूत्र से ब्रुव् होकर ब्रुवन्त् है, लिंग संज्ञा होकर 'ब्रुवन्' बना। आनश् में—ब्रुवाणः। हु धातु से—हु अन्त् 'जुहोत्यादीनां सार्वधातुके' १५० सूत्र से 'हु हु अन्त् पूर्वोऽभ्यासः' १५१ से पूर्व को अभ्यास संज्ञा हुई पुनः 'हो जः' १५२ सूत्र से अभ्यास के हकार को जकार होकर जुहु अन्त् रहा 'जुहोतेः सार्वधातुके' १५५ सूत्र से उकार को वकार होकर जुह्वन्त् बना। लिंग संज्ञा होकर सि विभक्ति आकर "अभ्यस्तादन्तिरनकारः" २८८ सूत्र से नकार का लोप होकर 'व्यञ्जनाच्च' सूत्र से सि का लोप होकर 'जुह्वत्' बना। आनश् में—जुह्वानः बना। 'धा' धातु से—दधत् दधानः। दिवादि गण में—दिव् अन्त् है 'दिवादेर्यन्' सूत्र १८२ से यन् विकरण होकर १८३ सूत्र से दिव् को दीर्घ होकर २६वें सूत्र से अकार का लोप होकर 'दीव्यन्त्' बना। लिंग संज्ञा होकर 'दीव्यन्' स्त्रीलिंग में दीव्यन्ती, नपुंसक में दीव्यत् बना। सूयमानः। स्वादिगण में—नु विकरण होता है अतः सुन्वन्त् बना। सुन्वन् सुन्वानः। अश्नुवानः। "सर्वेषामात्मने सार्वधातुकेऽनुत्तमे पञ्चम्याः" ८७वें सूत्र से आत्मनेपद में गुण नहीं होता है।

चिन्वन् चिन्वानः।

भाव में—'सार्वधातुके यण्' ३१ सूत्र से यण् होकर आत्मनेपद में भूयमानं बना। ऐसे ही एध्यमानं।

भाव में सर्वत्र नपुंसकलिंग और एकवचन ही होता है।

शुभेच्छक - आचार्य श्री सुविधिसागर जी महाराज

वेत्तेः शन्तुर्वन्सुः ॥५०० ॥

विदः परस्य शन्तुर्वन्सुर्भवति । विद्वान् विद्वान्सौ ।

क्वन्सुकानौ परोक्षावच्च ॥५०१ ॥

धातोः परोक्षास्वरूपौ क्वन्सुकानौ भवतः ॥ क्वन्सु परस्मै कान आत्मनेपदं भवति ।

के यण्वच्च योक्तवर्जनम् ॥५०२ ॥

कानुबन्धे कृति परे यण्वत्कार्यं भवति योक्तं वर्जयित्वा । इति न गुणः । बभूवान् बभूवान्सौ बभूवान्सः । एधाञ्चक्रिवान् । एधाञ्चक्राणः । अत्र नाम्यादेर्गुरुमत इत्यादिना आमः कृञ् प्रयुज्यते इत्यनुप्रयोगः । पेचिवान् पेचानः । चक्रिवान् चक्राणः ।

ग्वोर्व्यञ्जनेऽये ॥५०३ ॥

धातोर्यकारवकारयोर्लोपो भवति यकारवर्जिते कृति व्यञ्जने परे । क्नूयी शब्दे । चुक्नूवान् । क्ष्मायी विधूनने । चक्ष्मावान् । दिव् क्रीडादौ । दिदिवान् । षिवु तन्तुसन्ताने । सिषिवान् । ष्ठिवु क्षिवु निरसने । तिष्ठिवान् । चिक्षिवान् ।

कर्मणि प्रयोग में—वाच्य के समान तीनों लिंग और एक द्वि बहुवचन भी होते हैं। यथा—पच्यमानः औदनः पच्यमानौ ओदनौ, पच्यमानाः ओदनाः । क्रियमाणः ।

विद् के परे शन्तृ को वन्स् आदेश हो जाता है ॥५०० ॥

अतः विद्वन्स् बना । लिंग संज्ञा होकर सि आदि विभक्ति में विद्वान् विद्वांसौ विद्वान्सः ।

धातु से परोक्षा अर्थ में क्वंसु कान प्रत्यय होते हैं ॥५०१ ॥

क्वन्सु परस्मैपद में एवं कान प्रत्यय आत्मनेपद में होता है ।

कानुबन्ध कृत् प्रत्यय के आने पर योक्त को छोड़कर यणवत् कार्य होता है ॥५०२ ॥

इससे गुण नहीं होता है । भू क्वन्स् में वन्स् रहता है । 'चण् परोक्षाचेक्रीयितसनन्तेषु' २९२ सूत्र से द्वित्व होकर भू भू वन्स् । 'पूर्वोभ्यासः' १५१ सूत्र से अभ्यास संज्ञा होकर 'भवतेरः' इस ३०५वें सूत्र से अभ्यास को अकार होता है । "द्वितीयचतुर्थयोः प्रथमतृतीयौ" १५९ सूत्र से तृतीय अक्षर होकर बभूवन्स् बना 'कृत्तद्धितसमासाश्च' सूत्र से लिंग संज्ञा होकर सि विभक्ति आकर 'बभूवान्' ऐसे ही एध धातु से आम् कृ का प्रयोग होकर 'कान' प्रत्यय होकर एधाञ्चक्राणः । यहाँ पर 'नाम्न्यादेर्गुरुमतः' इत्यादि सूत्र से आम् से कृ धातु का प्रयोग होता है । पेचिवन्स् पेचान बनकर लिंग संज्ञा होकर और सि विभक्ति आने पर पेचिवान् पेचानः । चक्रिवान् । चक्राणः ।

क्नूयी—शब्द करना । क्नूय क्नूय् वन्स् न का लोप होकर 'कवर्गस्य चवर्गः' २९३ सूत्र से चवर्ग होकर २९४ सूत्र से ह्रस्व होकर चुक्नूय् वन्स् रहा ।

यकार वर्जित कृत्प्रत्यय के आने पर धातु के यकार वकार का लोप हो जाता है ॥५०३ ॥

यकार का लोप होकर चूक्नूवन्स् लिंग संज्ञा होकर सि विभक्ति आकर 'चुक्नूवान्' बना ।

क्ष्मायी—कँपना । उपर्युक्त सूत्र से यकार का लोप होकर चक्ष्मावान् बना । दिव्—क्रीड़ा आदि । दिदिवान् ।

षिवु—सिषिवान् । तिष्ठिवान् चिक्षिवान् ।

गम् वन्स् द्वित्व होकर गम् गम् वन्स् कवर्ग को—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

गमहनविदविशदृशां वा ॥५०४॥

एषां वन्स् आजारङ् वा भवति यथासंभवं उपधालोपः। जग्मिवान्। इडभावे।

वमोश्च ॥५०५॥

वमोश्च परयोर्द्धातोर्मो नो भवति। जगन्वान् जघ्निवान्। जघन्वान्। विविदिवान्। विविद्वान्। विविशिवान्। विविश्वान्। ददृशिवान्।

दास्वान्साह्वान्मीढ्वांश्च ॥५०६॥

एते क्वन्स्रत्ययान्ता निपात्यन्ते। दासृ दाने। दास्वान्। षह मर्षणे। साह्वान्। मिह सेचने। मीढ्वान्।

तव्यानीयौ ॥५०७॥

धातोस्तव्यानीयौ भवतः।

ते कृत्याः ॥५०८॥

ते तव्यादयः कृत्या भवन्ति।

भावकर्मणोः कृत्यक्तखलर्थाः ॥५०९॥

भावे कर्मणि च कृत्यक्तखलर्था वेदितव्याः॥ पूर्वस्यापवादोऽयं॥ सुजनेन भवितव्यं। भवनीयं। अनुक्ते कर्त्तरि तृतीया। एधितव्यं। एधनीयं। उक्ते कर्मणि प्रथमा। अभिभवितव्यः शत्रुः। अभिभवनीयः। कर्त्तव्यः करणीय कटः दातव्यं दानीयं धनं।

गम् हन् विद् विश् और दृश् धातु से वन्स् प्रत्यय के आने पर विकल्प से उपधा का लोप होता है ॥५०४॥

ज गम् वन्स् में उपधा का लोप होकर विकल्प से इट् होकर जग्मिवान् बना।

व और म से परे धातु से म् को न् हो जाता है ॥५०५॥

जगन्वान्। हन् धातु से ह को ध होकर इट् होकर जघ्निवान्। इट् के अभाव में जघन्वान्। विद धातु से विविदिवान्। विविद्वान्। विश्—विविशिवान्, विविश्वान्। ददृशिवान्।

दास्वान्, साह्वान् और मीढ्वान् शब्द क्वंस् प्रत्ययांत निपात से सिद्ध होते हैं ॥५०६॥

दासृ-देना = दास्वान्। षह-मर्षण करना = साह्वान् मिह्—सेचन करना = मीढ्वान् ये। सब शब्द परोक्षा अर्थ में क्वंसु कान प्रत्यय से बने हैं।

धातु से तव्य अनीय प्रत्यय होते हैं ॥५०७॥

ये तव्य आदि प्रत्यय 'कृत्य' संज्ञक होते हैं ॥५०८॥

कृत्य, क्त और खल अर्थ वाले प्रत्यय भाव और कर्म में होते हैं ॥५०९॥

यह पूर्व का अपवाद है। भू तव्य भू अवीय 'नाम्यंतयोधातुविकरणयोर्गुणः' सूत्र से गुण होकर 'इडागमोऽसार्वधातुकस्यादिव्यंजनादेरयकारादेः' २२७वें सूत्र से इट् का आगम होकर भवितव्य बना 'कृत्तद्धितसमासाश्च' सूत्र से लिंग संज्ञा होकर सि विभक्ति में नपुंसक लिंग का एकवचन हुआ। भवितव्यं। अनीय में इट् प्रत्यय न होकर भवनीयं बना। सूत्र में नहीं कहने पर भी तव्य् अनीय प्रत्यय वाले शब्दों के प्रयोग में कर्ता में तृतीया होती है। कर्मणि प्रयोग में कर्ता में तृतीया एवं कर्म में प्रथमा होती है। त्वया अभिभवितव्यः शत्रुः—तुम्हें शत्रु का तिरस्कार करना चाहिये। इत्यादि।

कृत्ययुटोऽन्यत्रापि ॥५१० ॥

कृत्यो युट् च उक्तादन्यत्रापि भवति। स्ना शौचे। स्नानीयं चूर्णं। दानीयो ब्राह्मणः। वृत् वर्तने। समावर्त्तनीयो गुरुः॥

स्वराद्यः ॥५११ ॥

स्वरान्ताद्धातोर्यः प्रत्ययो भवति। चेयं जेयं नेयं।

उदौद्भ्यां कृद्यः स्वरवत् ॥५१२ ॥

उदौद्भ्यां परः कृद्यः स्वरवद्भवति। लव्यं अवश्यलाव्यं।

शकिसहिपवर्गान्ताच्च ॥५१३ ॥

शकिसहिभ्यां पवर्गान्ताच्च यो भवति। शक्लृ शक्तौ। शक्यं सह्यं। जप्यं। लभ्यं

आत्खनोरिच्च ॥५१४ ॥

आकारान्तात्खनो नश्च यो भवति अनयोरन्त इकारागमो भवति। देयं पेयं। खनु अवदारणे। खनेरिकारादेशः। अन्येषामागमः। खेयं

यमिमदिगदां त्वनुपसर्गे ॥५१५ ॥

एषामुपसर्गाभावे यो भवति। यम्यं मद्यं। गद्यं अनुपसर्ग इति किं ? घ्यण्—प्रयाम्यं। प्रमाद्यं प्रगाद्यं।

चरेराङ्गि चागुरौ ॥५१६ ॥

ऊपर कहे हुए भावकर्म से अतिरिक्त अन्यत्र भी कृत्य और युट् प्रत्यय होते हैं ॥५१०॥

स्ना—शुद्ध होना। स्नानीयं। दानीयः।

वृत्—वर्तन करना। समावर्त्तनीयः।

स्वरान्त धातु से 'य' प्रत्यय होता है ॥५११॥

चिञ्=चेयं जेयं नेयं।

उत् औत् से परे कृदन्त 'य' प्रत्यय होता है ॥५१२॥

लुञ्—गुण होकर य प्रत्यय के आने पर भी स्वरवत् ओ को अव् होकर लव्यं बना।

शकि, सहि और पवर्ग से परे 'य' प्रत्यय होता है ॥५१३॥

शक्लृ=शक्यं। सह्यं। जप्यं। लभ्यं।

आकारान्त और खन से 'य' प्रत्यय होता है ॥५१४॥

इनके अन्त में इकार का आगम होता है। दा इ य=देयं पेयं इत्यादि। खनु—खन् के न को इकार आदेश होता है। और अन्य धातुओं में आगम होता है। खेयं।

यम् मद् और गद् धातु को अनुपसर्ग में 'य' होता है ॥५१५॥

यम्यं, मद्यं, गद्यं। अनुपसर्ग ऐसा क्यों कहा ? उपसर्ग पूर्वक इन धातुओं से ५४१वें सूत्र से घ्यण् प्रत्यय होता है और णानुबन्ध से वृद्धि हो जाती है। प्रयाम्यं। प्रमाद्यं प्रगाद्यं।

उपसर्ग रहित आङ् से अगुरु अर्थ में चर् धातु से 'य' प्रत्यय होता है ॥५१६॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

अनुपसर्गे आङ्गि चरेर्यो भवति अगुरौ। आचर्यो देशः। अनुपसर्ग इति किं ? अभिचार्यं। अगुराविति किं ? आचार्यो गुरुः।

पण्यावद्यवर्या विक्रेयगर्ह्यानिरोधेषु ॥५१७॥

एतेष्वर्थेषु एते निपात्यन्ते यथासंख्यं। पण्यमिति निपात्यते विक्रेयार्थे। अवद्यमिति निपात्यते गर्ह्यार्थे। वर्यमिति निपात्यते अनिरोधार्थे। पण व्यवहारे स्तुतौ च। वद व्यक्तायां वाचि। वृञ् वरणे। पण्यं। अवद्यं। वर्यं।

वह्यं करणे ॥५१८॥

वह्यमिति निपात्यते करणेऽर्थे। वह्यं शकटं वाह्यमन्यत्।

अर्यः स्वामिवैश्ये ॥५१९॥

अर्यमिति निपात्यते स्वामिनि वैश्ये चार्थे। अर्यते इति अर्यः स्वामी अर्यो वैश्यः।

उपसर्या काल्याप्रजने ॥५२०॥

प्रजने प्राप्तकाले चेत् उपसर्या इति निपात्यते। सृ गतौ। उपसर्या ऋतुमतीत्यर्थः।

अजर्यं संगते ॥५२१॥

अजर्यमिति निपात्यते संगतेऽर्थे। न जीर्यत इत्यजर्यं आर्यसंगतं।

नाम्नि वदः क्यप् च ॥५२२॥

आचर्यः देशः। अनुपसर्ग ऐसा क्यों कहा ? घ्यण् प्रत्यय में अभि उपसर्ग से परे अभिचार्यं। गुरु अर्थ न हो ऐसा क्यों कहा ? आचार्यः गुरुः।

विक्रेय गर्ह्य और अविरोध अर्थ में पण्य अवद्य और वर्य निपात से सिद्ध होते हैं ॥५१७॥

क्रम से पण् व्यवहार और स्तुति अर्थ में है, विक्रेय अर्थ में 'पण्यं' निपात से सिद्ध हुआ। वद-स्पष्ट बोलना गर्ह्य अर्थ में न वद्यं='अवद्यं' निपात से बना। वृञ्-वरण करना। अनिरोध अर्थ में—वर्यं निपात से बन गया है।

करण अर्थ में 'वह्य' निपात से सिद्ध होता है ॥५१८॥

वह धातु से वह्यं-शकटं। अन्य अर्थ में वाह्यं बना।

स्वामी और वैश्य अर्थ में 'अर्य' शब्द निपात से सिद्ध होता है ॥५१९॥

ऋ धातु से अर्यते इति अर्यः स्वामी और वैश्य।

यदि प्रजनकाल प्राप्त है तो 'उपसर्या' यह शब्द निपात से सिद्ध होता है ॥५२०॥

सृ—गमन करन। उपसर्या—गर्भ धारण करने के योग्य ऋतुमती यह अर्थ है।

संगत अर्थ में 'अजर्य' यह शब्द निपात से सिद्ध होता है ॥५२१॥

न जीर्यते, ज—अजर्यं। इसका अर्थ है आर्यसंगति जीर्ण नहीं होती है।

नाम उपपद से परे वद धातु से क्यप् और य प्रत्यय होता है ॥५२२॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

नाम्नि उपपदे वदः क्यप् भवति यश्च ।

सप्तम्युक्तमुपपदम् ॥५२३ ॥

धात्वधिकारे सप्तम्या निर्दिष्टमुपपदसंज्ञं भवति ।

तत्राङ्नाम चेत् ॥५२४ ॥

तदुपपदं नाम चेद्धातोः प्राग्भवति ।

तस्य तेन समासः ॥५२५ ॥

तस्य नामोपपदस्य तेन कृदन्तेन सह समासो भवति । ब्राह्मणो वदनं अथवा ब्रह्मणा उच्यते ब्रह्मोद्यं ब्रह्मवद्यं ।

भावे भुवः ॥५२६ ॥

नाम्नि उपपदे भुवो धातोः क्यप् भवति भावे । ब्रह्मभूयं गतः ब्रह्मत्वं गत इत्यर्थः ।

हनस्त च ॥५२७ ॥

नाम्नि उपपदे हन्तेः क्यप् भवति नस्य तकारादेशो भवति । ब्रह्महत्या । अश्वहत्या ।

वृञ्दृजुषीण्शासुस्तुगुहां क्यप् ॥५२८ ॥

एषां क्यप् भवति । पुनः क्यप् ग्रहणं अधिकारनिवृत्यर्थं । तेन नाम्नि भावे चेति निवृत्त्यर्थं ।

धातोस्तोन्तः पानुबन्धे ॥५२९ ॥

ह्रस्वान्तस्य धातोस्तोऽन्तो भवति पानुबन्धे कृति परे । वृत्यं दृत्यं । जुषी प्रीतिसेवनयोः जुष्यते इति जुष्यं । इत्यः । शासु अनुशिष्टौ ॥ शासेरिदुपधाया इत्यादिना आकारस्य इत्वं । शिष्यः । स्तुत्यः । गुह्यः ।

धातु के अधिकार में सप्तमी से निर्दिष्ट पद 'उपपद' संज्ञक होता है ॥५२३ ॥

यदि उपपद नाम है तो धातु के पहले होता है ॥५२४ ॥

उस नाम उपपद का उस कृदन्त के साथ समास होता है ॥५२५ ॥

ब्रह्मणः वदनं अथवा ब्रह्मणा उच्यते—

ब्रह्मा का कथन अथवा ब्रह्मा के द्वारा कहा गया है । वह ब्रह्म—उद्यं = ब्रह्मोद्यं, ब्रह्मवद्यं ।

नाम उपपद से भाव अर्थ में भू धातु से क्यप् प्रत्यय होता है ॥५२६ ॥

ब्रह्मभूयं गतः—अर्थात् ब्रह्मत्व को प्राप्त हो गया ।

नाम उपपद में हन् धातु से क्यप् प्रत्यय होता और नकार को तकार होता है ॥५२७ ॥

ब्रह्माणं हन्ति इति ब्रह्महत्या, अश्वहत्या । इसका विग्रह भी होता है । ब्राह्मणो हननं इति ।

वृञ् दृ जुष इण् शास् स्तु गुह् धातु से क्यप् प्रत्यय होता है ॥५२८ ॥

अधिकार निवृत्ति के लिए यहाँ पर पुनः क्यप् का ग्रहण किया है । इसमें 'नाम और भाव में ' इसकी भी निवृत्ति हो जाती है ।

पानुबंध कृत्प्रत्यय के आने पर ह्रस्वान्त धातु के अंत में 'त' होता है ॥५२९ ।

वृञ्—वृत्यं । दृ—दृत्यं, जुषी—प्रीति और सेवन करना जुष्यं, इण् से इत्यः शास्—"शासेरिदुपधाया" इत्यादि सूत्र से आकार को 'इ' होकर शासि वशि, से ष होकर शिष्यः, स्तुत्यः, गुह्यः ।

ऋदुपधाच्चाकृपिचृतेः ॥५३० ॥

कृपि चृति वर्जित ऋकारोपधाद्धातोः क्यप् भवति। वृत्यं नृत्यं दृश्यं स्पृश्यं।

भृञोऽसंज्ञायाम् ॥५३१ ॥

भृञ असंज्ञायां क्यप् भवति। भ्रियत इति भृत्यः।

ग्रहोऽपिप्रतिभ्यां वा ॥५३२ ॥

अपिप्रतिभ्यां परात् ग्रहेः क्यब् भवति वा। अपिगृह्यं। अपिग्राह्यं। पक्ष्ये घ्यण्। प्रतिगृह्यं प्रतिग्राह्यं।

पदपक्ष्ययोश्च ॥५३३ ॥

पदपक्ष्ययोरर्थयोर्ग्रहेः क्यब् भवति। पक्षे भवः पक्ष्यः। प्रगृह्यं पदं। पक्षे अर्जुनगृह्या सेना।

वौ नीपूञ्भ्यां कल्कमुञ्जयोः ॥५३४ ॥

वावुपपदे नीपूञ्भ्यां कल्कमुञ्जयोरर्थयोः क्यप् भवति। विनीयः कल्कः। विपूयो मुञ्जः।

कृवृषिमृजां वा ॥५३५ ॥

कृञादिभ्यो वा क्यप् भवति। कृत्यं कार्यं। दृश दृश प्रेक्षने। वृष्यं। वर्ष्यं। मृज्यं। मर्ज्यं।

मृजो मार्जिः ॥५३६ ॥

मृजु इत्येतस्य धातोर्मार्जिरादेशो भवति। चजोः कगौ धुडघानुबन्धयोरिति जकारस्य गकारः॥ मार्ज्यं मार्ग्यं।

कृप् चृत् को छोड़कर ऋकार उपधा वाली धातु से क्यप् होता है ॥५३०॥

ह्रस्वान्त से तकारागम होकर वृत्यं, नृत्यं बना आगे दृश्—दृश्यं, स्पृश्—स्पृश्यं बना।

संज्ञा रहित अर्थ में भृज् से क्यप् होता है ॥५३१॥

भ्रियते इति भृत्यः।

अपि प्रति से परे ग्रह धातु से व्यप् प्रत्यय विकल्प से होता है ॥५३२॥

अपिगृह्यं, संप्रसारण होकर र् को ऋ हुआ है। अन्यथा अपिग्राह्यं इसमें घ्यण् प्रत्यय हुआ है। ऐसे ही प्रतिगृह्यं प्रतिग्राह्यं।

पद और पक्ष्य अर्थ में ग्रह् से क्यप् होता है ॥५३३॥

पक्षे भवः पक्ष्यः—प्रगृह्यं पदं प्रगृह्यय को पद कहते हैं। पक्ष में अर्जुनगृह्या सेना अर्जुन के पक्ष को ग्रहण करती है।

'वि' उपपद से कल्क मुञ्ज अर्थ में नी पूञ् धातु से क्यप् प्रत्यय होता है ॥५३४॥

विनीयः, कल्कः। विपूयः। मुञ्जः।

कृ वृष मृज धातु से विकल्प से क्यप् होता है ॥५३५॥

कृत्यं तकार का आगम हुआ है वृष्यं वर्ष्यं। मृज्यं मर्ज्यं।

मृज धातु को मार्ज आदेश होता है ॥५३६॥

"चजोः कगौ"—इत्यादि ५४२ सूत्र से जकार को गकार हो गया। मार्ज्यं, मार्ग्यं।

सूर्यरुच्याव्यथ्याः कर्त्तरि ॥५३७॥

एते कर्त्तरि निपात्यन्ते। सरति सूते वा लोकानिति सूर्यः। रोचत इति रुच्यः। व्यथ दुःखभयचलनयोः। न व्यथते इति अव्यथ्यः।

भिद्योध्यौ नदे ॥५३८॥

एतौ कर्तरि नदे निपात्येते। भिनत्ति कूलानीति भिद्यः। उज्झत्युदकमित्युध्यः।

युग्यं च पत्रे ॥५३९॥

युग्यमिति निपात्यते पत्रे वाहनार्थे। युज्यते अनेनेति युग्यं।

कृष्टपच्यकुप्यसंज्ञायाम् ॥५४०॥

एते निपात्यन्ते संज्ञायां। कृष्टे स्वयमेव पच्यन्ते कृष्टपच्या व्रीहयः। कुप्यं सुवर्णरजताभ्यामन्यत्।

ऋवर्णव्यञ्जनान्ताद् घ्यण् ॥५४१॥

ऋवर्णान्तात् व्यञ्जनान्ताद्धातोः घ्यण् भवति। णकार इद्वद्भावार्थः। घकारश्चजोः कगौ इत्यर्थः। कार्यं। स्तृङ् आच्छादने। निस्तार्यं। श्लोकृ लोचृ दर्शने। आलोक्यं आलोच्यं। वाद्ये। कृप कृपायां। कृपे। रो लः। कल्प्यं।

चजोः कगौ धुट्घानुबन्धयोः ॥५४२॥

चजोः कगौ यथासंख्यं भवतः धुटि घानुबन्धे परे। वाक्यं पाक्यं योग्यं भोग्यं।

सूर्य रुच्य अव्यथ्य शब्द निपात से सिद्ध होते हैं ॥५३७॥

सूर्यः, रुच्यः, अव्यथ्यः।

भिद्य, उध्य नद अर्थ में निपात से बनते हैं ॥५३८॥

जो तटों को भेदन करे वह भिद्यः, जो उदक को छोड़े—उध्यः।

वाहन अर्थ में 'युग्य' निपात से बनता है ॥५३९॥

जिसके द्वारा ले जाया जाय—वह, युग्यं।

कृष्ट पच्य और कुप्य संज्ञा अर्थ में निपात से सिद्ध होते हैं ॥५४०॥

जो जोते हुये क्षेत्र में स्वयं ही पक जाते हैं वे 'कृष्टपच्याः'। धान्य। कुप्यं—सुवर्ण रजत से भिन्न को कुप्य कहते हैं।

ऋवर्णान्त और व्यञ्जनान्त धातु से घ्यण् प्रत्यय होता है ॥५४१॥

णकारानुबंध इचवत् भाव के लिये है और घकारानुबंध 'चजोः कगौः' इत्यादि ५४२ सूत्र के कार्य के लिये है।

कृ—कार्यं "वृद्धिरादौसणे" सूत्र से वृद्धि होकर शब्द बने हैं। स्तृङ्—ढकना = निस्तार्यं, लोकृ लोचृ—देखना आलोक्यं आलोच्यं वाद्यं। कृप—कृपा अर्थ में = 'कृपे रो लः' सूत्र से ऋ के र् को ल् होकर कल्प्यं बना।

धुट् घानुबंध प्रत्यय के आने पर चको क और ज को ग होता है ॥५४२॥

वच्—वाक्यं, पच् = पाक्यं, युज् = योग्यं, युज् = योग्यं, भुज् = भोग्यं।

न कवर्गादिव्रज्यजाम् ॥५४३ ॥

कवर्गादिः व्रजेः अजश्च चजोः कगौ न भवतः । क्षीज कूज गुज अव्यक्ते शब्दे ॥ कूज्यं कूजं । खज मन्थे । खाज्यं । प्राव्राज्यं । अज क्षेपणे । आज्यं ।

घ्यण्यावश्यके ॥५४४ ॥

आवश्यके गम्यमाने चजोः कगौ न भवतः घ्यणि परे । अवश्यपाच्यं । अवश्यभोज्यं ।

प्रवचर्चिरुचियाचियजित्यजाम् ॥५४५ ॥

एषां चजोः कगौ न भवतो घ्यणि परे । प्रवाच्यः । आर्च्यः । रोच्यः । याच्यः । याज्यः । त्यज हानौ । त्याज्यः ।

निःप्राभ्यां युजेः शक्ये ॥५४६ ॥

निप्राभ्यां परस्य युजेर्गो न भवति शक्यार्थे घ्यणि परे । नियोक्तुं शक्यः नियोज्यः । एवं प्रयोज्यः भृत्यः ।

भुजोऽन्ने ॥५४७ ॥

भुजो गो न भवति शक्यार्थे घ्यणि परे अन्ने । भोक्तुं शक्यं भोज्यं अन्नं भोज्यं पयः ।

आसुयुवपिरपिलपित्रपिदभिचमां च ॥५४८ ॥

आङ्पूर्वात्सुनोतेर्ण्वित्यादिभ्यश्च घ्यण् भवति । आसाव्यं । यु मिश्रणे । यूयते याव्यं । टुवप् बीजतन्तुसन्ताने । वाप्यं । रप लप जल्प व्यक्तायां वाचि । राप्यं । लाप्यं । त्रपूष् लज्जायां । त्रप्यं । दंभेरिह प्रकृतिनलोपः । अवदाभ्यं । आचाम्यं ।

कवर्गादि व्रज और अज के च, ज, को क, ग नहीं होता है ॥५४३ ॥

क्षीज, कूज, गुज—अव्यक्त शब्द करना । कूज्यं कूजं । खज-मन्थे । खाज्यं । व्रज—प्राव्राज्यं । अज-क्षेपण करना = आज्यं ।

आवश्यक अर्थ में घ्यण् प्रत्यय आने पर च ज को क ग नहीं होता है ॥५४४ ॥

अवश्यपाच्यं, अवश्यभोज्यं ।

प्रवच अर्चि रुचि याच, यज और त्यज के च, ज को घ्यण् के आने पर क ग नहीं होता है ॥५४५ ॥

प्रवाच्यः, आर्च्यः, रोच्यः, याच्यः याज्यः, त्याज्यः ।

नि और प्र से परे शक्य अर्थ में घ्यण् के आने पर युज् के ज् को ग् नहीं होता है ॥५४६ ॥

नियोक्तुं शक्यः = नियोज्यः । प्रयोज्यः भृत्यः ।

शक्य अर्थ घ्यण् के आने पर अन्न अर्थ में भुज् के ज् को ग् नहीं होता है ॥५४७ ॥

भोक्तुं शक्यं = भोज्यं—अन्न दूध आदि ।

आङ् पूर्वक सु, यु, वप्, रप, लप, त्रप, दभ और चम् धातु से घ्यण् होता है ॥५४८ ॥

आसाव्यं । यु—याव्यं, वाप्यं, राप्यं, लाप्यं, त्रप्यं, अवदाभ्यं आचाम्यं ।

उवर्णादावश्यके ॥५४९ ॥

उवर्णान्तात् घ्यण् भवति अवश्यंभावे गम्यमाने। अवश्यं लूयत इति लाव्यं। एवं नाव्यं। भाव्यं।

पाधोर्मानसामिधेन्योः ॥५५० ॥

पाधोरित्येतयोर्मानसामिधेन्योरर्थयोर्यथासंख्यं घ्यण् भवति। आयिरिच्यादन्तानामिति आयिप्रत्ययः। पाय्यं। धाय्यं। सामिधेनो ऋक्।

प्राङेर्नियोऽसंमतानित्ययोः स्वरवत् ॥५५१ ॥

प्राङोरुपपदयोर्नियो धातोरसंमतानित्ययोर्यथासंख्यं घ्यण् भवति स च स्वरवत्। प्रणाय्यश्चोरः। निग्राह्य इत्यर्थः। यो गार्ह्यपत्यादानीयत इति स चानित्यो रूढितः। आनाय्यो दक्षिणाग्निः।

सञ्चिकुण्डपः कृतौ ॥५५२ ॥

संपूर्वाच्चिनोतेः कुण्डपूर्वात्पिबतेर्घ्यण् भवति स च स्वरवत् कृतावभिधेये। सञ्चायः क्रतुः। कुण्डपायः क्रतुः।

राजसूयश्च ॥५५३ ॥

कृतावभिधेये राजसूय इति निपात्यते। राजा सोतव्यः राजा वा सूयते इति राजसूयः।

सात्राय्यनिकाय्यौ हविर्निवासयोः ॥५५४ ॥

एतौ निपात्येते हविर्निवासयोरर्थयोः। सात्राय्यं हविः विशिष्टमन्त्रनिकाय्यो निवासः।

परिचाय्योपचाय्यावग्नौ ॥५५५ ॥

एतावग्नावर्थे निपात्येते। परिचाय्योऽग्निः। उपचाय्योऽग्निः।

अवश्यंभावी अर्थ में उवर्णांत से घ्यण् प्रत्यय होता है ॥५४९ ॥

लु—लाव्यं, नु—नाव्यं, भ—भाव्यं।

पा और धा को मान् सामिधेनी अर्थ में घ्यण् होता है ॥५५० ॥

'आयिरिच्यादन्तानाम्' सूत्र से आय् प्रत्यय होता है। पाय्यं, धाय्यं।

प्र और आङ् उपपद में होने पर नी धातु से असंमत और अनित्य में स्वरवत् घ्यण् होता है ॥५५१ ॥

प्र नी य ई को ऐ होकर 'ऐ आय्' से आय् होकर प्रणाय्यः—चौरः निग्राह्यः है ऐसा अर्थ है आनाय्यः दक्षिणाग्निः।

संपूर्वक चिञ् और कुण्ड पूर्वक पा धातु से कृदन्त में घ्यण् प्रत्यय होता है। ॥५५२ ॥

और वह स्वरवत् होता है। सञ्चायः क्रतुः, कुंडपाय्यः क्रतुः।

यज्ञ अर्थ में राजसूय निपात से होता है ॥५५३ ॥

राजा सोतव्यः अथवा राजा सूयते 'राजसूयः'।

हविस् और निवास अर्थ में 'सात्राय्य' 'निकाय्य' निपात से बनते हैं ॥५५४ ॥

सात्राय्यः, हविः। विशिष्ट मंत्र निकाय्यः निवासः।

परिचाय्य, उपचाय्य से अग्नि अर्थ में निपात से सिद्ध होते हैं ॥५५५ ॥

परिचाय्यः उपचाय्यः = अग्निः।

चित्याग्निचित्ये च ॥५५६ ॥

एतावग्नावर्थे निपात्येते। चयनं चित्यं। अग्नेश्चयनमग्निचित्या।

अमावास्या वा ॥५५७ ॥

अमा—सहार्थे अमापूर्वाद्वसतेर्घ्यण् भवति कालाधिकरणे वा दीर्घत्वं निपात्यते। अमा सह वसतश्चन्द्रार्कौ यस्यां तिथौ सा तिथिः अमावस्या। अमावास्या। यल्लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धं।

वुण्तृचौ ॥५५८ ॥

धातोर्वुण्तृचौ भवतः।

युवुलामनाकान्ताः ॥५५९ ॥

युवुलां स्थाने यथासंख्यं अन अक अन्त इत्येते भवन्ति। भवतीति भावकः भविता। कारकः कर्त्ता। नायकः नेता। हारकः हर्त्ता। बुभूषकः। अस्य च लोपः बुभूषिता। गुणश्चेक्रीयिते। बोभूयकः। बोभूयिता। भावकः। भावयिता। पुत्रीयिकः। पुत्रीयिता।

हन्तेस्तः ॥५६० ॥

अग्नि अर्थ में चित्य अग्निचित्या निपात से बनते हैं ॥५५६ ॥

चयनं = चित्यं, अग्नेश्चयनं = अग्निचित्या।

अमापूर्वक वस् धातु से कालाधिकरण में घ्यण् प्रत्यय होता है ॥५५७ ॥

और विकल्प से दीर्घता हो जाती है। अमा-साथ।

अमा—सह चन्द्रार्कौ यस्यां तिथौ वसतः सा तिथिः—साथ है चन्द्र और सूर्य जिस तिथि में वह तिथि 'अमावस्याः' अमावास्याः।

व्याकरण सूत्र से जो नहीं बनते हैं वे सब निपात सिद्ध कहलाते हैं।

धातु से वुण् तृच् प्रत्यय होता है ॥५५८ ॥

यु वु और अल् को क्रम से अन अक और अन्त आदेश होते हैं ॥५५९ ॥

यहाँ वु को अक हुआ है भू—से वुण् हुआ था अतः णानुबंध से वृद्धि होकर भावकः बना तृच् से भू-तृ 'अन् विकरणः कर्तरि' २२ सूत्र से अन् होकर 'अनि च विकरणे' २३ सूत्र से गुण होकर इट् होकर भवितृ बना। 'कृत्तद्धितसमासाश्च' सूत्र से कृदन्त संज्ञा होकर सि विभक्ति आकर भविता बना।

कृ—से कारकः कर्ता, नी—नायकः, नेता। सन्नन्त में भू भू स् पूर्व को ह्रस्व और तृतीय अक्षर होकर वुभूषकः, अकार का लोप होकर इट होकर बुभूषिता बना।

'धातोर्वा तुमन्तादिच्छति नैककर्तृकात्' ३८० सूत्र से सन् होकर 'चण् परोक्षा चेक्रीयितसन्नन्तेषु' २९२ सूत्र से द्वित्व होकर 'द्वितीय-चतुर्थयोः प्रथमतृतीयौ' सूत्र १५९ से चतुर्थ को तृतीय होकर ह्रस्व होकर बना है। चेक्रीयित में 'गुणश्चेक्रीयते' ४१० सूत्र से गुण होता है, अतः बोभूयकः बोभूयिता। कारित संज्ञक इन् से परे भावकः भावयिता। नामधातु से पुत्रीयकः पुत्रीयिता।

अकार णकारानुबन्ध प्रत्यय के आने पर हन् के नकार को तकार होता है ॥५६० ॥

हन्तेर्नकारस्य तो भवति ञ्णानुबन्धे प्रत्यये परे। हस्य हन्तेर्घिरिणिचोः। घातकः। हन्ता। हन हिंसागत्योः। आथिरिच्यादन्तानां। दायकः। दाता। अवसायकः। अवसाता। गायकः। गाता।

नसेटोऽमन्तस्यावमिकमिचमाम् ॥५६१॥

सेटोऽमन्तस्य वमिकमिचमिवर्जितस्य इचि कृतं कार्यं न भवति ञ्णानुबन्धे कृति परे। शमकः शमिता। दमकः दमिता। यमकः यमिता।

अच् पचादिभ्यश्च ॥५६२॥

पचादिभ्यः अच् भवति। सर्वे धातवः पचादिषु पठ्यन्ते। पचः पठः करः देवः।

नन्द्यादेर्युः ॥५६३॥

नन्द्यादेर्युर्भवति सर्वे धातवो नन्द्यादौ पठ्यन्ते। नन्दतीति नन्दनः। रम क्रीडायां रमणः। राध साध संसिद्धौ। राधनः साधनः।

ग्रहादेर्णिन् ॥५६४॥

ग्रहादेर्गणात् णिन् भवति। सर्वे धातवः ग्रहादौ पठ्यन्ते। ग्राही ग्राहिणौ ग्राहिणः। स्थायी मायी श्रावी।

नाम्युपधात्रीकृगृज्ञां कः ॥५६५॥

नाम्युपधात् प्रीणातेः किरतेर्गिरतेर्जानातेश्च को भवति। क्षिप प्रेरणे। विक्षिपः। लिख विलेखने विलिखः। क्रुशः। प्रीञ् तर्पणे कान्तौ च। प्रियः उत्किरः।

'हस्य हन्तेर्घिरिणिचोः' ३६७ सूत्र से इण् इच् के आने पर हन् के हकार को घकार हो जाता है इस नियम से घातकः, हन्ता। दा धा 'आयिरिच्यादंतानां' ३६४वें सूत्र से आय् होकर दायकः धायकः दाता धाता बना।

वम् कम् चम् को छोड़कर इट् सहित अम् अन्त वाली धातु से ञ् णानुबन्ध कृदन्त प्रत्यय के आने पर इच् प्रत्यय से कहा गया कार्य नहीं होता है ॥५६१॥

शमकः शमिता, दमकः दमिता, यमकः यमिता।

पचादि धातु से 'अच्' प्रत्यय होता है ॥५६२॥

पचादि शब्द से सभी धातुयें ली जाती हैं पच् अ = पचः पठः करः देवः इत्यादि।

नन्द्यादि से 'यु' प्रत्यय होता है ॥५६३॥

नद्यादि से सभी धातुयें पढ़ी जाती हैं। 'युवुलामनाकान्ताः' ५५९वें सूत्र से यु को अन हो जाता है। नन्दतीति = नन्दनः। रमु—क्रीड़ा करना = रमणः। राध् साध्—सिद्धि अर्थ में हैं। राधनः, साधनः।

ग्रहादि गण से णिन् प्रत्यय होता है ॥५६४॥

ग्रहादिगण में सभी धातु लिये जाते हैं। ग्रह्—णिन् हुआ णानुबंध से वृद्धि होकर ग्राहिन् बना = ग्राही ग्राहिणौस्था मा से आय् होकर णिन् हुआ है एवं श्रु को वृद्धि हुई है स्थायी मायी श्रावी बनेंगे।

नामि उपधा वाले और प्री कृ गृ और ज्ञा से 'क' प्रत्यय होता है ॥५६५॥

क्षिप्—प्रेरणा = विक्षिपः क् अनुबन्ध होकर 'अ' रहता है। लिख् = विलिखः क्रुश् = क्रुशः। प्रीञ्—तर्पण करना और चमकना। ई को इय् होकर 'प्रियः' बना। कृ अ 'ऋदन्तस्येरगुणे' सूत्र १९९ से इर् होकर किरः उत्किरः।

वा स्वरे ॥५६६ ॥

गिरते रेफस्य वा लकारो भवति स्वरे परे। उद्गिरः उद्गिलः प्रज्ञः।

उपसर्गे चातो डः ॥५६७ ॥

उपसर्गे तु आकारान्ताड्डो भवति। सुग्लः। सुम्लः। प्रस्थः। प्रह्वः। छो छेदने। प्रच्छः।

धेट्दृशिपाघ्राध्मः शः ॥५६८ ॥

उपसर्गे उपपदे एभ्यः शो भवति। उद्धयः। उत्पश्यः। उत्पिबः। उज्जिघ्रः। उद्धमः।

साहिसातिवेद्युदेजिचेतिधारिपारिलिम्पिविदां त्वनुपसर्गे ॥५६९ ॥

एषामनुपसर्गे शो भवति। साहयतीति साहयः। एवं सातयः। वेदयः। एजृ कम्पने। उद्देजयः। चिती संज्ञाने। चेतयः। धृङ् धारणे धारयः। पार तीर कर्मसमाप्तौ। पारयः। लिम्पः। विन्दः।

वा ज्वलादिदुनीभुवो णः ॥५७० ॥

ज्वलादिभ्यो दुनोतेः नयतेर्भवतेश्च अनुपसर्गे णो भवति वा परे अच्। ज्वल दीप्तौ। ज्वलः ज्वालः। चल कम्पने। चलः चालः। कसपर्यन्तो ज्वलादिः। टुदु उपतापे। दवः दावः। नयः नायः। भवः भावः।

स्वर प्रत्यय के आने पर गृ के रकार को विकल्प से लकार हो जाता है ॥५६६ ॥

उद्गिरः, उद्गिलः। ज्ञा कानुबन्ध से अन्तिम स्वर का लोप होकर प्रज्ञः बना।

उपसर्ग सहित आकारान्त धातु से 'ड' प्रत्यय होता है ॥५६७ ॥

सु उपसर्ग पूर्वक ग्ला म्ला हैं 'डानुबन्धेऽन्त्यस्वरादेर्लोपः' ५१० सूत्र से डानुबन्ध में अन्त्य स्वर का लोप होकर सुग्लः सुम्लः सुस्थः प्रस्थः हणा से प्रह्वः बना।

उपसर्ग उपपद सहित धेट् दृश् पा घ्रा और ध्मा धातु से 'श' प्रत्यय होता है ॥५६८ ॥

शित् होने से पश्य पिब आदि आदेश होते हैं उत् धे अ = उद्धयः। उत्पश्यः उत्पिबः उज्जिघ्रः उद्धमः इनमें 'दृशेः पश्यः' ६९, 'पः पिब' ६३, 'घ्रो जिघ्रः' ६४, 'ध्मो धमः' ६५ इन सूत्रों से क्रम से दृश् को पश्य, पा को पिब, घ्रा को जिघ्र और ध्मा को धम आदेश होता है।

साहि साति वेदि उत्पूर्वक एजृ धृङ् पार लिप विद धातु से उपसर्ग के अभाव में 'श' प्रत्यय होता है ॥५६९ ॥

शानुबन्ध से सार्वधातुकवत् कार्य होता है। साहयतीति साह्यः चुरादिगण से इन् होकर अन् होकर बना है। ऐसे ही सातयः वेदयः बने हैं। एजृ-कम्पना उत्पूर्वक उद्वेजयः चिती—समझना चेतयः चुरादिगण से बना है। धृङ्—धारण करना धारयः पार तीर-कार्य समाप्त होना पारयः तारयः। लिम्पः विन्दः इन दो में तुदादि गण में 'मुचादेरागमो नकारः स्वरादनि विकरणे' १९७ सूत्र से नकार का आगम होकर अन् विकरण होकर रूप बना है।

ज्वलादि से दु, नी, भू धातु से विकल्प से अण् प्रत्यय होता है ॥५७० ॥

इन धातु से उपसर्ग रहित में अण् या अच् प्रत्यय होता है। ज्वल-दीप्त होना, ज्वलः ज्वालः चल—कम्पना चलः चालः, कस पर्यन्त ज्वलादि धातु हैं। टुदु—उपताप देना दवः दावः, नयः नायः, भवः भावः।

समाङो स्रुवः ॥५७१ ॥

समाङोः स्रवतेर्णो भवति । संस्रावः । आस्राव । समाङोरिति किं ? परिस्रवः ।

अवे हृषोः ॥५७२ ॥

अव—उपपदे हरतेः स्यतेश्च णो भवति । हृञ हरणे । अवहारः । षोऽन्तकर्मणि । अवसायः ।

दिहिलिहिश्लिषिश्वसिव्यधतीण्श्यातां च ॥५७३ ॥

एषां णो भवति । दिह उपचये । देहः । लिह आस्वादने । लेहः । श्लिष आलिङ्गने श्लेषुः । श्वस प्राणने श्वासः । व्यध ताडने व्याधः । अत्यायः । च्युङ् छ्युङ् ज्युङ् ग्युङ् प्रुङ् गाङ् श्यैङ् गतौ । अवश्यायः । दायः । पायः । प्रत्याय इत्यादि ।

ग्रहेर्वा ॥५७४ ॥

ग्रहेर्वा णो भवति । ग्राहो जलचरः ग्रहः ।

स्वरवृदृगमिग्रहामल ॥५७५ ॥

स्वरान्ताद् वृदृगमिग्रहिभ्यश्च अल् भवति घञोपवादः ।

गेहे त्वक् ॥५७६ ॥

ग्रहेर्गेहेऽभिधेये तु अग्भवति । गृह्णातीति गृहं । गृहं दाराः ।

नृतिखनिरञ्जिभ्य एव शिल्पिनि वुस् ॥५७७ ॥

अभ्य एव शिल्पिनि अभिधेये वुस् भवति । नर्त्तकः नर्त्तकी खनकः खनकी । रंज रागे ।

सम् आङ् पूर्वक स्रु धातु से अण् होता है ॥५७१ ॥

संस्रावः आस्रावः, सम् आङ् से ही हो ऐसा क्यों कहा ? परिस्रवः ।

अव उपपद सहित हृ, सो धातु से अण् होता है ॥५७२ ॥

अवहारः अवसायः ।

दिह, लिह, श्लिष, श्वस्, व्यध, इण, शो धातु से परे 'ण' प्रत्यय होता है ॥५७३ ॥

णानुबन्ध से गुण होकर दिह = देहः, लिह् = लेहः, श्लिष = श्लेषः, श्वस् = श्वासः, व्यध = व्याधः अति पूर्वक इण् को अत्यायः श्यैङ्—गमन करना 'अवश्यायः' दायः पायः 'आयिरिच्यादंतानां' से आय् हुआ है । प्रत्यायः इत्यादि ।

ग्रह धातु से विकल्प से 'ण' होता है ॥५७४ ॥

